श्रीगणेशायनमः अस्य श्रीवश्यवाराहिस्तोत्रमंत्रस्य अजऋषिः गायत्रीछंदः वशिकरणवा
राहिदेवता ऐं बीजं स्वाहा शक्तिः क्लीं कीलकं मम चतुर्विधपुरुषार्थे जपे विनियोगः ओं अज
ऋषये नमः शिरसि गायत्रीछंदसे नमः मुखे ओं वशिकरणवाराहिदेवतायै नमः हृदये क्लीं
कीलकाय नमः नाभौ ऐं बीजाय नमः गुह्ये स्वाहा शक्तये नमः पादयोः ओं त्रैलोक्यमोहिनी अंगुष्ठा
भ्यां नमः ओं जगत्त्रयमोहिनि तर्जनीभ्यां नमः ओं राजवश्यमोहिनी मध्यमा० ओं दुर्गवश्यमोहिनी
अनामिकाभ्यां० ओं सर्वस्त्रीपुरुषवशिकरी कनिष्ठिका० ओं सर्ववश्यकरतलकरपृष्ठाभ्यां नमः
ओं वशिं कुरु २ सर्वांगन्यसेत् एवं हृदयादिन्यासः ततो ध्यानं रक्तांगि रक्तवसनां नीलजीमूतस
न्निभां च रक्तोदितनिकाशाहरनूपुरशोभिता १ शंखचक्रौ भुजे शुभ्रौ [illegible] धरा शुभ्रांगा
हि मृताया निभीषणं शरणमाम्यहं २ एवं ध्यात्वा मानसोपचारैः संपूज्य मूलमंत्रं जपेत् ओं ऐं
क्लीं नमो भगवति वाराहि अमुकं वश्यमानय मानय वे वे ठठठठ हुं फट् स्वाहा अथ स्तोत्रं अश्वारूढ
रक्तवर्णा स्मितसौम्यमुखाम्बुजा राजस्त्रीसर्वजंतूनां वशिकरणदायिनी १ वशिकरणकार्यार्थं पुरा दे
वेन निर्मिता तस्मात्त्वं वश्यवाराहि सर्वान्मे वशमानय २ यथा राजा महाज्ञानं वस्त्रं धान्यं महावसुनस्म
संददाति वाराहि राजानं वश्यमानय ३ अंतर्बहिश्च मध्ये च व्यापारेषु सभासु च यथा स्मरति मामेव
भावस्य वशिं कुरु ४ चामरं दोलिकां छत्रं राजचिह्नानि यच्छति अभिष्टं सपदा राजा [illegible] वशं
कुरु ५ मन्मथ [illegible] मामस्तु [illegible] ६ मृगाश्वस्वापदाः
[illegible] मामेव [illegible] अनुगच्छ [illegible] सारात्तथा कुरु ७ वशी
करणकामार्थं यत्र यत्र [illegible] समाहितार्थिनी [illegible] तत्कार्ये तत्र [illegible] ८ वश्य [illegible]
कार्यं च [illegible] वाराहि [illegible] ९ [illegible] करणं नाम [illegible] नाम निवारितः
तस्मात्त्वं वश्यवाराहि जगत्सर्वं वशीकुरु १० वश्यस्तोत्रमिदं ध्यात्वा त्रिसंध्यं यः पठेन्नरः सोपि व

इदं नेपत्सर्वराजानं जनमेवच:॥११ इति श्रीविश्वनाथाष्टकस्तोत्रं संपूर्णं श्रीरस्तु॥
अथ षष्ठीपूजन प्रार्थना॥ गौरीपुत्रो यथा स्कन्द: शिशुत्वे रक्षित: पुरा॥ तथा ममाप्ययं बाल: षष्ठिके
रक्षतां नम:॥ षष्ठि देवि नमस्तुभ्यं सूतिकागृहशालिनी॥ पूजिता परमा भक्त्या दीर्घमायु: प्रयच्छ मे॥ ज
ननी जन्मसौख्यानां वर्द्धिनि धनसंपदां॥ साधनी सर्वसिद्धीनां जन्म देवि नमोस्तु ते॥ जपरा जगन्मा
तर्जगदानन्दकारिणी॥ प्रसीद मम कल्याणि नमस्ते षष्ठि देवते॥ षष्ठी ध्यानं भुवने लोके या निभृता
निस्थापरा चिरा नित्य॥ ब्रह्मा विष्णु शिवै: सर्वैर्रक्षां कुर्वन्तु तानि मे॥ आवाहनं॥ जननी जन्मसौख्या
नां वर्द्धिनि धनसंपदां॥ साधिनी सर्वसिद्धीनां जन्म देवि नमोस्तु ते॥ आवाहनं॥ जन्मषष्ठी देवि नमस्तु
भ्यं संसारभयनाशिनी॥ पाद्यं गृहाण मे बालसूतिके चेन पार्श्वभूत॥ पाद्यं॥ अक्षता पुष्प गंधाद्यं अर्घ्यं
धं मंगलं जलं॥ गृहाण पाहि मे पुत्रं सूतिका भयहारिणी॥ इत्यर्घ्यं गृहाण आचमनीयं शुकर्पूरैलादिवासि
तं॥ सन्तुष्टा सूतिका पाहि जगन्मातर्नमोस्तु ते॥ इति आचमनीयं॥ पञ्चामृतं गृहाणेदं पयो दधि घृतं म
धु:॥ शर्करा सहितं देव्या पाहि बालं समातृकं॥ पञ्चामृतं॥ गंगाजलं मयानीतं स्नानार्थं तेसुरेश्वरी॥
गृहाण रक्ष बालं च सूतिकामपि मां तथा॥ स्नानं॥ दुकूलादिमयं देवि नानारत्नपरिष्कृतं परिधा
नमयादत्तं षष्ठि देवि नमोनम:॥ जननाशौचमध्ये च मम १।५।७ दिनेषु दानमानं गृहीतं न दोष:॥
भं अथ संकल्प: देशकालौ चार्य अस्याः बालकस्य: आयुरारोग्याभिवृद्ध्यर्थं सकलारिष्टशान्ति द्वारा श्री
परमेश्वरप्रीत्यर्थं विघ्नेशस्य जन्मदानां षष्ठी व्याडी वंतिकापामिरितो उपचारै: पूजनमहं करिष्ये॥
इति संकल्पस्तेक तन्त्रेण वा पृथक् संकल्पपो उपचारै: पूजयेत्॥ इति नाना संक्षेप पूजा॥

अहं ते कथयिष्यामि पुत्र सावहितो भव ॥ सच्चिदानंदरूपा या विश्वकीर्तिगीयते ॥ याभिर्व्याप्तं सकलं विश्वं तां दक्षिणामुदा ॥ उत्तीर्यते न्यतेरश्च्छस्तस्यां नयाखिलेपिते ॥ यस्याः प्रसादमासाद्य ब्रह्मारश्च्छकरोभवत् ॥ विष्णुस्तोपालयामास संजहार सदाशिवः ॥ नानारूपधरा यासौ परिक्रीडति भूतले ॥ पुरस्य स्मृतिमात्रेण सर्वसिद्धिप्रदाभवत ॥ पुरेयं पूजिता यात्मा साधकाभीष्टसिद्धिदा ॥ इति श्रुत्वा मुने र्वाक्यं पुनराह सदाशिवं ॥ महान्मे संशयायापि स्तित्वं छिंधि महेश्वरः ॥ इत्युक्तो भार्गवेनाथ जगाद गिरिजापतिः ॥ पुत कौउमयासा भृंश्रेत्तां ताविहाय सा ॥ सागता साधकेस्यां तेरत्नात स्मैव रं ततः ॥ निवृत्ता सामया त्रासा क्रोधेन मनसा मुने ॥ ततो मांत्वं विहायैव गता साधकसन्निधिं ॥ तत स्त्वं शीघ्र फलदा भविष्यसि न दक्षिणे ॥ ततो दिनमनादेवी संतोषयतैवस्वके ॥ ततस्तुष्टो हि भगवान्मुनेरेतास मूचूवान् ॥ महाविद्यासपुद्दिनजस्वायात्वं सुमध्येम ॥ ततस्त्वंशाम निर्मुक्ता भाविष्यसि फलप्रदा ॥ ततः प्रभृति विप्रेयं फलदात्री कलौ भोः ॥ ॥ स्य ॥ कु

अथ सहस्त्राक्षरो मंत्रः ॥ क्रीं ३ हूं २ ह्रीं २ दक्षिणकालिके क्रीं ३ हूं २ ह्रीं २ स्वाहा शुचिजामहापिशाचिनी ॥ दुष्टजन्मचित्तनिर्वाशिणी क्रीं कामेश्वरी श्रीं वाराहि ह्रीं महामाये खं खः क्रोधाधिपश्री महालक्ष्मी सर्वहृदयरंजिनी श्री वाग्वादिनि विद्यात्रिपुरे स्त्रीं हसकलह्रीं हस्रेः ओं ह्रीं क्लीं मे स्वाहा दक्षिणकालिके क्रीं हूं ह्रीं स्वाहा खड्गमुंडधरे कुरु कुल्ले तारे ओं ह्रीं नमः ■ भयोन्मादिनी भय मम हन २ पच २ मथ २ फ्रें तिमोहिनी सर्वदुष्टान्विमोहय २ यग्रीवे सिंहनादिनी सिंहस्थे अश्वारूढे अश्वमुखि विद्राविणि द्राविय मम मन्त्रान्त्रू यमांहिंसि तुमुद्यतांतान् ग्रस २ महानीले वलाकिनी नील[redacted] पताके क्रें क्रां मे संक्षोभिणि उच्छिष्टचांडालिनी मातंगी सर्वजनवशंकरी नमः स्वाहा विस्फारिणी कपालधरे घोरे घोरनादिनी सुरवान्तु विनाशिनि उन्मादिनी ऐं ह्रीं श्रीं हसौः सौः वद २ क्लीं ३ क्रों ३ कीति ३ स्वाहा ॥

पामा कादि२कालिकेघोरघातिनिकामेश्वरिकामिके२ह्रीं२क्रींस्वाहात्वरट्यावत्येओंह्रींक्रींमेस्वा। रहस्य
३ हाठः श्रींह्रींहूंचामुंडेत्वरस्यभवनाभिमवअस्तुनवग्रहांदुष्टजनानस्तंभयांखिनीह्सतजचर्चित२
स्तने२त्रस्तानिविद्यभकारि॥इतिसरस्वाक्षरीमंत्रः॥ ॥अथपुरश्चरणविधिःतदुक्तंकालीतं
त्रे॥आदौपुरश्क्रियांकुर्यान्नियमेनयथाविधिः॥लक्षमेकंजपेद्दिवाहविष्याशीदिवामुचिः॥रा
त्रौतांबूलपूरास्यःशय्यायांलक्षमानतः॥ततःसिद्धमनुर्मंत्रीप्रयोगार्हीनचान्यथा॥जीवहीनोयथा
देहीसर्वकर्मसुनक्षमः॥पुरश्चरणहीनोहितथामंत्रप्रकीर्तितः॥तस्मादादौपुरश्चर्यांकृत्वासाधक
सत्तमः॥नानाचारंनकर्तव्यंनचारणमितस्ततः॥भूतहिंसानकर्तव्यापशुहिंसाविशेषतः॥बलि
दानंविनास्त्रीव्याहिंसांसर्वत्रवर्जयेत्॥अन्यमंत्रपुरस्कारंनिंदांचैवविवर्जयेत्॥प्रयोगंचततःकुर्यात्
सर्वंपरमदुर्लभं॥स्वतंत्रेपि॥दिवालक्षंशुचिर्भूत्वाहविष्याशीजपेन्नरः॥ततस्तुतद्दशांशेनहोमये
त्पिचिषाप्रिये॥तर्पयेत्तीर्थतोयेनपयसासर्पिषापिवा॥मधुनावाप्रिशाभिश्रतोयेनपरमेश्वरी॥ततोदे
वींचाभिषिंचेत्तर्पणस्यदशांशतः॥तद्दशांशेनहविष्यान्नैर्भोजयेद्भक्तितःप्रिये॥कालीमंत्रविदोविप्रा
न्दक्षिणांगुरवेददेत्॥पाचावंकौथितंकलंपंश्रृणुष्वैतंततःप्रिये॥फेत्कारिणीयेपि॥भैक्ष्याशीनियमाहारः
सकृद्भक्तोविधीयते॥दिवाचैवंजपंकुर्यात्पुरश्चरणिकोद्विजः॥शाकयावकभोक्ष्याशीवरुणासहस्तर्पि
षा॥दध्यामूलफलैर्वापिकुर्याद्वृत्तं॥नमन्त्रवृत्त॥ब्रह्मचर्यंतथैवोक्तंस्नानंत्रिष्ववणंतथा॥पूर्वेन्दुदेवतायाश्च
पूजांकृत्वाविशेषतः॥सर्वमंत्राःप्रयोक्तव्याप्रायश्चाःप्रणवादिकाः॥अनन्यचित्ताआत्रौनोवाप्यतोविहिता
सनः॥अनुष्ठीयतवैमंत्रान्गुरुवंदनपूर्वकं॥तत्रांतरे॥दीपस्थानंसदावीक्ष्यजपयागादिकंचरेत्॥नैरेव
निष्कलंविंचादभिचारायकल्पतइति॥ताराप्रदीपिका॥कूर्मचक्रमुखंविचार्यासनंतत्प्रकल्पयेत्॥

चैलाजिनकुशान्वेत्यसुचित्रकंबलानिवा॥आसनानिप्रकल्प्याथसंविष्टोत्साधकोत्तमः॥शवेवाकुशाद
र्भेवान्चर्माणितथापुनः॥मरुत्तारवापिस्थित्वासाधयेद्वाप्रयत्नतः॥अन्यत्रापि॥देवतागुरुमंत्राणामै
क्यंसंभावयन्धिया॥जपेदेकमनाःप्रातःकालान्मध्यंदिनावधि॥यत्संख्ययासमारब्धंतत्कर्त्तव्यमहर्नि
शं॥यदिन्यूनाधिकंकुर्याद्व्रतभ्रष्टोभवेन्नरः॥मुंडमालायामपि॥प्रातःकालंसमारभ्यजपेन्मध्यंदिनावधि।
प्रथमेहनियज्जप्तंजप्तव्यंतद्दिनेदिने॥न्यूनाधिकंनजप्तव्यमासमाप्तेसदाजपेत्॥तन्त्रांतरेच॥संख्यापू
र्तौनिजद्रव्यैर्जपसंख्यादशांशतः॥यथोक्तकुंडेजुहुयाद्यथाविधिविधानतः॥अथवाप्रत्यहंजप्त्वाजुहुया
द्दशांशतः॥ततोहोमाद्दशांशेनजलेसंपूजयेद्देवतां।तर्पणादितथाप्यस्मात्कुर्यात्साधकसत्तमः॥
कुलेसंभारेपि॥स्नातःशुक्लांबरधरःशुचिःप्रयतमानसः॥दिवाएवंप्रकर्त्तव्यंसर्वकामार्थसिद्धये॥
ताराप्रदीपेच॥विरच्यविधिवद्दिव्यंमंडलंसुमनोहरं॥तस्मिन्कलशमारोप्यक्वाथतोयैःप्रपूरयेत्॥नि
क्षिप्यनवरत्नानितत्रगंधाष्टकंपुनः॥आवाह्यपूजयेन्मंत्रीदेवीमावरणैःसह॥कलशेपूजयेन्मंत्रसंख्या
यापूरणावधि॥ततःपूर्णसमागत्यगुरुर्देवोविधानतः॥अभिषिंचेच्छिष्यमूर्ध्निकलशोदकवारिभिः॥त
तःशिष्यप्रयत्नेनधनाद्यैस्तोषयेद्गुरुं॥अथैवंविधिना॥लक्षंप्रजप्यतद्दशांशतः॥होमंतद्दशांशतस्त
र्पणं॥तद्दशांशा॥भिषेकः॥तद्दशांशब्राह्मणभोजनंच॥नदशक्तौहोमादिसंख्याद्विगुणजपोवि
प्रेणकार्यः॥क्षत्रियेणत्रिगुणजपःकार्यः॥वैश्येनचतुर्गुणजपः॥शूद्रेणजपः॥तदुक्तंकुलप्र
काशे॥यद्यद्विहायेतत्तत्संख्याद्विगुणंजपं॥कुर्वीतत्रिचतुःपंचसंख्ययासाधकोत्तमः॥अन्य
त्रापि॥होमकर्मण्यशक्तानांविप्राणांद्विगुणोजपः॥इतरेषांत्रिवर्णानांत्रिगुणादिसमीरितः॥गुरु
संतोषयेद्देवंमंत्राःसिध्यंतिमंत्रिणः॥मुंडमालायांतु॥होमाद्यशक्तोदेवेशिकुर्यात्तद्द्विगुणंजपं॥

श्यामा

यदिस्यूजाचक्रात्कस्माद्व्याभावेनसुंदरी॥केवलंजपमात्रेणमंत्राःसिद्धाभवंतिहि॥पुरश्चरणविधी
यते॥अथवाद्ब्राह्मणभोजनमात्ररूपमेव॥तदुक्तंकुलप्रकाशे॥एकमंगंकिंवाहितमंत्रान्नेष्टमवाप्नुया
त्॥अन्नैश्चतुर्विधैर्देवीपदार्थैःषड्रसान्वितैः॥संभोजितेषुविप्रेषुसर्वंहिसफलंभवेत्॥सम्यक्सि
धैकमंत्रस्यपंचांगोपासनेनहि॥सर्वेमंत्राश्चसिध्यंतितत्प्रभावात्कुलेश्वरि॥अन्यत्रापि॥सर्वथाभो
जयेद्विप्रान्कृतसांगार्थसिद्धये॥विप्राराधनमात्रेणव्यंगंसांगंभवेत्सदा॥तंत्रांतरेपि॥कृत्वामंत्रजपंमं
त्रीपुरस्कारान्समन्वितः॥दशांशेनजुहुयाद्गोयथोक्तविधिनाततः॥यद्वाजपफलंतुर्य्यांशंस्वाहांतंम
त्रमुच्चरन्॥अभिषिंचेत्समर्थोहं॥तत्तद्धोमदशांशांतुस्वाहांतंतर्पयेज्जलैः॥कुंभास्यमुद्रयेति॥
फेत्कारिणीये॥स्वाहांतेनैवमंत्रेणकुर्याद्धोमंबलिंतथा॥तदुक्तंकुलचूडामणौ॥मंत्रांतेनामसंयो
ज्यतर्पयामीतितर्पणं॥इतिपात्रावकल्पे॥अथवीरकल्पेविशेषोयथा॥तदुक्तंकुलचूडामणौ॥
पुरश्चरणकालेच्यपरयोषांप्रपूजयन्॥दीक्षितांवकृपुष्पाद्यैर्भोज्यैःपायससंभवैः॥आरब्धप्रकाले
चनियतंसुविपक्वान्नभोजनैः॥नानाविधैःपिष्टकैश्चनानारससमन्वितैः॥दुग्धदधिघृतैस्तक्रैनव
नीतैःसशर्करैः॥उपलास्वंडचूर्णैश्चनानाविधरसायनैः॥नारिकेलैःकदलैश्चनागरंगसुदृढैः॥
निंबर्कबीजपूरैश्चदाडिमादिफलान्वितैः॥नारण्यफलैश्चैवनानागंधानुलेपनैः॥चंदनैर्मृगनाभ्या
दिश्रीखंडैर्नवपल्लवैः॥रक्तनीलैःप्रियकैश्चअन्यैश्चवनजैस्तथा॥नानाशीलसमुद्भूतैर्नानालंका
रभूषणैः॥शून्येगेहेसमानीयचार्घ्यादिकंविशोधितां॥अमृतीकरणंकृत्वाशक्तिश्चाभिमुखंनयेत्॥
शक्त्यःस्वतंत्रोतरे॥गोपालिनीक्षत्रियावैश्याशूद्रान्तकुलभूषणाः॥वेश्यानापितकन्याचरजकीयोगिनि
तथा॥विशेषवैदग्ध्ययुताःसर्वाएवकुलांगनाः॥अथदीक्षितान्शक्तिश्चाभिमुखंनयेत्॥क्रमेणसंस्थाप्य॥

यै

रा

वागीश्वरसमोवाग्मी धनेधनपतिर्भवेत्॥ कामतुल्यश्चनारीणां रिपूणांसमयमोपमः॥ सर्वस्यैवजनस्यैवदुर्ल
भः कीर्त्तिवर्द्धनः॥ अंतेचलभतेदेव्यागणत्वंदुर्लभंनरः॥ चंद्रसूर्यसमोमंत्री वसेत्कल्पायुतंदिवि॥ इत्येवम
त्रैकंचैवबहुकिंकथ्यतेपुनः॥ नतस्यदुर्लभंकिंचिद्यः स्मरेत्पादरक्षिणां॥ ॥अथसपर्याविधिः॥ ब्राह्मे
मुहूर्त्ते चोत्थाय यथासन[redacted] शिरस्थशुक्लवर्णसहस्रदलकमलकर्णिकांतस्थचंद्रमंडलांतर्गतहंसपीठोप
रिगुरुंशुक्लवर्णंशुक्लालंकारभूषितंज्ञानानंदमुदितमानसंवराभयकरंवामोरुस्थरक्तशक्तिकंवामहस्त
रक्तोत्पलायादक्षिणहस्तेनधृतचारुकलेवरंशांतं द्विभुजं द्विनयनं दिव्याभिषेकेणगुरूणां संप्रदायानुग
तस्वनामपूर्वकंध्यात्वामानसोपचारैराराध्यमानसोपचारंयथा॥ लं पृथिव्यात्मकं गंधंसमर्पयामि॥ नमः॥
कनिष्ठांगुष्ठाभ्यांदद्यात्॥ हं आकाशात्मपुष्पंस० तर्जन्यंगुष्ठाभ्यां॥ यं वाय्वात्मकंधूपंस० मध्यमांगुष्ठाभ्यां॥
रं वन्ह्यात्मकंदीपं तर्जन्यंगुष्ठाभ्यां॥ वं अमृतात्मकंनैवेद्यंअनामांगुष्ठाभ्यां॥ सं सर्वात्मकंतांबूलंसर्वां
गुलिभिः॥ ऐं ह्रीं श्रीं हसखफ्रें हसक्षमलवरयूं सहखफ्रें सहक्षमलवरयीं श्रीअमुकानंदनाथामुकी
देव्यांबाश्रीपादुकांपूजयामीतिदशधाविमृश्यदंडवत्प्रणामंभूमौकुर्यात्॥ यत्तु॥ श्वेतांबरधरंगौरंश्वे
ताभरणभूषितं॥ इत्यादिगुरुध्यानंतद्ब्रह्मविषयबोध्यं॥ शक्तौतु॥ रक्तमाल्यांबरधरंसुरक्तंपद्म
वेष्टितमिति॥ शारदाटीकाकारः॥ अस्मन्मतेतुश्वेतवर्णमीपगुरोर्ध्यानांतरमस्ति॥ शक्तिविषयेतत्तु
अस्माकंक्वचिल्लिखिष्यामि॥ ज्ञानार्णवेपि ब्रह्मरंध्रेसहस्रारेकर्पूरधवलोगुरुरित्यादि॥ अत्रानेन
नमस्कृत्यतदनुज्ञांगृहीत्वा॥ मूलाधारस्थित्रिकोणांतर्गताधोमुखास्वयंभूलिंगवेष्टिनींप्रसुप्त
भुजगाकारांसार्द्धत्रिवलयांतडित्कोटिप्रभांनीवारशूकवत्तन्वीं कुंडलिनींत्रिकोणमंडलाग्नेचैतन्यं
विधायब्रह्मवर्त्मनाद्वादशांतंनीत्वातत्रपरमशिवेसंयोज्यकुलगुरुंध्यायेत्॥ तदुक्तं॥ कालिकाश्रुतौ॥

यामा

मूलाधारे स्मरेद्दिव्यं त्रिकोणं तेजसां निधिं ॥ तस्याग्रे यामानी पश्च ऊर्ध्वे व्यय स्थितां ॥ नीलतोयदमध्यस्था रहस्य
तडिल्लेखेव भासुरां ॥ नीवारशूकवत्तन्वी पीता भास्वत्तनूपमां ॥ तस्याः शिखाया मध्ये च परमोर्ध्वे व्यवस्थितां ॥ सब्र
ह्मा स शिवः सेंद्रः सोऽक्षरः परमः स्वराट् ॥ स एव विष्णुः स प्राणः स कालाग्निः स चंद्रमा इति ॥ कुंडलिनीं ध्यात्वा सर्वपापैः
प्रमुच्यते ॥ स महापातकेभ्यः पूतो भवतीति सिद्धिरुक्तं ॥ केवलं भैरवाभावो भवतीति कुलचूडामणौ च ॥ मूला
दिब्रह्मरंध्रांतं कुलं ध्यात्वा गुरुं स्मरेत् ॥ प्रह्लादानंदनाथाख्यं सनकानंदमेव च ॥ कुमारानंदनाथाख्यं व
शिष्ठानंदनायकं ॥ बोधानंदं ज्ञानानंदं ध्यानानंदं ततः परं ॥ क्रोधानंदं ततः पश्चाद्ध्यायेत्कुलमुखोपरि ॥
महारससरसोन्माद हृदयानंदलोचनाः ॥ कुलालिंगनसंभिन्ना मेवीताशेषतामसाः ॥ कुलशास्त्रैः परि
वृत्ताः पूर्णानंदकरणोद्यताः ॥ वराभयायुताः सर्वे कुलतंत्रार्थवादिनः ॥ एवं कुलगुरून्ध्यात्वा विसृज्य कु
लमार्गकं ॥ कुलस्थाने समानीय मूलं च शक्तिमानिः ॥ जप्त्वा जपं समर्प्याथ कुलनाथे तीर्थमाश्रयेत् ॥ ॥
दानं कुलगुरुं च तस्य सर्वस्वं किल सुखोवहं ॥ रहस्यमद्भुतं प्रोक्तं गोप्यं पशुसंकटे ॥ कुलानाथं परित्यज्य
ये न्यां ताः परसेविनाः ॥ तेषां दीक्षा च यागश्च अभिचाराय कल्पते ॥ तस्मात्सर्वप्रयत्नेन कुलीनं गुरु
माश्रयेत् ॥ कुलीनः सर्वविद्यानामधिकारी निगीयते ॥ दीक्षाप्रभुः स एवात्मा सर्वमंत्रस्य पारगः ॥ अन्य
च्च श्रुतौ ॥ प्रकाशमानां प्रथमे प्रयाणे प्रतिप्रयाणेप्यमृतायमानां ॥ अंतः पदव्यामनुसंचरंतीमानंद
रूपाममलां प्रपद्ये ॥ अहं देवी न चान्योस्मि ब्रह्मैवाहं न शोकभाक् ॥ सच्चिदानंदरूपोहमात्मानमिति
चिंतयेत् ॥ प्रातःकृत्यं संध्यावंदनादिकमेवानंदाश्रवणात् ॥ तदुक्तं यामले ॥ प्रातःकृत्यमकृत्वा तु यो देवीभ २
क्तितोर्चयेत् ॥ तस्य पूजाश्च विफला शौचहीना यथा क्रियेति ॥ बहिर्निर्गत्य कुलवृक्षान्नत्वा दंतधा
वनादिकं कृत्वा च ॥ कुलवृक्षं यथा ॥ श्लेष्मातककरंजाख्य निंबाश्वत्थकदंबकाः ॥ बिल्वो वटोप्यशो॥

कश्यद् सखैः कुलपादपाः।। ।।अथ स्नानं।। नद्यादौ गत्वा कालिकारूपं सर्वं विभाव्य सुवर्णरजतात्म
कं कुलदर्भं अनामिकातर्जनीषु धृत्वा मूलं स्मरन्।। मलापकर्षस्नानं कृत्वाचम्य।। ओं आद्येत्यादि कु
लदेवताप्रीतये स्नानमहं करिष्ये इति संकल्प्य।। जले त्रिकोणं यन्त्रं विलिख्य सूर्यमण्डलात् क्रोंमिति अंकु
शमुद्रया तीर्थमावाह्य मूलान्ते आत्मतत्त्वाय स्वाहा विद्यातत्त्वाय स्वाहा शिवतत्त्वाय स्वाहा।। इत्यन्त्या
मेत्।। अथवा ओं ह्रीं स्वाहेति त्रिधाचम्य आत्मानं त्रिः संप्रोक्ष्य मूलेन मृत्तिकया गलेपनं कृत्वा मूलं
पठन्।। कुंभमुद्रया शिरसि त्रिर्जलेनाभिषिंच्य अंगुलीभिः श्रोत्रादीनि सप्त छिद्राणि संनिरुध्य त्रिर्नि
मज्जेत्।। तदुक्तं नीलतन्त्रे।। मृत्कुशानपि संगृह्य गत्वा जलान्तिकं ततः।। मलापकर्षणस्नानं मंत्रस्ना
नं समाचरेत्।। विद्यया त्रिर्निमज्जेद्वा आचमेन्मनुनाथवा।। कुलचूडामणौ।। कुसुमरक्तहरिद्रौर्वा विवि
धाम्रमृत्तिकयः।। तत्र यः कुलजः शिष्यः स तद्रूपं परामृशन्।। दिवं सर्वामथोर्वस्य पातालं भूतसंभवं।।
आद्यन्ततः कुलदर्भेण सदर्भं कुलपुण्ड्रकः।। तर्जन्योरजतं धार्यं स्वर्णं धार्यमनामयोः।। एष एव कुशः
प्रोक्तो न कुशो यन्न संभवः।। कुलपात्रे सदूर्वं च सतिलं सजलं ततः।। गृहीत्वा कुलदेवस्य प्रीतये स्नान
माचरेत्।। कृतसंकल्प एवासौ कुलचक्रं जले न्यसेत्।। कुलस्थानात्समानीय कुलमुद्रां कुशेन च।।
कुलतीर्थानि तत्रैव समावाह्य शिवात्मकं।। ततोऽप्यं यन्त्रिधा पीतान्त्रिधाचप्रोक्षणं तनोः।। अंकुशमु
द्रा ज्ञानार्णवे।। मुष्टिं बध्वा दक्षकरे तर्जन्यंकुशरूपिणी।। अंकुशाख्या महामुद्रा त्रैलोक्याकर्षणक्ष
मा।। तीर्थावाहनं यथा श्रीक्रमे।। गंगे च यमुने०।। स्वतंत्रेऽपि।। मूलं पठन्मृद्भिर्तोयं मुद्रया कुंभसंज्ञया।।
वीँ क्षिपाकोत्रयं देवी आचमेत्साधकाग्रणीः।। आत्मविद्याशिवैस्तत्वैस्ततो यागगृहं विशेत्।। कुंभमु
द्रा यथा ज्ञानार्णवे।। दक्षांगुष्ठे परांगुष्ठं क्षिप्त्वा हस्तद्वयेन तु।। सावकाशां तु मिलितां मुष्टिं कुंभमुद्रां विदुर्बुधाः।।

ामा अभ्यस्त्र॥ नवछिद्राणि संरुध्य ततो मज्जो त्रिधा सुधीः॥ आत्म विद्या शिवैस्तत्त्वैराचामेत्साधकाग्रणीः रह्स
वेदाद्यं च ततो मायामुद्धृत्य च ततः पुनः॥ वह्निजायां परे दत्वा शुद्धेन पयसा पिबेत्॥ ॐ मणिधारिणी वज्रिणि
महाप्रतिसरे रक्ष रक्ष हुं फट् स्वाहा॥ इति शिखाबंधनं॥ ॥मूलेन तिलकं कृत्वा पूर्ववदाचम्य वैदिकीं
संध्यां विधाय ततः तांत्रिकीं संध्यां कृत्वा तर्पणं कुर्यात्॥ ॥तदुक्तं कुमारीतंत्रे॥ प्रणवं पूर्वमुद्धृत्य मणिधं ते
धारिणीत्यथ वज्रिणी। तिपदं प्रोक्तं महाप्रतिसरे तथा॥ रक्षद्वयं ततो हुं फट् स्वाहा स्यात्तदनंतरं॥ अनेनैव च मं
त्रेण रक्षां कुर्याद्विचक्षणः॥ रक्षामिति शिखाबंधनं कृत्वा शिखाभावे च कुशान्यतमेन ग्रंथिं वा कुर्यादित्यर्थः॥
शारदाटीकायां॥ उक्तेनैव प्रकारेण स्नात्वा स्नानं तु तांत्रिकं॥ वैदिकीं तांत्रिकीं संध्यां कृत्वा तर्पणमाचरेदिति॥
तांत्रिकी संध्या यथा॥ भीमविक्रमतंत्रे॥ पुनराचम्य विन्यस्य षडंगमपि मंत्रवित्॥ वामहस्ते जलं गृह्य
गलितोदकबिंदुभिः॥ सप्तधाप्रोक्षणं कृत्वा मूर्ध्नि मंत्रं समुच्चरन्॥ अवशिष्टोदकं हस्ते दक्षे संगृह्य बुद्धिमा
न्॥ इडयाकृष्य देहांतः क्षालितं तापसंचयं॥ कृष्णवर्णं तनु जलं दक्षनाड्या विरेचयेत्॥ दक्षहस्ते तु तन्मंत्री
पापं कृत्वा विचिंत्य च॥ पुरतो वज्रपाषाणे प्रक्षिपेदस्त्रमंत्रतः॥ ततो हस्तं प्रक्षाल्याचम्य गुरुं तर्पयेत्॥
यथा॥ ॐ अमुकानंदनाथ भैरवः सशक्तिकस्तृप्यतामिति त्रिः सकृद्वा॥ दिव्यसिद्धमानवौघगुरूंस्त
र्पयेत्॥ ततो जलयंत्रं विभाव्य तत्र पीठं संतर्प्य देवीमावाह्य॥ स्वाहांतमूलांते महाकालसहितदक्षिण
कालिकामातां तृप्यतां॥ इति संतर्प्य॥ एकैकांजलिना परिवारान्संतर्पयेत्॥ सशक्तिसायुधसवाहन
सपरिवारमहाकालसहिता श्री दक्षिणकालिकामातस्तृप्यतामिति॥ संतर्प्य॥ दूर्वाक्षतरक्तचंदनजय ४
वापुष्पादिनार्घ्यं निर्माय ह्रीं हंसः श्री मार्तंडभैरवाय प्रकाशशक्तिसहिताय एषोऽर्घ्यः स्वाहा इति
त्रिरर्घ्यं कुलसूर्याय दत्वा॥ सूर्यमंडले देवीं विभाव्य पूर्ववदर्घ्यं कृत्वा देवीं गायत्रीमुच्चार्य एषोऽर्घ्यः

महाकालसहितायश्रीदक्षिणकालिकायैस्वाहा॥इत्यर्घंदत्वागायत्रींयथाशक्तिप्रजप्यदेविहस्तेसमर्प
येत्॥तदुक्तंयामले॥तर्पणादौप्रयुंजीततृप्यतांब्रह्मभैरवं॥आवाहनेस्वपित्रादीन्भैरवानितिकीर्तये
त्॥तत्रभैरवरूपीचदेवीमपिचकालिकालिकां॥मातःपितृभैरवतृप्यतां॥एवमेवविधानेनयथा
शक्त्यात्वतर्पयेत्॥तंत्रांतरे॥दिनेशायोस्थितेतत्र मार्त्तंडभैरवायेतित्रिधाचार्घ्यंप्रकल्पयेत्॥तदु
क्तंकुलचूडामणौ॥कुलसूर्यायस्वाहात्रिधाचार्घ्यंप्रकल्पयेत्॥स्वान्ऋषीन्पितॄंश्चैवतर्पयेत्कुलवा
रिणा॥नन्दिकेश्वरसंहितायांच॥यावन्नदीयतेचार्घ्यंभास्करायानिवेदितंतावन्नपूजयेदिष्टंत्र्यंक
रंवासुरेश्वरीमिति॥अन्यत्र॥तर्पणादौप्रयुंजीततृप्यतांब्रह्मभैरवः॥आवाहनेस्वपितॄन्भैरवादी
न्प्रकीर्तयेत्॥तत्रभैरवरूपेणदेवीमपिचकालिकां॥तृप्यतांकालिकामातापिताभैरवतृप्यतां॥ए
वमेवविधानेनयथाशक्त्यापितर्पयेत्॥मार्त्तंडभैरवायेतित्रिधाचार्घ्यंप्रकल्पयेत्॥तंत्रांतरे॥दिनेशा
पे योस्थितेतिष्ठन्वारिणाचांजलित्रयं॥षष्ठोत्तरशतावृत्यागायत्रींप्रजपेत्सुधीः॥देव्युवाच॥गाय ॐ
त्रीयापुराप्रोक्तादेवदेवजगत्प्रभो॥असितायाःप्रकारस्तुध्यानंपूजानथैवच॥साधनंचमहादेवयथा
वद्वदमेप्रभो॥शिवउवाच॥गायत्रीयापुराप्रोक्ताब्रह्मज्ञानस्वरूपिणी॥श्रीरुद्रस्तुऋषिश्चास्याग
यत्रीछंदउच्यते॥शिवशक्तिस्वरूपादेवतापरिकीर्तिता॥मायाबीजंकूर्चंशक्तिःकर्पूरंकीलकंमतं॥
ध्यानंपुरस्क्रियाचैवशृणुष्वप्राणवल्लभे॥श्मशानेतुमहाकालींध्यायेद्देवींदिगंबरां॥दंष्ट्राकरा
लवदनांमुंडमालाविभूषितां॥दक्षिणोर्ध्वेधनुर्दत्तेवामेचैवंतथाशरान्॥अधःपाशंचखड्गंचक्र
मात्परिकीर्तितं॥एवंध्यात्वामहाकालींजपेल्लक्षचतुष्टयं॥रुधिराक्तैर्बिल्वपत्रैस्तद्दशांशेनहोमयेत्॥
साधनंचमहादेविपूर्ववत्समुपाचरेत्॥ ॥मनुः॥गायत्रीकुमारीतंत्रे॥कालिकायैपदंप्रोच्यविद्महे

वामा तदनंतरं॥श्मशानवासिनीमेताधीमहीतिततोवदेत्॥तन्नोघोरेपदंशोन्य प्रचोदयात्पदेगेदिति॥अस्याः रहस्य
पठनमात्रेणमहापातककोटयः॥सद्यःप्रलयमायांतिसाधकस्यनचान्यथा॥रावणस्यवधाच्चैव
रामचंद्रोविमोचितः॥गुरुदाराकर्षणाच्चदेवश्चंद्रोविमोचितः॥आत्मकन्याकर्षणाच्चब्रह्माप्यविमो
चितः॥सुरापानाच्चश्रीरुद्रमादत्तात्रेयस्तथैवच॥एवमेषामहाविद्यागोप्यादेविसुंदरि॥महापातकयु
क्तोपिप्रजपेद्धाधायदि॥सत्यंसत्यंमहादेवीमुक्तोभवतितत्क्षणात्॥कुलचूडामणौ॥उत्थायकुलवस्त्र
द्वेपरिधायकुलेन्वच॥तिलकंकुलरूपंचकृत्वाचम्यकुलेश्वर॥स्वतंत्रेच॥ ॥मोक्षार्थेरक्तवस्त्रेचभो
गार्थेश्वेतवाससा॥मारण रुद्रवेतुवश्येपीतेसरागके॥उच्चाटनेच्याघ्रचर्मेस्तंभनेकृष्णकर्
मणि॥परिधायततोमंत्रीयागस्थानमथाविशेत्॥तंत्रांतरेपि॥ततश्चसाधकश्रेष्ठोहृदिमंत्रपरायण
न्॥अर्चाहंमानसोयोगीयागभूमिमथाविशेत्॥जलशंखंवाकरेकृत्वागत्वाद्वारिमहेश्वरी॥क्षालयेक्षत
पादौचवक्ष्यमाणेनवर्त्मना॥कुमारीकल्पेपि॥ओंवज्रोदकेहुंफट्स्वाहामंत्रेणमंत्रवित्॥जलमानीय
सव्येतुआसनंशोधयेत्ततः॥प्रणवंपूर्वमुध्दृत्यलज्जाबीजंतथैवच॥ततोवसुधराद्यंतेधर्मगायत्री
ततःपरं॥सर्वबाहूसमुच्चार्यपापान्निशमयेत्तिच॥अशेषात्तौवकल्पंस्यादपनयेत्ततःपरं॥कल्पयु
गमभवेन्मंत्रःपादप्रक्षालनेप्रिये॥यागस्थानंयथा॥ ॥फेत्कारीये॥एकलिंगेश्मशानेवाशून्या
गारेचतुष्पथे॥तत्रस्थःसाधयेद्योगीविद्यांत्रैभवतारिणीं॥पंचक्रोशांतरेयत्रनलिंगांतरमीक्षते॥
तदेकलिंगमाख्यातंतत्रास्मिन्सिद्धिरनुत्तमा॥तदुक्तंवीरतंत्रे॥शून्यागारेश्मशानेयदिजपतिजउस्सेकलिं
गेतटगेगंगागर्भेगिरौवाश्मशुचिविमलमतिःसर्वदाभक्तियुक्ता॥विद्यांश्रीनीलवाण्याभिखिलभुवप
तिःसर्वशास्त्रार्थवेत्तादद्दन्त्तेयोगमुख्याःपरमंशिवपदंब्रह्मनिर्वाणमेति॥नीलसारस्वतमंत्रोपल

स्पणं॥ तदुक्तमस्तोभ्यसंहितायां॥ वीरोगकालिकायोगास्तत्यन्त्रैवसमाचरेत्॥ योगाः प्रयोगाः॥ अ
न्यत्रापि॥ उज्जठेपर्वतेवापिनिर्जनेवान्यतुष्पथे॥ देवागारेदेवशून्येबिल्वमूलेनदीतटे॥ स्वगेहेनिर्जना 9
रामेतथाचाश्वत्थसन्निधौ॥ एषामन्यतमस्थानंसमाश्रित्यजपंचरेत्॥ ओंवज्रोदकेहुंफट्स्वाहाअने
नजलंसव्यंमानीयआसनमभ्युक्ष्यउपविश्य॥ ओंह्रींविशुद्धधर्मगात्री सर्वपापानिशामयअशे
ष[illegible]धिकल्प्यमपनयहूंहूंअनेनहस्तौपादौप्रक्ष्य॥ पूर्ववदाचम्यसामान्यार्घ्यंकृत्वागृहद्वारेप्रोक्ष्य
द्वारेस्थिताःपूजयेत्॥ तदुक्तंतंत्रांतरे॥ ततःआचमनंकृत्वासामान्यार्घ्यंनिवेदयेत्॥ त्रिकोणंवृत्तभूबि
बंमंडलंरेखयेत्ततः॥ आधारशक्तिंसंपूज्यतत्राधारंविनिक्षिपेत्॥ अस्त्रेणपात्रंसंप्रोक्ष्यह्रींमंत्रेण
प्रपूरयेत्॥ निक्षिपेत्तीर्थमावाह्यगंगादिप्रणवेनतु॥ दर्शयेद्धेनुमुद्रांवैसामान्यार्घ्यमिदंस्मृतं॥ सा
ह्लौं मान्यार्घ्येणदेवेशिप्रोक्षयेद्द्वारदेवतां॥ ॥धेनुमुद्रायथा॥ अन्योन्याभिमुखाश्लिष्टेकनिष्ठानामिके
पुनः॥ तथाचतर्जनीमध्याधेनुमुद्रामतप्रदा॥ द्वारदेवतास्तंत्रे॥ गणेन्द्रंक्षेत्रपालंचबटुकंयोगिनीं
ततः॥ गंगांचयमुनांचैवलक्ष्मींवाणींततोयजेत्॥ इतिसामान्यं॥ कुलचूडामणौविशेषमाह॥ ब्रा
ह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा॥ वाराहीचेंद्रीचामुंडामहालक्ष्मीतथैवच॥ कुलीनस्यद्वार
देवताः॥ कथितास्तवपुत्रक॥ कुमारीकल्पेपि॥ गंबीजाद्यंगणेशंचवामाद्यंवटुकंतथा॥ क्षामा
द्यंक्षेत्रपालंचयामाद्यांयोगिनीतथा॥ ऊर्ध्वेवामेदक्षिणेचअधःश्चैवप्रपूजयेत्॥ गमाद्यंपूजये
द्गंगांयमाद्यंयमुनांतथा॥ श्रीमाद्यांचमहालक्ष्मींसंमाद्यांचसरस्वतीं॥ पूजयेत्क्रमतःकोणचतुष्टु
सुसमाहितः॥ इति॥ ॥अथपूजाभेदो॥ द्वारोर्ध्वेगंगणेशायनमः॥ वामेक्षांक्षेत्रपालायनमः॥
दक्षिणेवांवटुकायनमः॥ अधःयांयोगिनीभ्योनमः॥ गंगंगायै॥ यंयमुनायै॥ श्रींलक्ष्म्यै॥ २॥

श्यामा सरस्वत्यै० २॥ इतिपूर्वादिकोणे॥ चतुष्टयेसंपूज्य॥ वामांगसंकोचेनग्रहंत्रविन्यस्य॥ नैर्ऋत्यांब्रह्मणे रहस्य
नमः॥ वास्तुपुरुषायनमः॥ इतिसंपूज्य सिद्धार्थांस्तिलतिलैर्भूतान्भूत्रासयेत्॥ तदुक्तंस्वतंत्रे॥ भूमि
व्योमस्थितान्सर्वान्विघ्नहेतून्सुरद्विषः॥ अपसर्पंतु॥ सिद्धार्थैस्तिलसंमिश्रैःप्रोत्सार्यआसनेवि
शेत्॥ अन्यत्रापि॥ भूतापसर्पणंकुर्यान्मंत्रेणानेनसाधकः॥ यस्मिन्स्थानेवसंतेभूताः स्थापयंतिसुरा
र्चने॥ स्थितेषुतत्रभूतेषुनैवेद्यंमंडलंतथा॥ विलुंपंतिसदालुब्धानदृश्यंतिचदेवताः॥ तस्मात्प्रयत्नेनक
र्त्तव्यंभूतानामपसारणं॥ कुमारीकल्पेपि॥ प्रणवंपूर्वमुद्धृत्यसर्वविघ्नांस्ततःपरं॥ उत्सारयततोहुंफट्
स्वाहांचतदनंतरं॥ अनेनैवचमंत्रेणविघ्नमुत्सारयेत्ततः॥ ओंसर्वविघ्नानुत्सारयहुंफट्स्वाहा॥ इत्यने
नसिद्धार्थास्ततिलैर्नाराचमुद्रयाभूतापसारणंकृत्वामुष्टिभिःसगजलेनभूमिशोधनंकुर्यात्॥
अनेनमंत्रेणओंरक्षरक्षहुंफट्स्वाहा॥ इतिभूमिंसंशोध्य॥ ओंपवित्रवज्रभूहुंफट्स्वाहा॥ अने
मभि नभूमिमंत्र्यासनंस्थापयेत्॥ तदुक्तंकुमारीकल्पे॥ प्रणवंपूर्वमुद्धृत्यरक्षरक्षततःपरं॥ हुंफट्स्वाहे
तिमंत्रेणभूमिंचपरिशोधयेत्॥ ततःपवित्रवज्रादौप्रणवंपूर्वमुद्धरेत्॥ चर्मेहृयंततश्चैवफट्स्वा
हातदनंतरं॥ अनेनैवचमंत्रेणकुर्याद्भूम्यभिमंत्रणं॥ ॥अथासनानियथा॥ तदुक्तंमत्स्यसूक्ते॥
मेद्यान्चूडकमासीनस्त्वान्येत्तुकोमलोपिवा॥ विशेच्चसमभाश्रित्यसाधयेत्सिद्धिमुत्तमां॥ मेद्यादि
लक्षणमाह॥ तत्रैव॥ अर्वाक्षण्मासतोगर्भेच्युतमाहुर्मेद्यंबुधाः॥ चूडोपनयनेहृनंमृतंचान्चूड
कंविदुः॥ निवृत्तचूडकोबालोहीनोपनयनःपुमान्॥ योमृतःपंचमेवर्षेतमेवकोमलंविदुः॥ स्वतं ६
त्रेच॥ कंबलोलोहितेवापिकृष्णमार्जारचर्मणि॥ सन्यासीब्रह्मचारीचकृष्णसारस्यचर्मणि॥
अन्यत्रापि॥ कृष्णसारंद्वीपिचर्मअन्यचूडकंबलंतथा॥ पीतवस्त्रंचशुक्लंवाआसनायप्रकल्पयेत्॥

॥ ॥विष्टरं यथा॥ प्रोतन्तु विस्तरं वापि अथवा कुंडलीकृतं॥ आसन फलं यामले॥ पृथ्व्यां दुःखसं १३१
तापं दारिद्र्यं दारुजासने॥ वस्त्रासने रोगशोकौ पाषाणे वलहानिदं॥ कृष्णाजिने धनं पुत्रं कुशेषु पौरु
षं जराः॥ काम्यार्थं कंबलं चैव अभीष्टस्तु कंबले इति॥ अत्र मेतासन मवश्य मेव तदकरणे प्रत्यवा
यश्रुतिः॥ तदुक्तं वीरतंत्रे॥ मृतासनं विनादेवि यो जपेत्कालिकां पुनः॥ तावत्कालं नारकी स्यात् यावदा
भूतसंप्लवं॥ यत्तु स्वतंत्रादौ केवलमासनमुक्तं॥ तत्तु न स्वतंत्रासनं किंतु शवरूपविष्टरमिति बोध
व्यं॥ तदुक्तं कालिकाकल्पे॥ मृताभावे विष्टरं च शवरूपं प्रकल्पयेदिति॥ अथ सुरेखवज्ररेखहुंफट्
स्वाहेति भूमौ त्रिकोणमंडलं कृत्वा तत्राधारशक्तिभ्यो नमः इति संपूज्य तत्र शवाभावे कंबलाद्यास
नं संस्थाप्य तदुपरि शवरूपं विष्टरं कृत्वा कृतांजलिः पठेत्॥ तदुक्तं तंत्रांतरे॥ भूमौ त्रिकोणमालि
ख्य आधारशक्त्यादिपूजनं॥ मेरुपृष्ठ ऋषिः प्रोक्तः सुतलं छंद ईरितं॥ कूर्मोत्र देवता चैव आसनारो १
पणाश्रये॥ विनियोगश्च कथितः पठेद्ध्यासनं तथा॥ पृथ्वि त्वया धृता॥ इति धृत्वा तु देवेशि कुर्यात्त
त्रैव दापयेत्॥ मायाबीजं समुच्चार्य आधारशक्तिमुच्चरेत्॥ कमलासनमालिख्य नमोंतं च प्रपूज
येत्॥ कुमारीकल्पेपि॥ ओंकारांतं सुरेख्य वज्ररेख ततः परं॥ हुंफट् स्वाहेति च कुर्यान्मंडलं तु श
वासने॥ वीरासनेनोपविश्य संपूज्यासनमेव च॥ एवं विधिना आसनं संस्थाप्य पद्मस्वस्तिकवी
रासनेनासने उपविश्य॥ कामाख्यामुखो विजयां स्वीकुर्यात्॥ तदुक्तं भावचूडामणौ॥ विनाहि तुक
मास्वाद्य यो भक्तो महेश्वरः न पूजां मम कुर्यात्स न ध्यानं विधिचिंतनं॥ तस्मात्कृत्वा पीत्वा च पूज
येत्परमेश्वरीं॥ विजयाकल्पेपि॥ संविद्सवयोर्मध्ये संविद्देवी गरीयसि॥ संवित्त्रयोगस्तेनादौ पूज्या
याः साधकोत्तमैः॥ कर्तव्या च महापूजा कारणी यासु निंदितेति॥ अन्यत्रापि॥ अनंदेन विना भ्रंशो॥

यामा नयत्यंतिदेवताः॥ इतितस्मात्प्रज्ञादोऽवश्यं। विजयास्वीकारः॥ सा पुनश्चतुर्धा॥ ब्राह्मणी रहस्य
क्षत्रियावैश्याशूद्राभेदेषु रक्तपीतकृष्णपुष्पभेदात्॥ तासांशुद्धिक्रमोलिख्यते॥ तदुक्तंविज
याकल्पे॥ संविद्ब्रह्मसंभूते ब्रह्मपुत्री सदानघे॥ भैरवाणांचदत्तात्वं पवित्राभवसर्वदा॥ ओं ब्राह्म
ण्यैनमःस्वाहा इतिमंत्रेणशोधयेत्॥ सिद्धिमूली ह्रीं येदेविहीनबोधप्रबोधिनी॥ राजप्रजावशंकं
री शत्रुकंठनिसूदिनी॥ ऐं क्षत्रियायैनमःस्वाहा॥ अज्ञानेंधनदीप्ताग्ने ज्वालाग्ने ज्ञानरूपिणी॥
आनंदस्याहुतिंसम्यक् ज्ञानेदेवि प्रयच्छमे॥ ह्रीं वैश्यायैनमःस्वाहा॥ नमस्यामि नमस्यामि यो
गमार्गप्रदर्शिनी॥ त्रैलोक्यविजयेमातः समाधिफलदा भव॥ क्लीं शूद्रायैनमःस्वाहा॥ कथितं
मंत्रमुत्तमं॥ ओं अमृते अमृतोद्भवे अमृतवर्षिणिपदं ततः॥ अमृतमाकर्षयद्वंद्वं सिद्धिं देहि ततःपरं॥
अमुकं मे ततो ब्रूयाद्वशमानय तत्परं॥ द्विठान्तोयंमनुःप्रोक्तश्चातिसंजीवनो धने॥ अन्यतंत्रे॥ मूल १
मंत्रंसप्तवारं तस्योपरि नियोजयेत्॥ आवाहनादिमुद्राश्चधेनुयोनी ततःपरं॥ दिग्बंधः छोटिकाभिश्च
तालत्रयपुरःसरं॥ दिव्यदृष्ट्या तथा पार्ष्णिघातैर्विघ्नान्विघातयेत्॥ सप्तधा तर्पयेद्ब्रह्मरंध्रे मूलंजपेन्म
नुं॥ गुरुपद्मसहस्रारे तथा संकेतमुद्रया॥ एवंविधिना विजयास्वीकृत्यानंदमयोभूत्वा वामकर्णोर्ध्वे
श्रीअमुकानंदनाथश्रीगुरुपादुकाभ्यां नमः॥ दक्षिणकर्णोर्ध्वे गंगणपतयेनमः॥ मध्येइष्टदेव्यैनमः
इतिनमस्कृत्यपूर्ववत्सामान्यार्घ्यंकृत्वा तेनोदकेन पूजोपकरणं वाभ्युक्ष्य स्वदक्षिणे गंधपुष्पादिकं
वामेसुगंधिजलं। देवतायाः पश्चिमेकुलद्रव्याणि अन्यत्सर्वं च वामेधारयेत्॥ तदुक्तंकुलचूडाम ७
णौ॥ कुलासनं ततः क्षिप्त्वा तदभ्यर्च्य यथासुखं॥ कुलासनं ततो बध्वा गुरुपूजाक्रमेण तु॥ आत्मशुद्धिं भू
तशुद्धिं देहशुद्ध्यादिभिश्च॥ कृत्वार्घ्यं ततो विद्वान्कुर्यात्कुलविवेष्टितं॥ दीक्षिताभिः कुलीनाभिः युव

तीभिः कुलात्मभिः॥ देवतागुरुभक्ताभिः संचितं यागभूमिषु॥ नानाविधानि पुष्पाणि गंधानि विविधा
नि च॥ कर्पूरजातीधूपाद्यैर्वासितं परवासितं॥ तांबूलं देवद्रव्यं च धूपदीपादिकं चयत्॥ सर्वालंकारभूषा
भिः भूषितः कौलिकेश्वरः॥ मूलमंत्रं जपस्तोयैः प्रोक्षितं स्थापयेत्ततः॥ सर्वेस्वदक्षिणे स्थाप्य वामेऽन्या
र्घं निवेदयेत्॥ पश्चिमे देवतायाश्च कुलद्रव्याणि धारयेत्॥ पश्चिमे पल्लवं नद्यर्थं॥ नादिकापुरतो॥ प्रथ
मां पश्चतो द्वारान्यत्सर्वं च वामतः॥ कुलातो॥ आत्मस्थानमंत्रद्रव्यदेवशुद्धिं च पंचमं॥ यावन्न कु
र्यादेवी तावद्देवार्चनं कृतः॥ पंचशुद्धिं विना पूजा अभिचाराय कल्प्यते॥ सुस्नातैर्भूतशुद्धिश्च प्राणायामा
दिभिः प्रिये॥ षडंगाद्याखिलं न्यासैरात्मशुद्धिरितीरिता॥ संमार्जनानुलेपाद्यैर्दर्पणोदरवच्छुभान्॥ वितान
धूपदीपाद्यैः पुष्पमालाभिः शोभितं॥ पंचवर्णरजोभिश्च स्थानशुद्धिरितीरिता॥ ग्रथयित्वा मातृकार्णैर्भू
तमंत्राक्षराणि च॥ क्रमोत्क्रमाद्द्विरावृत्या मंत्रशुद्धिरितीरिता॥ पूजाद्रव्याणि मूलास्त्रैः संशोध्य च विधानतः।
दर्शयेद्धेनुमुद्रादि द्रव्यशुद्धिरितीरिता॥ पीठस्थां प्रतिष्ठाप्य स्वात्मकलीरूपमंत्रवित्॥ मूलमंत्रेण दीपात्माम
भिभाव्यार्दकेन च॥ त्रिवारं प्रोक्षयेद्विद्वान् देवशुद्धिरितीरिता॥ पंचशुद्धिं विधायेत्थं पश्चाद्यजनमाचरेत्॥
पंचशुद्धिविहीनेन यत्कृतं न च तत्कृतं॥ पंचशुद्धिं विना पूजा अभिचाराय कल्प्यते॥ कुमारीकल्पेऽपि
अधिष्ठाने तु पुष्पस्य प्रणवं पूर्वमुच्चरेत्॥ ज्ञाताभिषेको तयं संभयाश्रिय पदं ततः॥ समाश्रयेपदं चै
व्य हुं फट् स्वाहा ततः परं॥ अनेन मनुना देव्याः पुष्पाधिष्ठानमाचरेत्॥ प्रणवं पुष्पकेतुं च राजार्हेति प
दं ततः॥ राताय सम्यगिस्युत्कासम्भ आय ततः परं॥ ओं पुष्पपुष्पे महापुष्पे सुपुष्पे पुष्पसंभवे॥ पुष्प
चयावकीर्णे च हुं फट् स्वाहा ततः परं॥ विसृज्य पुष्पमेतेन ज्ञानं पूर्ववदाहरेत्॥ अर्घ्यं वामपार्श्वे निधा
तत्रयं भूमौ दत्वा भौमान्विघ्नान्निरस्य तर्जनीमध्यमाभ्यां ऊर्ध्वाधोधस्तत्तालत्रयं दत्वा अंतरिक्षान्

यामा विघ्नान्निरस्यतर्जन्यंगुष्ठयोगेनछोटिकाभिर्दशदिग्बंधनंकृत्वा दिव्यदृष्ट्यादिव्यविघ्नान्निरस्यच रहस्य
तुर्दिक्षुवह्निप्राकारंविचिंत्यप्राणायामत्रयंकुर्यात्॥[illegible]तंत्रे॥पार्ष्णिघातकरास्फोटसमुद्भूतैर्दि
तध्वनिकैः॥तालत्रयंमथोदद्यात्सशब्दंसंप्रदायतः॥ऋतुचंद्रैर्नेत्रैर्येर्रसैर्वेदाधिकप्रिये॥मंत्राभिःप्रण
वंजप्त्वापूररेचककुंभकैः॥ ॥कुंभकांतःप्राणायामस्तुरेचकान्तोवानत्वस्यानांयतीनांवानस्थः॥अ
न्येषांरेचकांतः॥तदाह॥कालीक्रमेमनोजोवामनोशुद्धिःप्राणायामेनजायते॥कालीतंत्रेपि॥प्राणा
यामत्रयंकुर्यान्मूलेनप्रणवेनवा॥ज्ञानार्णवेपि॥कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणं॥मंत्राभिः
प्रणवंजप्त्वापूरकुंभकरेचकैः॥प्राणायामःसविज्ञेयस्तर्जनीमध्यमेविना॥मंत्रलक्षणंमालिनीतंत्रे॥
कनिष्ठामूलतोतर्जन्यामूलांतंयुगपत्स्पृशेत्॥वामांगुष्ठेनमात्रायाःलक्षणंपरिकीर्तितं॥ब्रह्ममात्रासंमो
हनतंत्रे॥जानुंप्रदक्षिणीकृत्यनद्रुतंनविलंबितं॥कारयेच्छोंगुलिस्फोटंसामात्रापरिकीर्तिता॥स्वच्छंद
संग्रहे॥ह्रस्वस्योच्चारकालेमात्राइत्यभिधीयते॥इति॥प्राणायामत्रयंकृत्वाभूतशुद्धिंततश्चरेत्॥अ
न्यत्रापि॥मनोजोवामनोशुद्धिःप्राणायामेनजायते॥तत्रायंक्रमः॥मूलाधारेमनःसंयोज्यदक्षांगु
ष्ठेनदक्षिणनासापुटंधृत्वामूलंप्रणवंवाषोडशवारंजपन्॥वामेनवायुमापूर्यकनिष्ठानामिकाभ्यां
वामनासापुटंधृत्वातमेवचतुःषष्टिवारंजपन्वायुंकुंभयित्वापुनर्द्वात्रिंशद्वारंजपन्वायुंरेचयेत्॥एवं
क्रमेणवारत्रयंकृतेएकःप्राणायामोभवति॥एवंवारत्रयंकुर्यादिति॥ ॥अथभूतशुद्धिः॥मूलाधा
रात्कुंडलिनींहंसइतिमंत्रेणपृथिव्यासहस्वाधिष्ठानेसमानीयतत्रस्थजलेपृथिवींलीनांविभाव्यतस्मा
ज्जलेनसहमणिपूरेसमानीयतत्रस्याग्नौजलंलीनंविभाव्यतस्मादग्निनासहअनाहतेआनीयतत्र
स्थवायोअग्निंलीनंविभाव्य॥तस्माद्वायुनासहविशुद्धेआनीयतत्रस्थाकाशेवायुंलीनंविचिंत्य॥

तस्मादाकाशेन सह अहंत्वं के समानीय तत्रस्थमनस्याकाशं विलीनं कृत्वा मनो नादे विलीनं विभा
व्य ध्वनौ ध्वनिं समर्प्य॥ ततः सहस्रदलकमलकर्णिकास्थचंद्रमंडलमध्यगतत्रिकोणांतर्गतं बिंदुरूप
परमशिवे समर्प्य प्राणायामविधिना यमिति वायुबीजं धूम्रवर्णं षोडशवारं जपं जपन्॥ शरीरं संशो
ष्य॥ रमिति वन्हिबीजं रक्तवर्णं चतुःषष्टिवारं जपन् शरीरं संदह्य॥ वमिति वरुणबीजं शुक्लवर्णं सहस्रा
रे विचिंत्य द्वात्रिंशद्वारं जपन्॥ तदुद्भवामृतवृष्ट्या निष्पापं शरीरमुत्पाद्य [illegible] ललाटस्थं लमिति पृथ्वीबीजेन
पीतवर्णेन शरीरं सुदृढीकृत्वा सोहमिति मंत्रेण कुंडलिनीं अमृतलोलीभूतां पंचभूतानि जीवात्मानं च
ब्रह्मपथा स्वस्वस्थाने नियोजयेत्॥ ततो देवीरूपमात्मानं विभाव्य तद्देहे जीवन्यासं कुर्यात्॥ ओं आं ह्रीं
क्रों हंसः श्रीदक्षिणाकालिकायाः प्राण इह प्राणाः॥ ओं०५ अमुष्या जीव इह स्थितः॥ ओं०५ अमुष्याः स
र्वेंद्रियाणि॥ ओं०५ अमुष्याः वाङ्मनश्चक्षुःश्रोत्रजिव्हाघ्राणप्राणापाना इहागत्य सुखं चिरं तिष्ठंतु
स्वाहा॥ इति जीवं न्यसेत्॥ तदुक्तं स्वतंत्रे॥ संहारक्रमयोगेन पंचतत्त्वं समुद्धरेत्॥ शोषदाहप्लावान्कृ
त्वा वाग्मि सलिलाक्षरैः॥ ततो न्यासं प्रकुर्वीत फेत्कारीतंत्र ईरितं॥ अन्यत्रापि॥ देवीरूपं ततो ध्या
येदात्मानं कमलेक्षणे॥ ततो जीवं प्रविन्यस्य पाशाद्यक्षरेण तु॥ प्राणमंत्रेण युक्तेन ततो मुष्या पदं
ततः॥ प्राणा इति वदेत्पश्चादिह प्राणास्ततः परं॥ अमुष्या जीव इह स्थितो मुष्याः पदं ततः॥ सर्वें
द्रियाण्यमुष्याश्च वाङ्मनो नयनादि च॥ श्रोत्रघ्राणपदं प्राण इहागत्य सुखं चिरं॥ तिष्ठंतु वन्हि
जायांतः प्राणमंत्रोयमीरितः॥ प्रकारांतरं च ज्ञानार्णवे॥ विपरीतं प्राणमंत्रं विलिखेत्साध्यपूर्वकं॥
प्राणप्रतिष्ठामंत्रोयं सर्वकार्याणि साधयेत्॥ अस्य मंत्रस्यांते अमुष्या इति॥ बोद्धव्यं॥ अमुष्यास्था
ने साध्यदेवतायाः षष्ठ्यंतं नाम प्रयोक्तव्यं॥ तदुक्तं नारायणीये॥ अमुष्येति पदं यत्र यत्र मंत्रेषु दृश्यते॥

साध्यापिधानंतद्रूपंतत्रस्थानेनियोजयेत्॥ कुमारीकल्पेपि॥ भूतशुद्धिंविधायाथदेवीरूपेणचिं
तयेत्॥ प्रणवंपूर्वमुद्धृत्यश्रोषंलांगलमेवच॥ हुंफट्स्वाहामनुप्रोक्तःकायवाक्चित्तशोधने॥ प्रणवं
पूर्वमुद्धृत्यचात्मानंरक्षइत्यपि॥ रक्षहुंफट्ततःस्वाहामंत्रस्यादात्मरक्षणे॥ एवंभूतशुद्धिंकृत्वा॥ ओंआं
हुंफट्स्वाहाअनेनमंत्रेणकायवाक्चित्तानिसंशोध्य॥ ओंआत्मानंरक्षरक्षहुंफट्स्वाहेतिहृदीहस्तंद
त्वात्मरक्षांविधायस्ववामेशक्तिंसंस्थाप्यप्राणायामादिकंकुर्यात्॥ तदुक्तंकुमारिकाकल्पे॥ ततः
षोडशवर्षीयांनारीमानीयमंत्रवित्॥ युवतींचमदाक्रांतांसुवेशांचारुहासिनीं॥ सदारतेःसाभि
लाषांसिंदूरांकितभालकां॥ साधकःश्रेयसस्तन्वीवामेसंस्थापयेद्बुधः॥ तस्यास्तुभूतशुद्ध्यादि
न्कृत्वाचैवमातृकान्यसेत्॥ प्राणायामंततःकृत्वाकार्यंत्वाद्ययाविधीति॥ अथऋष्यादीन्यासः॥
यथा॥ कृतांजलिः॥ ॥अस्यमंत्रस्यभैरवऋषिःउष्णिक्छंदःश्रीदक्षिणकालिकादेवताह्रींबी
जंहूंशक्तिःक्रींकीलकंचतुर्वर्गसिध्यर्थेविनियोगः॥ इतिपुष्पेनकायनवाचेनमनसावान्यसेत्॥ भैर
वायऋषयेनमःशिरसि॥ उष्णिक्छंदसेनमःमुखे॥ श्रीदक्षिणाकालिकायैनमोहृदि॥ ह्रींबीजाय
नमोगुह्ये॥ हूंशक्तयेनमःपादयोः॥ क्रींकीलकायनमः॥ तदुक्तंकालिकातंत्रे॥ भैरवोस्यऋषिः
प्रोक्तउष्णिक्छंदमुदाहृतं॥ देवताकालिकाप्रोक्तालज्जाबीजंतथैवच॥ शक्तिस्तुकूर्चबीजस्या
दानंदसरस्वती॥ कवित्वार्थेविनियोगएवमृष्यादिकल्पना॥ बीजकंचाद्यबीजंतुक्रमेणवि
न्यसेत्प्रिये॥ ऋषिंन्यसेन्मूर्ध्निदेशेछंदस्तुमुखपंकजे॥ देवतांहृदयेचैवबीजंतुगुह्यदेशके॥ २
शक्तिस्तुपादयोश्चैवसर्वांगेकीलकंन्यसेत्॥ अथकरांगन्यासोयथा॥ ओंक्रांअंगुष्ठाभ्यांनमः
अंगुष्ठयोः॥ ओंक्रींतर्जनीभ्यांनमःस्वाहातर्जन्योः॥ ओंक्रूंमध्यमाभ्यांवषट्मध्यमयोः॥ ओंक्रैंअं

नामिकाभ्यांहुंअनामिकयोः॥ओंक्रैंकनिष्ठिकाभ्यांवौषट्कनिष्ठिकयोः॥ओंक्रःकरतलकरपृ
ष्ठाभ्यांफट्करतलकरपृष्ठयोः॥ओंक्रांहृदयायनमोहृदि॥ओंक्रींतर्जनीमध्यमानामाभिः॥क्रींशि
रसेस्वाहातर्जनीमध्यमाभ्यां॥ओंक्रूंशिखायैवषट्शिखायांमुष्टिबद्धेनाधोमुखेनांगुष्ठेन॥ओंक्रैंक
वचायहुंकवचेहस्ताभ्यामंगुलीभिः॥ओंक्रौंनेत्रत्रयायवौषट्नेत्रत्रयेतर्जनीमध्यमानामिकाभिः॥
ओंक्रःअस्त्रायफट्तर्जनीमध्यमाभ्यांऊर्ध्वाधोधस्तालत्रयंदत्वादशदिग्बंधनंछोटिकाभिःकुर्यात्॥
इतिकरांगन्यासौ॥तदुक्तंवीरतंत्रे॥दीर्घषट्कयुताद्येनप्रणवाद्येनकल्पयेत्॥विशेषोयथाकालि
कातंत्रे॥हृदयायनमःप्रोक्तंशिरसेवह्निवल्लभा॥शिखायैवषडित्युक्तंकवचायहुमीरितं॥नेत्रत्रया
यवौषट्स्यादस्त्रायफट्प्रकीर्तितं॥प्रण॥स्वतंत्रेपि॥प्रणवंचाद्यबीजंचषट्दीर्घस्वरभाजितं॥कुर्या
त्षडंगविन्यासंमूलषडक्षरेणवा॥एवंविधिनात्रिसकृद्वामूलत्रिखंडद्विरावृत्त्यावाषडंगन्यासंकुर्यात्॥
तदुक्तंभैरवतंत्रे॥षडंगानिन्यसेन्मंत्रीत्रिःसकृद्वायथाक्रमं॥अथवर्णन्यासोयथा॥अंआंइंईंउंऊंऋं
ॠंलृंलॄंएंऐंओंऔंअंअः॥इतिस्वराःअस्यन्यासेविभागः॥अंआंइंईंउंऊंऋंॠंलृंलॄंनमोहृदयेन्यसे
त्॥एंऐंओंऔंअंअःकंखंगंघंनमोदक्षभुजे॥ङंचंछंजंझंञंटंठंडंढंनमोवामभुजे॥णंतंथंदंधंनं
पंफंबंभंनमोदक्षजंघायां॥मंयंरंलंवंशंषंसंहंक्षंनमोवामजंघायां॥तदुक्तंकालिकातंत्रे॥एवं
यथाविधिन्यस्यवर्णन्यासंसमाचरेत्॥वर्णन्यासंप्रवक्ष्यामियेनदेवीमयोभवेत्॥अंआंइंईंउंऊं
ऋंॠंलृंलॄंयैहृदयेन्यसेत्॥एंऐंओंऔंअंअःकंखंगंघंवर्णपुनस्ततः॥उत्सेरेद्दक्षिणभुजेस्पष्टो
साधकसत्तमः॥ङंचंछंजंझंञंटंठंडंढंचापितथापुनः॥वामभुजेन्यस्यणंतंथंदंपुनःस्मरेत्॥
धंनंपंफंबंभंमितिदक्षिणजंघकेन्यसेत्॥मंयंरंलंवंशंषंसंहंक्षंवामपदेन्यसेत्॥ततोमातृकान्या

संकृत्वाश्रीकंठन्यासंकुर्यात्॥तदुक्तंस्वतंत्रे॥आदौतुमातृकान्यासस्ततःश्रीकंठउच्यते॥मातृकान्या
सोयथा॥ऋषिर्ब्रह्माभवेच्छंदोगायत्रीमातृका पुनः॥देवताव्यंजनंबीजंशक्तयस्तुस्वराःस्मृताः॥अव्यक्तंकी
लकंज्ञेयंन्यसेदुत्क्रमेणतु॥उत्क्रमेणपूर्वोक्तऋष्यादिक्रमेणेत्यर्थः॥षडंगंमातृकायास्तुसाधकः
कारयेत्ततः॥स्वराणांक्लीबहीनानांसबिंदूनांक्रमेणतु॥युग्मयुग्मांतरालेनपंचवर्गंसबिंदुकं॥निक्षिप
द्याद्विवर्गांतःशेषवर्णांतरात्मके॥क्लीबहीनानामिति॥ऋॠऌॡरहितानामित्यर्थः॥एवंविधिना
मातृकाषडंगंकृत्वाध्यायेत्॥ध्यायेत्तांतारकूपांसकललिपिमयींलोचनांभोजयुग्मांमुक्ताऽलंकारभूषां
शशिमुकुटजटाटोपमुक्तांप्रसन्नां॥पुस्तकस्रक्पूर्णकुंभान्वरमपिदधतींमुक्तिदांबराढ्यंवाग्देवींप
श्यवक्त्रांकुचभरनमितांचिंतयेत्साधकेंद्रः॥एवंध्यात्वाअकारादिक्षकारांतंन्यसेत्॥यथा॥ललाट
मुखवृत्ताक्षिश्रुतिघ्राणेषुगंडयोः॥ओष्ठदंतोत्तमांगास्यदोःपत्संध्यग्रकेषुच॥पार्श्वयोःपृष्ठतोना
भौजठरेहृदयेंऽसके॥ककुद्यंसेचहृत्पूर्वंहस्तपादयुगेषुच॥जठराननयोर्न्यस्येन्मातृकांतांयथाक्रमात्॥
तत्रप्रयोगः॥अंनमोललाटे॥आंनमोमुखवृत्ते॥एवंक्रमेणमकारांतंविन्यस्य॥यंत्वगात्मनेनमः॥
रंअसृगात्मनेनमः॥लंमांसात्मनेनमः॥वंमेदात्मनेनमः॥शंअस्थ्यात्मनेनमः॥षंमज्जात्मनेनमः॥
संशुक्रात्मनेनमः॥हंप्राणात्मनेनमः॥ळंजीवात्मनेनमः॥क्षंपरमात्मनेनमः॥इतिविन्यसेत्॥पंचा
शद्वर्णन्यासः॥क्रमेणैवप्रकाशितः॥ओंमाद्यंतोनमोंतोवासबिंदुर्बिंदुवर्जितः॥मायालक्ष्मीबीज
पूर्वोन्यस्तव्योमातृकाक्षरैः॥मातृकान्यासमुद्रायथा॥ललाटेनामिकामध्येविन्यसेन्मुखवृत्तके॥ १०
तर्जनीमध्यमानामान्यसेच्चनेत्रयुग्मयोः॥अनामांगुष्ठयोगेनन्यस्यकर्णयोर्न्यसेत्॥कनिष्ठांगुष्ठ
योगेननासापुटद्वयोस्ततः॥मध्यमांत्तिस्रोगंडयोश्चमध्यमामोष्ठयोर्न्यसेत्॥अनामांदंतयोर्न्यस्येन्मध्यमामु

त्तमांगके ॥ मुखेनामां मध्यमां च हस्ते पादे च पार्श्वयोः ॥ कनिष्ठानामिकामध्यास्तासु पृष्ठे च विन्यसेत् ॥
तासांगुष्ठानामिदेशे सर्वांकुशेन विन्यसेत् ॥ हृदये च तले सर्वा अंसयोश्च ककुस्थले ॥ हृत्पूर्वहस्तया कुक्षि
मुखेषु तलमेव च ॥ एतास्तु मातृकामुद्राः क्रमेण परिकीर्तिताः ॥ अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य
निःफला ॥ अथ श्रीकंठन्यासो यथा ॥ विन्यसेन्मातृकास्थाने श्रीकंठादीन्यथाक्रमं ॥ पूर्णोदर्यादिभिः
सार्धं मातृकार्णसमन्वितान् ॥ मूर्तिनामशक्तिनाम पृथग्गेतं च कारयेत् ॥ श्रीकंठानंतसूक्ष्माश्च त्रिमूर्ति
रमरेश्वरः ॥ अर्घीशो भारभूतिश्च अतिथिः स्थाणुको हरः ॥ झिंटीशो भौतिकः सद्योजातश्चानुग्रहेश्व
रः ॥ अक्रूरश्च महासेनः षोडशस्वरमूर्तयः ॥ पश्चात्क्रोधीशचंडीशौ पंचांतकशिवोत्तमाः ॥ तथैकरु
द्रकूर्मैकनेत्रेशाश्चतुराननः ॥ अजेशः शर्वसोमेशौ स्तथा लांगलिदारुकौ ॥ अर्धनारीश्वरश्चोमाकां
तश्चाषाढिदंडिनौ ॥ अत्रीशो मीनमेषाख्यौ लोहितश्च शिखी तथा ॥ छगलंडद्विरंडेशौ महाकालक
पालिनौ ॥ भुजंगेशः पिनाकीशो खड्गीशाख्यो बकस्तथा ॥ श्वेतभृग्वीशनकुलीशिवाः संवर्तकस्त
था ॥ एते रुद्राः स्मृतास्तत्र ध्वतमूलककपालिकाः ॥ पूर्णोदरी स्याद्विरजा शाल्मली तदनंतरं ॥ लोलाक्षी व
र्तुलाक्षी च दीर्घघोणा समीरिता ॥ सुदीर्घमुखी गोमुख्यौ दीर्घजिह्वा तथैव च ॥ कुंडोदर्यूर्ध्वकेशी
च तथा विकृतमुख्यपि ॥ ज्वालामुखी ततो ज्ञेया पश्चादुल्कामुखी तथा ॥ सुश्रीमुखी विद्यामुख्या
वेताश्च स्वरशक्तयः ॥ महाकाली सरस्वत्यौ सर्वसिद्धिस्तथैव च ॥ गौरी त्रिलोक्या विद्या स्यान्मंत्रश
क्तिस्ततः परं ॥ आत्मशक्तिर्भूतमाता तथा लंबोदरी मता ॥ द्राविणी नागरी भूयः खेचरी चैव मंजरी ॥
रूपिणी वीरिणी पश्चात्काकोदर्यपि पूतना ॥ स्याद्भद्रकालियोगिन्यौ शंखिनी गर्जिनी तथा ॥ स्यात्काल
रात्रिकुब्जिन्यौ कपर्दिन्यपि वज्रिणी ॥ जया च सुमुखेश्वर्यौ रेवती माधवी ततः ॥ वारुणी वायवी प्रोक्ता

यामा पश्चाद्रक्षोविदारिणी॥ ततश्चस्वच्छजालक्ष्मीव्यापिनी मायया‌न्विता॥ एताःरुद्रांकपीठस्यासिंदूरारुणवि रहस्य
[illegible]ग्रहा॥रक्तोत्पलकपालाभ्यामलंकृतकरांबुजा॥ ॥अथप्रयोगः॥श्रीकंठपूर्णोदरीभ्यांनमोललाटे॥
अंअनंतविरजाभ्यांनमोमुखवृत्ते॥ एवंक्रमेणमातृकास्थानेषुन्यसेत्॥ ॥अथषोढान्यासः॥तदु
क्तंवीरतंत्रे॥ केवलांमातृकांकृत्वा मातृकांतारसंपुटां॥ मातृकापुटितंतारंन्यसेत्साधकसत्तमः॥ श्री
बीजपुटितांतांतु मातृकापुटितंतुतत्॥ कामेनपुटितांदेवींपुनस्तत्पुटितंन्यसेत्॥ तथाशक्त्यासंपुटि
तांशक्तिंचतत्पुटांन्यसेत्॥ बीजंहृद्बीजंपुनर्न्यस्त्वाऽंकंखंगंघंङंचपूर्ववत्॥ अनुलोमविलोमेनन्यस्त्वामं
त्रंयथाविधिः॥ मूलेनाष्टशतंकुर्याद्व्यापकंतदनंतरं॥ इतिगुप्तेनदुर्गायाअंगषोढाप्रकीर्तिता॥ तारा
याःकालिकायाश्चउग्रमुख्याश्चतथापरा॥ कृतेस्मिन्न्यासवर्येथसर्वपापप्रणश्यति॥ विषापमृत्यु
हरणोग्रहरोगविनाशनः॥ दुष्टाःसर्वेविनश्यंतिशत्रवोयांतिमित्रतां॥ कविताल्लहरीतस्यद्राक्षारस
परंपरा॥ अणिमाद्यष्टसिद्धिस्तुतस्यहस्तेव्यवस्थिता॥ कायिकंवाचिकंचापि मानसंयत्त्रदुष्कृतं॥ सर्वंत
स्यविनाशंयातिन्यासस्यचिंतनात्॥ अपमृत्युक्षयंयातियत्किंचिदुपपातकं॥ यद्रूपंक्ष्यतेतेनसत्त्व
रूपंगच्छति॥ यंनमंतिमहादेवीषोढापुटितविग्रहा॥ अल्पायुःसभवेत्तस्यदेवताकंपतेभिया॥ ॥अ
थतत्त्वन्यासोयथा॥ मूलाद्यखंडंतेआत्मतत्त्वायस्वाहा॥ नमपादादिनाभिपर्यंतंन्यसेत्॥ द्वितीयखं
डांतेविद्यातत्त्वायस्वाहानमोनाभ्यादिहृदयांतं॥ तृतीयखंडांतेनशिवतत्त्वायस्वाहानमःहृदयादि
शिरःपर्यंतं॥ तदुक्तंस्वतंत्रे॥ आत्मविद्याशिवैस्तत्त्वैस्तत्त्वंन्यासंसमाचरेत्॥ ३ ॥अथबीजन्यासोय ११
थाकुमारीकल्पे॥ ब्रह्मरंध्रेभ्रुवोर्मध्येललाटेनाभिहृद्याके॥ गुह्यवक्त्रेचसर्वांगेसप्तबीजक्रमान्न्यसे
त्॥ ॥अथप्रयोगः॥आद्यबीजंब्रह्मरंध्रेद्वितीयंभ्रुवोर्मध्येतृतीयंललाटेचतुर्थंनाभौपंचमंगुह्ये

षष्ठंवक्रेसप्तमंसर्वांगे॥ततोमूलमंत्रेणनवधासप्तधापंचधावाव्यापकंन्यसेत्॥तदुक्तंभैरवतंत्रे॥
पंचधानवधावापिमूलेनसप्तधातथा॥स्वतंत्रेपि॥मूलेनवधान्यासंव्यापकंपंचधापिवा॥कुमारीतं
त्रेपि॥पीठन्यासंततःकुर्यादाधारशक्तिपूर्वकं॥प्रकृतिंकमठंचैवेत्यादि॥ ॥इतिश्रीपूर्णानंदपरम
हंसविरचितेश्यामारहस्येग्रंथेप्रथमपरिच्छेदः॥ ॥अथांतर्यजनं।विमलेश्व
रतंत्रे॥अथांतर्यजनंवक्ष्येदृष्टादृष्टफलप्रदं॥गुरोर्ध्यानंप्रकुर्वीततयथापूर्वंविन्यासधीः॥स्नायात्त्र
विमलेतीर्थेपुष्करेहृदयाश्रिते॥बिंदुतीर्थेथवास्नायात्पुनर्जन्मनविद्यते॥अथवा॥इडासुषुम्नेशि
वतीर्थेकेस्मिन्ज्ञानांबुपूर्णेवहतःशरीरे॥ब्रह्मांबुभिःस्नातितयोःसदायःकिंतस्यगांगैरपिपुष्क
रैर्वा॥इतिस्नानं॥ ॥शिवशक्त्योःसमावेशोयस्मिन्कालेप्रजायते॥सासंध्याकुलनिष्ठानांस
माधिस्थैःप्रतीयते॥इतिसंध्योपासनं॥ ॥अथमूलाधारात्कुंडलिनींसोमसूर्याग्निरूपिणीं॥उ
त्थाप्यपरबिंदूर्मिभिर्घदेहदेवतांतर्पयेत्॥तदुक्तं॥चंद्रार्कानलसंघट्टादुद्गलितंयत्परामृतं॥तेनामृतेन
दिव्येनतर्पयेत्स्वरदेवतां॥याकिनीहाकिनीडाकिनीराकिनीलाकिनीकाकिनीशाकिनी॥इतितर्प
णं॥ ॥ब्रह्मरंध्राद्धोभागेचंद्रपात्रमुत्तमं॥कालासारेणसंपूर्यतर्पयेत्तनखेचरीं॥इतिअ
र्घ्यदानं॥ ॥आधारेलिंगनाभौप्रकटितहृदयेतालुमूलेललाटेद्वेपत्रेषोडशारेद्विदशदशदलद्वा
दशार्धेचतुष्के॥वासांतेबालमध्येडफकठसहितेकंठदेशेस्वराणांहंक्षंतत्वार्थयुक्तंसकलदल कोदंड
गतंवर्णरूपंनमामि॥कोदंडमध्येन्यसतुविमलधीर्न्यासपंक्तिस्तुसिद्ध्यै॥इतिमातृकावर्णान्षट्
चक्रस्थक्रमेणध्यायेदित्यंतरमातृकायामले॥आधारस्तुचतुर्दलोरुणरुचिर्वासांतवर्णाश्रया
स्वाधिष्ठानमपेक्ष्यवैद्युतनिभांबालांतषट्पत्रकं॥रक्ताभंमणिपूरकंदशदलंडादिफकारांतकं

वर्णैर्द्वादशभिस्त्वनाहतमथो हृन्मंत्रविद्विषट्स्वरमात्राभिः॥ खचितद्विरष्टदलयुक्पाठांतरे॥ पीयू
षैःस्रगतं भूमध्य वस्तुआरव्यकं॥ हंसः अक्षरसंयुतं युगदलं रत्नोपमाथापुरं॥ तस्मादूर्ध्वमघोमुखं
निगदितं पद्मं सहस्रच्छदं नित्यानंदमयी सदाशिवपुरं शक्तिं नमः कौलिकी॥ ॥अथ षडंगन्यासं कु
र्यात्॥ तदुक्तं गौतमीये॥ स्वप्रमानो हृदयेन्द्वयरं स्याच्चिदात्मकः॥ क्रियते तत्परे तेन हृन्मंत्रेण ततः परं॥
सर्वांगादिगुणोत्संगे सांकल्पे परात्मनि॥ क्रियते निजदेहस्य शिखामंत्रेण दीक्षिकैः॥ मंत्रात्मकस्य देहस्य
मंत्रेणानेन तेजसा॥ सर्वतो वर्ममंत्रेण क्रियते देहसंवृतेः॥ वौषडिति मनुं जप्त्वा क्रियते देहनेत्रकं॥ ततो
स्त्रेणास्य मंत्रज्ञः करोत्यरूं चतुर्दिशः॥ इति षडंगं विधाय॥ यच्छक्तिपरं ज्ञानं संविद्रूपे यदात्मनि॥ स्व
स्यादिमयं तेजः स्यादेतन्मंत्रसंज्ञितं॥ अध्यात्मिकादिरूपं यत्साधकस्य विनाशयेत्॥ अविद्यायाः
स्वतंत्रयत्परं धाम स्तमीरितं॥ इति षडंगं विधाय॥ ॥अथ ध्यानं कुर्यात्॥ उद्याद्भास्करप्रभत्यां॥ शक्तिद्व
यपुटांतस्थं कमलद्वयसंस्थितं॥ ज्योतिस्तत्त्वमयं ध्यायेत्कुलाकुलनियोजनात्॥ अथवा॥ शृंगाटद्वय
मध्यस्थं शक्तिद्वयपुटीकृतं॥ सदासमरसं ध्येयं ध्यानं तत्कुलयोगिनां॥ अन्यच्च॥ कारणस्थं तदाग्नि
स्थं चंद्रभास्करमध्यगं॥ महाशून्ये लयं कृत्वा पूर्णोस्मीति योगिराट्॥ अयमर्थः॥ चंद्रः। सहस्रारं सूर्यः।
स्वाधिष्ठानादुपरि कालाग्निराधारादधस्तेजस्त्रयी भावनया प्रज्वाल्य कुंडलिनी परमशिवे विला
प्य। तेजसा व्याप्तं देहं महाशून्ये परं विदो विलाप्य पूर्णो निश्चलास्तिष्ठेत्॥ इति ध्यानं॥ भैरवतंत्रे॥ अ
र्चयन्विषयैः पुष्पैस्तत्क्षणात्तन्मयो भवेत्॥ न्यासस्तन्मयताबुद्धिः सोहंभावेन चिंतयेत्॥ ॥विषपु १२
ष्पाणि यथा॥ अमायमनहंकारमरागममदं तथा॥ अमोहकमदंभं च अद्वेषाक्षोभकौ तथा॥ अमा
त्सर्यमलोभं च दश पुष्पं विदुर्बुधाः॥ अहिंसा परमं पुष्पं पुष्पमिंद्रियनिग्रहः॥ दयापुष्पं ज्ञानपुष्पं क्षमा

पुष्पंचपंचमं॥इत्यष्टसप्तभिःपुष्पैःपूजयेत्परदेवतां॥इतिपूजनं॥ ॥अथजपः॥मातृकापंचाशिख
मौक्तासूत्रंशक्तिशिवात्मकं॥ग्रथिताकुंडलीशक्तिकलांतेमेरुसंस्थितिः॥एवंविधिनावर्णमालामुपस्थ
स्यस्यमेरुंकृत्वा॥अकारादिलकारांतंलकारादिश्रीकंठपर्यंतंमूलमंत्रंसंजप्यपरेतेजसीजपंसमर्प
येत्॥ ॥अथहोमः॥आमूलपारीशिखांतंविभाव्यात्मांतरात्मकौज्ञानात्मापरमात्मनैश्चतुरस्रंवि
भावयेत्॥चतुर्भिःसुस्तैश्चापिकुंडंमेखलायोनिसंयुतं॥नाभौविभाव्यंतन्मध्येकुर्याद्दिव्युतेजसा॥
मूलांते॥नाभिचैतन्यरूपाग्नौमनसाहविषास्रुचा॥ज्ञानप्रदीपितेनित्यमक्षवृत्तिर्जुहोम्यहं॥स्वाहा॥ हुंचौ
अनेनप्रथमाहुतिंदद्यात्॥ततःसहस्रारदलेकुंडेमूलांते॥धर्माधर्महविर्दीप्तेचात्माग्नौमनसास्रु
चा॥सुषुम्नावर्त्मनानित्यमक्षवृत्तिर्जुहोम्यहं॥स्वाहा॥इतिद्वितीयाहुतिंदद्यात्॥मूलांतेप्रकाशा
काशहस्ताभ्यामवलंब्योन्मनीस्रुचा॥धर्माधर्मकलास्नेहपूर्णमग्नौजुहोम्यहं॥स्वाहा॥अनेनतृती
याहुतिं॥ततोमूलांते॥अंतर्निरंतरनिरिंधनराधमानेमायांधकारपरिपंथिनिसंविदग्नौ॥अस्मिं
श्चिरद्भुतमरीचिविकाशभूमौविश्वंजुहोमिवसुधादिशिवावसानं॥इतिचतुर्थाहुतिं॥इति॥ ॥
अन्यच्च॥बिंदुत्रयेणानंदमेखलात्रयंविभाव्येस्वर्थः॥कुंडलिसमुद्भवेननाभौवैह्नवतेजसारे
चयादुज्वलंतेजोविभाव्यप्रथमाहुतिरित्यादिज्ञेयं॥इतिअंतर्यजनंकृत्वासाक्षात्ब्रह्ममयोभ
वेत्॥नतस्यपुण्यपापानिजीवन्मुक्तोभवेद्ध्रुवं॥ ॥श्रीक्रमे॥यासौमधुमतीतन्वीमायामो
हनकारिणीएकांशकलानरूपेणसर्वांशक्तिंविचिंतयेत्॥कामयेत्कामिनीसर्वंदिव्यांद्रवर्णरूपि
णी॥चिंतयेत्सुंदरींदेवीसर्वव्यापककारिणी॥हकारभूतमंतस्यावयवंचचतुष्टयं॥बिंदुत्रयेणदे
वेशीप्रथमंदेविचक्रकं॥बिंदुद्वयंस्तनद्वंद्वंस्थिरस्थानेनियोजयेत्॥हकारार्धकलासूक्ष्मायोनिम

हकारार्द्धकलां सूक्ष्मां योनिमध्ये विचिंतयेत्॥ तथा कामकलारूपां मदनांकुरगोचरे॥ उद्यदादि
त्यसंकाशां सिंदुराभां स्तनद्वये॥ बिंदुं संकल्पयेद्वक्त्रे तु स्फुरद्दीपशिखा प्रिये॥ आपादब्रह्मरंध्रांतं तु मा
र्गेण भावयेत्॥ कामो बिंदुर्हृदे देवि तत्रस्था परमेश्वरी॥ शिवशक्तिमयं देवि तद्रूपं कुचद्वयं॥ तदधः
सपरार्द्धं च चिद्रूपा परमा कला॥ सापि कुंडलिनी शक्तिः कामकलास्वरूपिणी॥ संचिंत्य साधकश्रेष्ठ
स्त्रैलोक्यं वशमानयेत्॥ एतत्ते कथितं देवि कामकलासुनिर्णयं॥ गोप्तव्यं च प्रयत्नेन यदीच्छेदात्म
नो हितं॥ नमः॥ कालि॥ अंतःपूजां प्रवक्ष्यामि जना नामं तरं महत्॥ स्वकीयहृदये ध्यायेत्सुधा
सागरमुत्तमं॥ रत्नद्वीपं तु तन्मध्ये नंदनोद्यानशोभनं॥ परितो भावयेन्मंत्री पारिजाततमनोहरं॥ तत्र
कल्पद्रुमं ध्यायेत्सर्वाशैश्वरात्मकं॥ तन्मूले भावयेन्मंत्री नानारत्नोपशोभितं॥ उद्यदादित्यसंका
शं व्याप्तं ब्रह्मांडमंडपं॥ शतयोजनविस्तीर्णं ज्योतिर्माल्यामनुत्तमं॥ चतुर्द्वारसमायुक्तं हेमप्रा
कारभूषितं॥ वस्तुचामरघंटादिवितानैरुपशोभितं॥ तत्र देवीं विभाव्याथ पूजां कुर्यात्क्रमेण तु
आगतं स्वागतं चैव आसनं कल्पयेत्सुधीः॥ पाद्यत्रयं ततो दद्यात्कुर्यादर्घ्यचतुष्टयं॥ त्रयमाचम
नं पात्रं मधुपर्कत्रयं ततः॥ प्रस्थाले पात्रयुग्मं कल्पयेत्साधकोत्तमः॥ एकं तु भोगपात्रं च साधकः
श्रोउत्तरले॥ सहस्रारामृतैनैव पात्राणि पूरयेत्ततः॥ सर्वोपरि ततो ध्यायेत्सहस्रमानन पंकजं॥ स्व
र्णममृतं नित्यं देव्यंगकमलांतरे॥ शिवशक्तिसमायोगादमृतानंदनंदिनी॥ ब्रह्ममयी समाताश्च
परिवारसमन्विता॥ मानसे रूपचारैस्तु दीयते द्रव्यमुत्तमं॥ पाद्यं च पादयोर्दद्यान्मूर्ध्नि चार्घ्यं प्रक १२
ल्पयेत्॥ सहस्रदलभृंगाणां दीक्षानन विच्युतं॥ परामृतं च पानीयं भावपुष्पैः सुवासितं॥ स्व
र्णपात्रे जलं कृत्वा दद्यादाचमनं मुखे॥ मधुपर्कं मुखे दद्यात्कुंकुमं रक्तचंदनं॥ पूर्वोक्तभावकुसुमै

संपूज्य धूपदीपकैः॥ मनःकल्पितनैवेद्यं दद्याद्दिव्यं मनोहरं॥ षडंगं गुरुशक्तिं च पूजयेदंगदेवताः॥
स्वामे मंडलं कृत्वा रत्नसिंहासनान्वितं॥ तत्र देवीं समानीय नानागंधसमन्वितं॥ उद्वर्तनादिकं कृत्वा
स्नानीयं दापयेद्यथा॥ वसनेन च तेजस्त्वं प्रोक्षयेत्तेन वै तनुं॥ आकाशतत्वदिव्येन तेन वस्त्रं प्रकल्पयेत्॥
विधिवद्दूरनं कृत्वा केशसंस्कारमारभेत्॥ नानारत्नसमायुक्तं कंकं त्यादेवमानया॥ पद्रुसंबंके शपात्रं
नानारत्नसमन्वितं॥ ललाटे तिलकं दद्यात् सिंदूरैः केशमध्यगं॥ नागेंद्रदंतरचितं शंखं दद्यान्मनोहरं॥
हस्तके यूरकं चैव कंकणं कटकं तथा॥ पादांगुलीयकं दद्यान्नानारत्नोपशोभितं॥ पादयोर्नूपुरं दद्या
त्कट्यां चक्षुद्रघंटिकां॥ शिरोरत्नं प्रदद्याच्च मुकुटं रत्ननिर्मितं॥ तारकं कुंडलं कर्णभूषणं मुपसिस्तरं
नयने कज्जलं दद्यान्नासाग्रे गजमौक्तिकं॥ श्रीपात्रं कंठभूषां च मुक्तामणिविराजितां॥ आनंदहारीत्रि
तयां अंगुलीयकरत्नकं॥ सर्वांगलेपनं दद्याद्गंधचंदनमिश्रितैः॥ सुवर्णपादुके दद्यात् सुरांकुंडलचिह्नितां॥
मंडलेषु समानीय रत्ननिर्मितदोलया॥ पुनः पाद्यादिकं दत्वा पूजयेत्तां सनातनीं॥ गंधादिकं पुनर्दत्वा
पूजयेद्भावपुष्पकैः॥ सुमेरवलां पद्ममालां पुष्पनानाविधं तथा॥ सप्तद्वीपां समुद्रांतं दद्याद्दिव्यैः सुसाधकः॥
कुंडगोलोद्भवपुष्पं धूपं दद्यात्समीरितं॥ सहस्रकर्णिकापात्रं घृतं दद्यात् परामृतं॥ मूलाधारं पात्ररूपं च
शानंदप्रदीपकं॥ आमूलाब्रह्मरंध्रांतं सुषुम्नामरुत्वायुना॥ अनाहतध्वनिमयीं घंटामेतां निवेदयेत्॥
नैवेद्यं यद्वस्तु पेत्तमर्थं च चामरं त्रयोः॥ सूर्यं च दर्पणं चंद्रमंडलं छत्रमुत्तमं॥ सुधामहार्णवं दद्या
न्मांसपर्वतं॥ सुवर्णं चरुकं चैव सुक्तायुक्तपरात्मकं॥ भक्ष्यं भोज्यं तथा चोष्यं लेह्यं पेयं च सर्वणं॥
दद्याच्छ्रिषयुतं तेन पुनराचमनीयकं॥ वायुचक्रं ततो दद्यान्मूलाधारोत्थवायुना॥ रजस्तमः सत्वगुणैः क
र्पूरचूर्णमिश्रितं॥ रत्नपात्रे परिस्कृत्य तांबूलं च निवेदयेत्॥ पुष्पांजलिं ततो नमस्कुर्यात्तत्र देवीं सुरेश्वरीं॥

ामा मनोनर्त्तकदानेनशृंगारादिरसोज्वलैः॥सितैःस्नानादिभिर्देवींतोषयेत्साधकोत्तमः॥माताकामेश्वरी रहस्य
देवीपिताकामेश्वरश्चसः॥मनसैक्यंविभाव्याथसाधकःसिद्धिमालभेत्॥इत्यंतःपूजनंप्रोक्तंभुक्तिमुक्ति
फलप्रदं॥रक्तपद्मंमहेशानीमनसायःप्रयच्छति॥कल्पकोटिसहस्रंतुदेवीलोकेसतिष्ठति॥स्थितंदेवीपुरःश्री
मान्ततोराजाभविष्यति॥मनसापिमहादेव्यैनैवेद्यंदातुमिच्छति॥योनरोभक्तिसंयुक्तःसदीर्घायुःसुखीभवेत्॥
मनसापिचयोभक्त्यादेवींकुर्यात्प्रदक्षिणं॥देवीगेहेवसेत्सोपिनरःकल्पचयपन्नयात॥नमनंमनसादेव्यांयोभ
क्त्याकुरुतेनरः॥सोपिविघ्नंविजित्याशुदेवीलोकेमहीयते॥पंचमुंडसमासीनांमुंडमालाविभूषितां॥
आम्रार्कयुतसंकाशांरत्नसिंहासनेस्थितां॥ ॥इत्यंतःपूजनं॥ ॥अत्राव्यक्तमन्त्रोयातयातत्क्रमेण
वारत्रयंदेवींकुंडलिनींतर्प्पयित्वांतर्यागफलंलभेत्॥ ॥इतिद्वितीयपरिच्छेदः॥२॥ ॥
अथसाधकःकुलयुवतीवेषंकृत्वावनितायाअपिकारयित्वापीठन्यासंकुर्यात्॥तद्रूपंकुमारीव
त्स्व॥ततःस्त्रीवेषधारीस्यात्सिंदूरांकितभालकः॥शृंगारोज्वलवेषाढ्यस्तांबूलपूरिताननः॥एवंवेषादिकंस
र्वंवनितामपिकारयेत्॥पीठन्यासंततःकुर्यादाधारशक्तिपूर्वकं॥पूर्वं॥प्रकृतिंकमठंचैवशेषंपृथ्वीं
तथैवच॥सुधांबुधिंमणिद्वीपंचिंतामणिगृहंततः॥श्मशानंपारिजातंचतन्मूलेरत्नवेदिकां॥तस्यो
परिमणीःपीठंन्यसेत्साधकसत्तमः॥चतुर्दिक्षुमुनीन्द्रान्शिवाश्यशवमुंडकान्॥धर्मादींश्चैववाय्य
धर्मादीन्पारगांश्चचतुष्टयं॥हृदिकंदंतथापद्मंसूर्यसोममहेश्वरी॥वैश्वानरंतथासत्वंरजश्चैवतम
स्तथा॥आत्मानंचैवविन्यस्यशक्तिंदद्यात्पद्मकेन्यसेत्॥ ॥शक्तिर्यथा॥ज्ञानार्णवे॥इच्छांज्ञानांक्रियां १४
चैवकामिनीकामदायिनी॥रतिरतिप्रियानंदाकर्णिकायांमनोन्मनि॥वाग्भवंप्रथमंप्रोक्तापरा
येत्यनंतरं॥अपरायैविरूपायैह्सौबीजमतःपरं॥सदाशिवमहाप्रेतंपद्मासनंतथा॥नमइसे

वर्मंत्रोयंपीठन्यासउदाहृतः॥एवंदेहमयेपीठेचिंतयेदिष्टदेवतां॥अथादौकामकलारूपमात्मानंवि
भाव्यमूलाधारात्कुंडलिनींपरशिवांतेध्यात्वा॥चंद्रामृतेनसंप्लाव्यकारकरूपिकयापुष्पंगृहीत्वासु
षुम्नावासतद्यादलपद्मेदेवींध्यायेत्॥तदुक्तंवीरतंत्रे॥ततःकामकलाध्यानादाद्यांचकालिकां
शिवां॥कूर्माख्यमुद्रयापुष्पंस्वकमध्येनिधापयेत्॥ ॥अथकामकलायथा॥कुलचूडामणौ॥त
थाचभावचूडामणौ॥मुखंबिंदुवदाकारंतदधःकुचयुग्मकं॥तदधःसपरार्द्धंचचिंतयेत्तदधोमुखं
सर्वविद्यामृताद्यर्णंसर्ववाग्भवप्रदं॥सर्वार्थसाधकंदेविसर्वयंत्रप्रवर्त्तकं॥तदधःपरमा
र्धंचसुपरिष्कृतमंडलं॥सर्वदेवादिभूतंचसर्वदेवनमस्कृतं॥सर्वाल्हादनसंपूर्णंसर्वरंजनकार
कं॥एतत्कामकलाध्यानंसुगोप्यंसाधकोत्तमैः॥मुखंमुखमंडलं॥तदधःकुचयुग्मकमित्येने
नकंठादिकटिपर्यंतंसपरार्द्धमितियोन्यादिपादपर्यंतंदेहंविभावयेत्॥ ॥अथकूर्ममुद्रायथा॥
कालिकापुराणे॥वामहस्तस्यतर्जन्यांदक्षिणस्यकनिष्ठया॥तथादक्षिणतर्जन्यांवामांगुष्ठेनयो
जयेत्॥उन्नतंदक्षिणांगुष्ठंवामस्यमध्यमादिकाः॥अंगुलीर्योजयेत्पृष्ठेदक्षिणस्यकरस्यच॥वा
मस्यापितृतीर्थेनमध्यमानामिकेतथा॥अधोमुखेचतेकुर्याद्दक्षिणस्यकरस्यच॥कूर्मपृष्ठसमं
कुर्याद्दक्षिणस्यचपृष्ठकं॥एवंविधःसर्वसिद्धिंददातिपाणिकच्छपः॥कुर्यात्तुहृदयापत्नेनिमील्य
नयनद्वयं॥सम्यक्कायशिरोग्रीवंकृत्वास्थिरतमोबुधः॥ध्यानेसमारभेन्मंत्रीसर्वपापप्रणाशनं॥
ध्यानंयथा॥तदुक्तंस्वतंत्रे॥देव्याध्यानंप्रवक्ष्यामिसर्वदेवोपसेवितं॥अंजनाद्रिनिभांदेवींकराल
वदनांशिवां॥मुंडमालावलीकीर्णांमुक्तकेशींस्मितानना॥महाकालहृदंभोजस्थितांपीनपयोध
रां॥विपरीतरतासक्तांघोरदंष्ट्रांशिवैःसह॥नागयज्ञोपवीताढ्यांचंद्रार्द्धकृतशेखरां॥सर्वालंकारसंयु

ाभा कांमुक्तामणिविभूषितां॥ मृतहस्तसहस्रैस्तु कांचिबद्धांदिगंबरां॥ शिवाकोटिसहस्रैस्तु योगिनी रहस्य
भिर्विराजितां॥ रक्तपूर्णमुखांभोजां मद्यपानप्रमत्तिकां॥ वन्हिचंद्रार्कनेत्रां तु रक्तविस्फुरिताननां॥
विगतासुकिशोराभ्यां कृतकर्णावतंसिनीं॥ कंठावसक्तमुंडालीगलद्रुधिरचर्चितां॥ स्वांतःश्मशानवन्हिस्थां
ऊर्ध्वकेशां शववंदितां॥ सद्यःकृत्तशिरःखड्गवराभीतिकरांबुजां॥ अत्रवामोर्ध्वहस्ते नकृपाणंतदधःशिरः
दक्षिणोर्ध्वहस्ते च अभयं तदधो वरं इति बोध्यं॥ तदुक्तं महाकालकृतस्तवे॥ ऊर्ध्ववामे कृपाणं क
रकमलतले छिन्नमुंडं तथाधोसव्ये भीतिं वरं चेत्यादि॥ अथ विरूपाक्षकृतध्यानक्रमेण ध्याये
द्यथा॥ भिन्नांजनचयप्रख्यां प्रवीणशवसंस्थितां॥ गलच्छोणितधाराभिः स्मेराननसरोरुहां॥ पी
नोन्नतकुचद्वंद्वां पीनवक्षोनितंबिनीं॥ दक्षिणामुक्तकेशालीं दिगंबरां विनोदिनीं॥ महाकालस्यावो
विधांस्मेराननं तदुपरिस्थितां॥ मुखसांद्रस्मिताभा दमोदिनीं मदविह्वलां॥ आरक्तमुखसांद्राभिर्ने
त्रालीभिर्विराजितां॥ शवद्वयकृतोत्तंसां सिंदूरतिलकोज्वलां॥ ~~आरक्तमुखसांद्राभि~~ पंचाशन्मुं
डघटितमालाशोणितशोभितां॥ नानामणिविशोभाढ्यां नानालंकारभूषितां॥ शिवास्थिकृत
केयूरां शंखकंकणमंडितां॥ शववक्षःसमारूढां लेलिहानां शवं क्वचित्॥ शवमांसकृतग्रासां सा
ट्टहासां मुहुर्मुहुः॥ खड्गमुंडधरां वामे सव्ये वरभयप्रदां॥ दंतुरां च महारौद्रीं चंडनादातिभीषणां
शिवाभिर्घोररूपाभिर्वेष्टितां भयनाशिनीं॥ माभि माभिस्वभक्तेषु जल्पंतीं घोरनिस्वनैः॥ यूयं
किमर्थमुग्राथरदातीतिप्रभाषिणीं॥ अथापरध्यानप्रकारं महातंत्रे॥ करालवदनां घो १५
रां मुक्तकेशीं चतुर्भुजां॥ कालिकां दक्षिणां दिव्यां मुंडमालाविभूषणां॥ सद्यःकृत्तशिरःखड्गमु
र्ध्वद्वयकरांबुजां॥ अभयं वरदं चैव अधोद्वयकरांबुजां॥ महामेघकराभां मांतथैवदिगंबरां॥

कंठावसक्तमुंडाली गलद्रुधिरचर्चितां ॥ कर्णावतंसतानीतशवयुग्मभयानकां ॥ घोरदंष्ट्राकरालास्य
वीनोन्नतपयोधरां ॥ शवानां करसंघातैः कृतकांचीं हसन्मुखीं ॥ सृक्कद्वयगलद्रक्तधाराविस्फुरिताननां ॥
घोररूपां महारौद्रीं श्मशानालयवासिनीं ॥ दंतुरां दक्षिणव्यापिमुक्तालंबकचोच्चयां ॥ शवरूपमहादेवहृ
दयोपरिसंस्थितां ॥ शिवाभिर्घोररावाभिश्चतुर्दिक्षुसमन्वितां ॥ महाकालेन च समं विपरीतरतातुरां ॥ सु
खप्रसन्नवदनां स्मेराननसरोरुहां ॥ अथ एतषामन्यतमेन देवीं ध्यात्वा मानसोपचारैः देवीं संपूजयेत् ॥
तदुक्तं कुमारीकल्पे ॥ एवं तु मानसैर्भोगैर्गंधपुष्पैः सुदीपकैः ॥ सुरयाबलिसुक्तैश्च पूजयेद्धृदि यथावि
धिः ॥ ततो वै मानसं जपं कुर्याद्धोमादिकमेव च ॥ नमस्कृत्य स्तुत्वा बाह्यपूजां समाचरेत् ॥ अथा
ष्टवर्गालिप्तस्वर्णादिपात्रे स्वर्णरजतताम्रशलाकया बिल्वकंटकेन पुष्पेण वा मूलमंत्रमुच्चार्य ॥
शैबिंदुत्रिकोणं विलिख्य ततस्त्रिकोणं तद्बाह्ये स्वतंत्रे त्रिकोणचतुष्टयं वृत्तमष्टदलं पुनर्वृत्तं चतुर्द्वारात्म
कचतुरस्रं यंत्रराजं विलिखेत् ॥ तदुक्तं कालिकातंत्रे ॥ आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसे
त् ॥ ततो वै विलिखेन्मंत्री त्रिकोणत्रयमुत्तमं ॥ ततो वृत्तं समालिख्य लिखेदष्टदलं ततः ॥ वृत्तं विलिख्य
विधिवल्लिखेद्भूपुरमेककं ॥ इति ॥ कुमारीकल्पेपि ॥ ॥ आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसे
त् ॥ बहिस्त्रिकोणमालिख्य षट्कोणं तद्बहिर्लिखेत् ॥ बहिर्वृत्तेन संयुक्तं भूपुरेकेन संयुतं ॥ भोगे
च मुक्तिमाप्नोति यंत्रमेवं न संशयः ॥ एतत्तु विलिखेत्ताम्रे कुंडगोलविलेपिते ॥ स्वयंभूकुसुमैर्युक्ते
कुंकुमागरुसेविते ॥ स्वतंत्रेपि ॥ इत्थं विन्यस्य हृत्सु चक्रराजं लिखेत्सुधीः ॥ स्वर्णे वा राजते ताम्रे पाषा
णे वा ह्यथवा भुजे ॥ स्वयंभूकुसुमं कुंडगोलोथ रोचनागरु ॥ काश्मीरं मृगनाभिं च काश्मीरं मलयोद्भवं
एष गंधः समाख्यातः सर्वदा चंडिकाप्रियः ॥ एतेन गंधयोगेन योनिचक्रं समालिखेत् ॥ योनित्रि

यामा यंततः कुर्यात्कोणषट्कं ततः प्रिये ॥ ततश्चाष्टदलं भद्रे भूमिश्चतुर्द्वारसमन्वितं ॥ मध्ये तु बैंदवं चक्रं मं रहस्य
त्रपुष्पांजलिं क्षिपेत् ॥ अत्र केचिदूरति षट्कोणाभ्यन्तरगतमेवयुक्तं ॥ त्रिकोणं न तु सर्वमुक्तं स्वतंत्राऽवि
रोधात् ॥ वीरतंत्रफेत्कारिणीतंत्रकुलसंभाराविरोधाच्च ॥ तद्यथा ॥ पूजाविषये ॥ ॥ कालिकापालि
नीकुल्लाकुरुकुल्लाविरोधिनी ॥ विप्रचित्तां तु संपूज्य बहिः षट्कोणके तथा ॥ उग्रामुग्रप्रभां दीप्तां त बुधः
थैवाथ त्रिकोणके ॥ नीलां घनां बलाकां च अथापरत्रिकोणके ॥ मातंगीमुद्रांमितां चैव तथापरत्रिकोणक
ति ॥ तस्मात्षट्कोणांतर्गतमेकं त्रिकोणमुक्तं ॥ तत्र षट्कोणशब्देन त्रशक्त्यात्मकोणषट्कमुच्यते तन्नु
शिवशक्त्यात्मकं कोणषट्कमुच्यते ॥ इति ब्रह्मानंदपरमहंसगुरूणां परामर्षः ॥ ॥ तथा च नीलतंत्रे ॥ पं
चयोनिसमायुक्तं अधोवक्त्रां सुलक्षणां ॥ सिद्धिश्वरीतंत्रे ॥ अधोवक्त्रं पंचकोणमन्योन्यसमन्वि
तं ॥ एवंभूतं महाचक्रं स्थापयेत्सिंहविष्टरे ॥ फेत्कारिण्यां ॥ बहिरष्टदलं कुर्याच्चतुर्द्वारोपसेवितं त्रिको
णं नवकोणं भूपुरमिति ॥ कालीकुलसंभारे ॥ त्रिकोणं विन्यसेदादौ पुनश्चाथ त्रिकोणकं ॥ नवकोणं पु
नस्तत्र तन्मध्ये स्थापयेच्छिवं ॥ तत्र भगवन्मतेपि ॥ शक्त्यात्मकमेव नवकोणं न तु शिवशक्त्यात्मकं वीर
तंत्रे ॥ कालीतंत्राः स्वतंत्रविरोधात् ॥ तस्मात्त्र षट्कोणशब्देन शक्त्यात्मकमेवोच्यते इति भावः ॥ ननु
नवकोणांतर्युक्तं त्रिकोणद्वयमपरप्रकारमेव कथं न स्यादिति चेत् ॥ तत्रैव षट्कोणावरणं संपूज्या
न्यत्रिकोणके ॥ परत्रिकोणे तथैवान्यत्रिकोणे तथैवान्यत्रिकोणे क्रमेण पूजयेत् ॥ यथा ॥ कुलसं
भारेपि ॥ कालीकपालिनीं कुल्लां कुरुकुल्लाविरोधिनीं ॥ विप्रचित्तां न्यसेच्चैव बहिः षट्कोणके तथा १६
उग्रामुग्रप्रभां दीप्तां परत्रिकोणके न्यसेत् ॥ नीलां घनां बलाकां च तथैवापरके त्रिके ॥ मात्रां मुद्रां मितां
चैव तथैवान्यत्रिकोणके ॥ इत्यादि ॥ तस्मान्नवकोणांतर्गतत्रिकोणद्वयमिति ॥ बाह्यषट्कोणाभावाच्च ॥

अथत्रिकोणांतर्गत नवकोणकथनंस्यात्॥ इतिचेत्तन्निर्विवादमेव। यतोनवकोणशब्देनशक्त्यात्मकंन व
वकोणमुच्यते॥ ननुशिवशक्त्यात्मकंनवकोणमुच्यते। ननुशिवशक्त्यात्मकंच कथनं नांतरदर्शना
त्॥ तद्यथाकालीक्रमे॥ त्रिकोणंविलिखेदादौ पुनस्त्रयापित्रिकोणकं॥ नवशक्तिं पुनर्देवी बिंदुसंज्ञं
समालिखेत्॥ अथतंत्रभेदान्नानाविधयंत्रमेवकथनंस्यात्॥ इतिचेत्सत्यं॥ सम्भवत्येकदेशोना
नाविधकल्पनंगौरवंस्यात्॥ इतिनसमासकृन्नेवपंचदशकोणंनास्तमेवमैथिलगौडमंत्रप्रभृति
नानासाधकानामितिसंमतं॥ ॥इतिश्रीपूर्णानंदपरमहंसविरचितेश्यामारहस्येनिर्णयस्तृती
यपरिच्छेदः॥३॥७॥ ॥अथसुवर्णादिमहासनेपुरतोयंत्रंसंस्थाप्य॥
पुष्पांजलिनाभ्यर्च्यतत्रपीठन्यासक्रमेणपूजयेत्॥ यथा॥ ॐआधारशक्त्यैनमः॥ प्रकृत्यै॰ कूर्माय॰
अनंताय॰ पृथिव्यै॰ सुधांबुधाय॰ मणिद्वीपाय॰ चिंतामणिगृहाय॰ श्मशानाय॰ पारिजाताय॰
तन्मूलेरत्नवेदिकायै॰॥ तस्योपरिमणिपीठाय॰ दक्षुर्नानामुनिगणेभ्यः॰ नानादेवेभ्यः॰ चतुर्दि
क्षुबहुमांसास्थिक्वाथमुंडचितांगारेभ्यः॰ मादमानाशिवाभ्यः॰ धर्माय॰ ज्ञानाय॰ वैराग्याय॰ ऐ
श्वर्याय॰ अधर्माय॰ अज्ञानाय॰ अवैराग्याय॰ आनंदकंदाय॰ संविन्नालाय॰ पद्माय॰ सूर्यमंडला
य॰ सोममंडलाय॰ वैश्वानरमंडलाय॰ सत्वाय॰ रजसे॰ तमसे॰ आंआत्मने॰ अंअंतरात्मने॰
पंपरमात्मने॰ ह्रींज्ञानात्मने॰ अष्टपत्रदलेषु॥ इच्छायै॰ ज्ञानायै॰ क्रियायै॰ कामिन्यै॰ कामदा
यिन्यै॰ रत्यै॰ रतिप्रियायै॰ आनंदायै॰॥ कर्णिकायां॥ मनोन्मन्यै॰ ऐंपरायै॰ अपरायै॰ विरूपायै॰
ह्सौः सदाशिवमहाप्रेतपद्मासनाय॰ ओंनमइतिविशेषविहितंअयंतसर्वत्रयोज्यं॥ ॥अथैवं
विधिनापीठपूजांकृत्वाकलशस्थापनंकुर्यात्॥ ॥तल्लक्षणमाहतंत्रांतरे॥ कलांगदीर्घातुदेवानां।

...ामा विश्वकर्मेणकर्षणंनिर्मितोयंसुरैर्यस्मात्कलशस्तेनउच्यते॥ पादपञ्चार्यस्तु॥कलाःषोडशतद्धिक रहस्य
लशः॥ ॥अथकलशमानमाह॥तदुक्तंतंत्रे॥ पंचाशदंगुलव्यासउत्सेधःषोडशांगुलः॥ कलशानांप्रमा
णंनुमुखमष्टांगुलंतथा॥ सौवर्णराजतंचापि मार्तिकंवाययथोदितं॥क्षालयेदस्त्रमंत्रेणकुंभंसम्यक्सुरेश्व
री॥ ॥अथप्रयोगः॥स्ववामेषट्कोणांतर्गतंत्रिकोणबिंदुंनवाथैवतंचतुरस्रंकृत्वा सामानार्घ्योदके
नसंप्रोक्ष्य॥तत्राधारशक्त्यादिभ्योनमइतिपूजयेत्॥ ततोनमइत्याधारंप्रक्षाल्यमंडलोपरिसंस्थाप्य
वन्हिमंडलायदशकलात्मनेइतिसंपूज्य॥फडितिकलशंप्रक्षाल्य।आधारेरक्तवस्त्ररक्तमाल्यादि
नावेष्टितंबुध्यासंस्थाप्य॥अंअर्कमंडलायद्वादशकलात्मनेनमइतिसंपूज्य विलोममातृकामूलमंत्रंच
पठन्॥कारणेनकलशमापूर्य हूंव्येतंसोममंडलायषोडशकलात्मनेनमइतिसंपूजयेत्॥ ततःफडिति
संरक्ष्यहुंमितिअवगुंठ्यइति अवगुंठनमुद्रयाअवगुंठ्य मूलमंत्रेणसंवीक्ष्य नमइत्यभ्युक्ष्य मूले
नत्रिर्गंधमादाय कलशोपुष्पंदत्वाशापविमोचनंकुर्यात्॥ तदुक्तंस्वतंत्रे॥ ततश्चकारणंदिव्यंसमानीय
घटस्थितं॥वेष्टितंरक्तवस्त्रेणरक्तमाल्येनभूषितं॥वामांगेतुमहेशानीमंडलंचतुरस्रकं॥ लिखि
त्वातत्रकुंभंवै सौवर्णराजतंतथा॥ताम्रंभूमिमयंवापि यद्वालोहविवर्जितं॥ तत्रांतरे॥आधारेस्था
पयेन्मंत्री सौवर्णंवाथराजतं॥कांस्यजंमृन्मयंवापिघटमत्रेणशोधितं॥सौवर्णंभोगदंप्रोक्तंराज
तंमोक्षदंस्मृतं॥कांस्यंशांतिकरंचैवमृन्मयंपुष्टिदंभवेत्॥ ॥अथशापविमोचनंयथा॥तदुक्तं
कुमारीतंत्रे॥अन्यच्चशृणुदेवेशीयथायानादिकर्मणि॥दोषानजायतेदेवीतत्रमंत्रान्शृणुष्वमे॥ए १७
कमेवपरंब्रह्मस्थूलसूक्ष्ममयंध्रुवं॥कचोद्भवांब्रह्महत्यांतेनतेनाशयाम्यहं॥सूर्यमंडलसंभूतेवरु
णालयसंस्थिते॥अमाबीजमयेदेवि शुक्रशापविमोच्यैया॥वेदानांप्रणवोबीजंब्रह्मानंदमयंयदि॥

तेनसत्येनतेदेवि क्रमेनहंसांव्ययोरलं॥ एवंमंत्रत्रयेणैवअभिमंत्र्यसुरांशुभां॥ तद्घाकालिकायैव
नतोनैवेद्यभुग्भवेत्॥ इतिमंत्रत्रयंदेविघ्रंधृत्वापठेत्रिधा॥ ततः॥ ओंवांवींवूंवैंवौंवः ब्रह्मशापविमो
चितायैसुरादेव्यैनमः इतिवारत्रयंपठेदितिब्रह्मशा॥ पविमोचनयत्र[illegible]शापविमो[illegible] ततःक्लींश्रींक्रां
क्रोंक्रुंक्रैंक्रौंक्रंक्रः॥ सुरांशुक्रशापाद्विमोचयविमोचय अमृतंस्रावयस्रावयस्वाहा इतिशुक्रशापवि
मोचनं॥ ओंशांशीं[illegible]शूंशैंशौंशंशः॥ शुक्रशापविमोचितायैसुरादेव्यैनमः इतिशुक्रशापमोचनं॥
अथोत्तरतंत्रे॥ हंसःशुं० [illegible]॥ इतिवारत्रयंद्रव्योपरिपठेत्॥ ततोआनंदभैरवमध्ये॥ ततोद्रव्यमध्ये
आनंदभैरवींचध्यायेद्यथा॥ सूर्यकोटिप्रतीकाशांचंद्रकोटिसुशीतलां॥ अष्टादशभुजांदेवींपंच
वक्त्रांत्रिलोचनां॥ अमृतार्णवमध्यस्थांब्रह्मपद्मोपरिस्थितां॥ वृषारूढांनीलकंठांसर्वाभरणभूषि
तां॥ कपालखट्वांगधरांघंटाडमरुवादिनीं॥ पाशांकुशधरांदेवींगदामुसलधारिणीं॥ खड्गखेटक
पट्टिशमुद्गरंशूलदंडकं॥ विचित्रखेटकंमुंडंवरदाभयपाणिनीं॥ लोहितांदेवदेवेशींभावयेत्साध
कोत्तमः॥ एवंध्यात्वा॥ हसक्षमलवरयूंआनंदभैरवायवषट् इत्यानंदभैरवंतत्रवारत्रयंपूजयेत्॥
आनंदभैरवींध्यायेत्यथा॥ भावयेच्चसुरांदेवींचंद्रकोट्ययुतप्रभां॥ हिमकुंदेंदुधवलांपंचवक्त्रांत्रि
लोचनां॥ अष्टादशभुजैर्युक्तांसर्वानंदकरोद्यतां॥ प्रहसंतीविशालाक्षींदेवदेवस्यसंमुखीं॥
एवंध्यात्वा॥ सहक्षमलवरयींसुरादेव्यैवौषट्॥ इत्यानंदभैरवींसंपूज्यद्रव्यमध्येत्रिकोणचक्रंविलि
खेत्॥ ततस्त्रिपंक्त्याप्रदक्षिणावर्तेनअकारादिषोडशस्वरान्ककारादितान्थादिसांतान्क्रमेण
विलिख्यकोणत्रयेहलक्षान्लिखेत्॥ ततःशिवशक्त्योःसमावेशंद्रव्यमध्येअमृतंविचिंतयेत्॥
ओंअमृतेअमृतोद्भवेअमृतेश्वरीअमृतवर्षिणि॥ अमृतमाकर्षयाकर्षयअमृतंस्रावयस्रावयस्वाहेति

तमा

रहस्य

धेनुमुद्रयामृतीकरणंकृत्वावीमितिवरुणबीजंमूलमंत्रमष्टधाघटंधृत्वापठेदितिद्रव्यशुद्धिः॥
तदुक्तंस्वतंत्रे॥ततस्त्वावाहयेद्रव्यमध्येसकलमयंधिये॥अकथादित्रिपंक्त्यातुहलसमध्यमंउंतं॥पूर्वे
योनिमुद्रायांशिवशक्त्योःसमागमे॥अमृतंचिंतयेत्तद्व्येअष्टधात्वमृतंजपेत्॥अष्टधामूलमंत्रंचजप
धृत्वाघटंततः॥एतत्तुकारणंदेवीसुरसंहानिसेवितं॥अतएवतस्यनामसुरेतिभुवनत्रये॥अस्यगंधःके
नाप्यस्तुनेनगंधेनकौलिकः॥पूजयेत्परमांदेवींदक्षिणांकालिकांशिवां॥ततःशंखंवीरपात्रंस्थापये
न्मध्यमागतः॥श्रीविद्योक्तविधानेनततःपूजांसमाचरेत्॥समयाचारेपि॥सामान्यार्घ्यंततःकृ
त्वापयसासाधकोत्तमः॥तज्जलैर्मंडलंकृत्वापात्राणिस्थापयेदथ॥कुमारीकल्पेपि॥ततोर्घ्यंकारयेन्मं
त्रीतत्रानार्यस्वदेशया॥अर्घ्यद्रव्यमर्घ्यपात्रेनिक्षिप्यप्रयतःसुधीः॥कुंडगोलोद्भवंद्रव्यंस्वयंभूकुसुमं
तथा॥नाधर्मोविद्यतेसुभ्रुमहामंत्रस्यसाधके॥नार्याःपतितस्यगलच्चंद्रामृतेनेत्यर्थः॥ ॥अथश्री
विद्योक्तक्रमेणार्घ्यस्थापनंयथा॥आत्मश्रीचक्रयोर्मध्येत्रिकोणषट्कोणवृत्तचतुरस्रंविलिख्यचतु
रस्रेपूर्णशैलायनमः॥उड्डीयानायनमः॥जालंधरायनमः॥कामरूपायनमः॥इतिसंपूज्य॥षट्को
णेषडंगंसंपूज्य॥मूलखंडत्रयेणत्रिकोणाग्रदक्षोत्तरेष्वभ्यपूज्यमध्येआधारशक्तिंचपूजयेत्॥यंधू
म्राचिषेनमः॥रंउष्मायैनमः॥लंज्वालिन्यैनमः॥वंज्वालामालिन्यैनमः॥शंविस्फुलिंगिन्यैनमः॥षं
सुश्रियैनमः॥संसुरूपायैनमः॥हंकपिलायैनमः॥लंहव्यवाहायैनमः॥क्षंकव्यवाहायैनमः॥मंव
न्हिमंडलायदशकलात्मनेनमः॥इतिसंपूज्य॥षट्कोणेषडंगंसंपूज्य॥मध्येउक्तमंत्रेणदेवींसंपूज्य १८
कपालादिपात्रंफडितिप्रज्वाल्यत्रिपादिकोपरिसंस्थाप्यतत्रसूर्यमंडलंपूजयेत्॥यथा॥कंभंत
पिन्यैनमः॥खंबंतापिन्यैनमः॥गंफंधूम्रायैनमः॥घंपंमरीच्यैनमः॥ङंनंज्वालिन्यैनमः॥चंधं

रुच्यै नमः॥ छं दं सुषुम्नायै नमः॥ जं थं भोगदायै नमः॥ झं तं विश्वायै नमः॥ ञं णं बोधिन्यै नमः॥
टं ढं धारिण्यै नमः॥ ठं डं क्षमायै नमः॥ ओं अर्कमंडलाय द्वादशकलात्मने इति पूजयेत्॥ ततः पात्रमध्ये
त्रिकोण॥ वृत्तषट्कोणं विलिख्य व्यस्तसमस्तमंत्रेण त्रिकोणं संपूज्य बीमिति वरुणबीजं मूलमंत्रं वि
लोममातृकां च पठन्॥ घटस्थाकारणामृतेन त्रिभागं प्रपूर्य वक्रेण भागमेकं पूरयेत्॥ ततो दूर्वाक्ष
तरक्तपुष्पबिल्वपत्रनानाविधसुगंधद्रव्याणि तत्र निक्षिप्य तत्र सोममंडलं पूजयेत्॥ यथा॥ अं
अमृतायै नमः॥ आं मानदायै नमः॥ इं पूषायै नमः॥ ईं - - - ॥ उं पुष्ट्यै नमः॥ ऊं रत्यै नमः॥ ऋं धृत्यै
नमः॥ ॠं शशिन्यै नमः॥ ऌं चंद्रिकायै नमः॥ ॡं कांत्यै नमः॥ एं ज्योत्स्नायै नमः॥ ऐं श्रियै नमः॥ ओं प्रीत्यै
नमः॥ औं अंगदायै नमः॥ अं पूर्णायै नमः॥ अः पूर्णामृतायै नमः॥ इति संपूज्य॥ ओं सोममंडलाय षोड
शकलात्मने नमः इति पूजयेत्॥ ततः पूर्ववत्त्रिकोणाकारं कारेण बीलिख्य त्रिकोणरेखायां अं १६ कं १६
थं १६ मध्ये हंक्षमिति त्रिर्लिखेत्॥ ततो मूलखंडत्रयेण त्रिकोणं संपूज्य षट्कोणे षडंगं संपूज्य॥ पू
र्वादिक्रमेण॥ गंगे च यमुनेत्यादि मंत्रेण पूर्वोक्तमंत्रेणांकुशमुद्रया सूर्यमंडलात्तीर्थमावाह्य॥ आ
नंदभैरवं आनंदभैरवीं तत्तन्मंत्रेण संपूज्य पूर्वादिक्रमेण पंचरत्नं पूजयेत्॥ यथा॥ ग्लूं गगनरत्ने
भ्यः स्लूं स्वर्गरत्नेभ्यः॥ म्लूं मर्त्यरत्नेभ्यः॥ प्लूं पातालरत्नेभ्यः॥ न्लूं नागरत्नेभ्यः॥ नमो नेन पूजयेत्॥ त
तो द्रव्यमध्ये मांसमीनमुद्राकुंडगोलादिकं च संशोध्य निक्षिपेत्॥ तेषां शुद्धिर्यथा॥ उत्तरतंत्रे॥
ओं प्रतद्विष्णुस्तवते० इति मांसं शोधयेत्॥ ओं त्र्यंबकं० इति मीनं शोधयेत्॥ ओं तद्विष्णो०॥
तद्विप्रा०॥ इति मुद्राशोधनं॥ ओं विष्णुर्योनिं०॥ गर्भं धेहि०॥ क्लूं ज्लूं म्लूं स्लूं स्वाहा॥ अमृते अमृतो
द्भवे अमृतेश्वरी अमृतवर्षिणी अमृतं स्रावय स्वाहा॥ इति कुंडगोलोद्भवादीनां शोधनं॥ ततः सर्वे

वामा हूंमित्यवगुंठ्य।धेनुमुद्रयामृतीकृत्यतालत्रयंदिग्बंधनंचकृत्वातदुपरिमूलमंत्रंसप्तधाज रहस्य
पेत्॥ततः ऐंक्लींसौः।ब्रह्मांडखंडसंभूतमशेषरससंभवं।आपूरितंमहापात्रंपीयूषरसमावह॥
अखंडैकरसानंदकरेपरसुधात्मनि॥स्वच्छंदस्फुरणामत्रनिधेह्यकुलरूपिणि॥अकुलस्थामृताका
रेशुद्धज्ञानकरेपरे॥अमृतत्वंनिधेह्यस्मिन्वस्तुनिक्लिन्नरूपिणि॥तद्रूपेणैकरस्यंचकृत्वाह्येतत्स्वरू
पिणि॥भूत्वापरामृताकारमयिचित्स्फुरणंकुरु॥अनेनाकारणमामंत्र्य॥तत्रदेवीमावाह्यतालत्रयंदि
ग्बंधनंचावगुंठ्यअमृतीकरणानितत्तन्मुद्रयाविधाययोनिमुद्रांप्रदर्श्यह्सौःनमइतिसंपूज्य॥
शंखमुद्रांप्रदर्श्यषडंगेन्यस्यसकलीकृत्यमत्स्यमुद्रयापात्रमाच्छाद्यमूलमंत्रंदशधासंजप्य।देवीस्वरूपं
पात्रंविभाव्य॥पूजावसानपर्यंतंमलिनंनकार्यमिति॥अथावगुंठनमुद्रायथा॥तदुक्तंज्ञानार्णवे
सव्यहस्तकृतामुष्टिर्दीर्घाधोमुखतर्जनी॥अवगुंठनमुद्रेयमभितोभ्रामितासती॥धेनुमुद्रातुपूर्वो
क्ता॥योनिमुद्रातदुक्तंज्ञानार्णवे॥मध्यमेकुटिलाकारेतर्जन्युपरिसंस्थिते॥अनामिकेमध्यमे
तेतथैवहिकनिष्ठिके॥सर्वाएवात्रसंयोज्यअंगुष्ठपरिपीडिताः॥योनिमुद्रासमाख्यातात्रैलो
क्यमातृका॥अथशंखमुद्रातदुक्तंज्ञानार्णवे॥वामांगुष्ठंपरांगुष्ठेनियोज्यसकलांगुलीः।
दक्षिणस्यकरस्यैववामांगुष्ठेनसंस्पृशेत्॥शंखमुद्रासमाख्यातामंत्रविद्भिःप्रकीर्तिताः॥
देवतांगेषडंगन्यासःसकलीकरणंभवेत्॥दक्षपाणिपृष्ठदेशेवामपाणितलंक्षिपेत्॥अंगुष्ठौचालये
त्सम्यङ्मुद्रेयंमत्स्यरूपिणीति॥ततोदेव्याअग्रतोगृहीत्वाघटश्रीपात्रयोर्मध्येपात्राणिस्थापयेत्॥ १९
यथा॥घटसमीपेगुरुःपात्रंततोदेवतापात्रंशक्तिपात्रंयोगिनीपात्रंवीरपात्रंबलिपात्रंस्वपात्रं
पाद्यपात्रंचाचमनीयपात्रंक्रमेणस्थापयेत्॥सामान्यार्घ्यवत्॥ततोमांनमांमंत्रयुक्तकारणेन

भैरव तत्वमुद्रयाश्रीपात्रात्स्वमूर्द्ध्नि श्रीआनंदमूर्तिं तर्पयामि नमः मंत्रेणत्रिः संतर्प्य। तथैवानंदभैरवीं सं
तर्प्य। ऐं श्रीअमुकानंदनाथश्रीगुरुपादुकां तर्पयामीति त्रिः सकृद्वा संतर्प्य। परमगुरुं परात्परगुरुं
परमेष्ठिगुरुपादुकां संतर्पयेत्॥ ततः श्रीपात्रामृतेन देवीं सायुधां सवाहनां सपरिवारां संतर्प्य। ये
दिति। तदि॥ तत्वमुद्रा यथा॥ तदुक्तं स्वतंत्रे॥ अंगुष्ठानामिकायोगाद्धा मध्यस्तस्य पार्वति॥ तर्पयेत्का
लिकां देवीं सायुधां सपरिच्छदां॥ ततस्तत्वशुद्धिं कुर्यात्॥ यथा कालिकाश्रुतौ। ओं प्राणापानव्याना
दानसमाना मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा॥ ओं पृथिव्यप्तेजोवाय्वाकाशानि
मे शुध्यंतामित्यादि २॥ ओं प्रकृत्यहंकारबुद्धिमनःश्रोत्राणि मे शुध्यंतामित्यादि॥ ३॥ ओं त्वक्चक्षु
र्जिह्वाघ्राणवचांसि मे शुध्यंतामित्यादि॥ ४॥ ओं पाणिपादपायूपस्थशब्दा मे शुध्यंतामित्यादि॥ ५॥
ओं शब्दस्पर्शरूपरसगंधाकाशानि शुध्यंतामित्यादि॥ ६॥ ओं वायुतेजःसलिलभूम्यात्मनो मे शुध्यंता
मित्यादि॥ ७॥ इति सप्तमंत्रं पठेदिति तत्वशुद्धिः॥ ततः स्वपात्रादिंदुरूपकारं कुर्यान्मूलमंत्रेण॥ ततः
श्रीपात्रामृतेन पूजोपकरणमात्मानं चाभ्युक्ष्य तस्मात्सर्वं ब्रह्ममयं भावयेदिति॥ ततश्चक्रस्य
पूर्वदक्षिणपश्चिमोत्तरेषु त्रिकोणवृत्तमंडलानि विलिख्य ऐं ह्रीं श्रीं मंडलाय नमः॥ इति मंडलानि संपू
ज्य॥ पूर्वे बां बटुकाय नमः॥ इति पाद्यादिभिः संपूज्य अर्घांतपूर्णसलिलमीनमांसपुष्पैर्बलिमु
पस्कृत्य बलिपात्रस्थकारणेन वामहस्ततत्वमुद्रया उत्सृजेदनेन एह्येहि देवीपुत्र बटुकनाथ क
पिलजटाभासुर त्रिनेत्रज्वालामुख सर्वविघ्नान्नाशय नाशय सर्वोपचारसहितं बलिं गृण्हस्व। गृण्ह
हा॥ एष बलिर्बटुकाय नमः॥ दक्षिणे यां योगिनीभ्यो नम इति संपूज्य॥ दक्षांगुष्ठानामिकाभ्यां
पूर्ववद्बलिं दद्यादनेन॥ ऊर्ध्वं ब्रह्मांडतो वा दिवि गगनतले भूतले निष्कले वा पाताले वानले वा

पा.भा. सलिलपवनयोर्यत्रकुत्रास्थिताया॥ क्षेत्रेपीठोपपीठादिषुचरुतनयदाधूपदीपादिकेनप्रीतादेव्यः रहस्य
सदानःशुभबलिविधिनापातुवीरेंद्रवंद्याः॥ यांयोगिनीभ्यःस्वाहाःसर्वयोगिनीःहुंफट्स्वाहा॥
एषबलिर्योगिनीभ्योनमः॥ ततःपश्चिमेक्षांक्षेत्रपालायनमइतिक्षेत्रपालमभ्यर्च्य।वाममुष्टिकृ
तदीर्घयातर्जन्याबलिंदद्यादनेनमंत्रेण॥ क्षांक्षींक्षूंक्षैंक्षौंक्षः क्षेत्रपालधूपदीपादिसहितंबलिं
गृण्ह२स्वाहाएषबलिःक्षेत्रपालायनमः॥ उत्तरेगंगणेशमभ्यर्च्यदक्षहस्तदंडाकारसर्वांगुलिमध्य
बद्धयाबलिंदद्यात्॥ गांगींगूंगैंगौंगः गणपतयेवरवरदसर्वजनंमेवशमानयबलिंगृण्हगृण्हस्वा
हा॥ एषबलिर्गणपतयेनमः॥ अथस्ववामेपूर्ववन्मंडलंकृत्वाऐंह्रींव्यापकमंडलायनमइतिसं
पूज्यतत्रसाधारबलिंसंस्थाप्यमूलेनानीयगंधपुष्पधूपदीपादिनातंसंपूज्य॥ ओंह्रींसर्वविघ्न
कृद्भ्यःसर्वभूतेभ्यःहुंफट्स्वाहा एषबलिःसर्वभूतेभ्योनमःइतितत्वमुद्रयानिवेदयेत्॥ अत्राप्येके
सर्वभूतायबलिमेकंदद्यात्॥ एवंवा॥ ततःपूर्ववत्षडंगन्यासंकृत्वाकामकलांविभाव्य॥ तरुणादि
त्यारुणंकुसुमांजलिंकूर्ममुद्रयागृहीत्वा॥ मूलाधारात्कुंडलिनीऊर्ध्वपथेपरशिवांतंध्यात्वा
हृदयाष्टदलपद्मपीठेसमानीय॥ मूलेनमूर्तिंकल्पयेत्॥ तदुक्तंतंत्रांतरे॥ देवीसुषुम्णामार्गेण
आनीयंब्रह्मरंध्रकं॥ वामनासापुटेध्यात्वानिःसार्यस्वांजलिस्थितां॥ पुष्पमारोप्यतत्पुष्पंप्रति
मादौनिधापयेत्॥ भैरवतंत्रेपि॥ ततःपूर्वोक्तरूपांतांध्यायेत्श्रीवह्निदक्षिणां॥ योगिनीचक्रसंवृ
तांमहाकालसमन्वितां॥ देवीसुषुम्णामार्गेणानीयतत्रब्रह्मरंध्रकं॥ कालीतंत्रेपि॥ ततोहृदयपद्मां २०
तःस्फुरंतींपरमांकलां॥ यंत्रमध्येसमावाह्यन्यासंजालंप्रविन्यसेत्॥ कुमारीकल्पेपि॥ ततोहृदय
पद्मांतःस्फुरंतिविद्युदाकृतिः॥ सुषुम्णावर्त्मनानीत्वाशिवस्थानेमहेश्वरीं॥ ततोत्वैहृदयासन्ने

पुष्पांतरे मध्ययेत्॥न्यासयावामयादेवीं वायुबीजेनमंत्रवित्॥देवेन्द्रीतिमंत्रेणइडा वा वाहयेत्सु
धीः॥अथोक्तयाध्यानादौपरंपांतरस्थापरमन्दिवेस्तपूज्य॥हृदयाष्टदलेसमानीययर्भितिवायु
बीजमुच्चरन्॥वामनासापुटेमथेनदेवींस्वहृदयात्कुसुमांजलावानीय॥यंत्रमध्येसमावाहयेदनेन
देवेशिभक्तिसुलभेपरिवारसमन्विते॥यावत्वांपूजयिष्यामितावद्देवीइहावह॥इतियंत्रमध्येदेवींसं
स्थाप्यआवाहयेद्यथा॥महाकालसंहितेश्रीदक्षिणकालिकेइहागच्छागच्छइहतिष्ठतिष्ठइहसंनिहि
ताभव॥इहसंनिरुध्यस्व॥ममपूजांगृहाणगृहाण॥अत्राधिष्ठानंकुरुकुरुइत्यावाह्य॥पूर्ववज्जी
वन्यासं॥लेलीहिमुद्रयाकुर्याद्विस्तरेणवाकृत्वांकुशेभस्यवगुंठय॥षडंगेनत्रिशक्लीकृत्वाकृतांजलिः॥
देवीनामसंबोधनांतं॥ओंस्वागतंकुशलमिदमासनमत्रास्यतामितिवदेत्॥अथावाहनादिमुद्रा
यथा॥दक्षिणामूर्तिसंहितायांऊर्ध्वांजलिमधःकुर्यादियमावाहनीभवेत्॥इयंतुविपरीतास्यात्त
दावेस्थापनीभवेत्॥ऊर्ध्वांगुष्ठेमुष्टियुगंमुद्रेयंसन्निधापनी॥अंतरांगुष्ठमुष्टिभ्यांतदियंसन्निरोधि
नी॥लेलिहामुद्रायथा॥तर्जनीमध्यमानामाःसमंकुर्यादधोमुखा॥अनामायांक्षिपेद्वृद्धामूर्ध्वंकृत्वा
कनिष्ठिकं॥लेलिहीनाममुद्रेयंजीवन्यासेप्रकीर्तिताः॥देविदक्षिणमहाकालं॥खड्गमुंडवराभय
परयोनिदर्शयित्वा॥देवतांगेषडंगन्यस्त्रिशक्लीकरणंभवेत्॥अंजलात्यार्घ्यंवत्कृत्वापरमीकरणं
भवेत्॥ततोयोनिमुद्रांखड्गमुंडवराभयपरयोनिंप्रदर्शयेत्॥प्रतिचक्रेरसिमदंदेवताआवाहये
त्तर्पयेच्च॥तदुक्तंस्वतंत्रे॥देवीध्यात्वासमावाह्ययोनिमुद्रांप्रदर्शयेत्॥खड्गमुंडवराभीतिपरयोनि
मुदर्शयेत्॥ततश्चप्रतिचक्रेषुदेवीमावाहयेत्सदा॥अथखड्गमुद्रायथा॥तदुक्तंस्वतंत्रे॥कनि
ष्ठानामिकेबध्वाअंगुष्ठेनैवदक्षकः॥शेषांगुलितुप्रसृतेसंस्पृष्टेखड्गमुद्रिका॥अंतरांगुष्ठमुष्टीन्तरुत्व

वामकरस्य च॥मध्यमाभ्यांदक्षिणस्यतथालंबमग्रपरंततः॥मध्यमेनाथतर्जन्याअंगुष्ठाग्रंनियोजय
दक्षिणंयोजयेत्सार्धिंवाममुष्टौतुसाधकः॥द्वयोर्दक्षिणेभगेमुंडमुद्रेयमुच्यते॥वरदाभयमुद्रेच
वरदाभयवत्कुरु॥योनिमुद्रायथातदुक्तंमुंडमालातंत्रे॥तर्जन्यानामिकेमध्येकनिष्ठादिक्रमादपि॥
करयोर्योजयित्वाचकनिष्ठामूलदेशतः॥अंगुष्ठाग्रंतुनिक्षिप्ययोनिमुद्राप्रकीर्त्तिता॥स्वतंत्रे॥करसंपु
टौकृत्वाकनिष्ठामूलदेशतः॥अंगुष्ठाग्रंयोजयित्वापरयोनिरितीरिता॥अथनिमस्वदेवतायथा॥
कालिकोपनिषदि॥कालीकपालिनीकुल्लाकुरुकुल्लाविरोधिनी॥विप्रचित्ताउग्राउग्रप्रभादीप्तानी
लाघनाबलाकाचमात्रामुद्रामितान्चैवदशपंचकोणस्यादि॥अथतासांध्यानं॥कालीतंत्रे॥
सर्वाःश्यामाअसिकरामुंडमालाविभूषणाः॥तर्जनींवामहस्तेनधारयंत्यश्चसंमता॥इतिपूर्वादिषु
चरशकोणेक्रमेणध्यात्वावाहयेत्॥तदुक्तंफेत्कारिण्यां॥ततःपूर्वादिकोणेषुवामावर्तेनविन्यसेत्॥
ततःपूर्वादिरस्थलेब्राह्म्यादिश्चप्रपूजयेत्॥तद्यथाकुलसंभारे॥ब्राह्मीमंडलतश्चापिब्रह्माणीनाराय
णीतथा॥माहेश्वरीचचामुंडाकौमारीचापराजिता॥वाराहीचतथापूज्यानारसिंहीतथैवच॥अथ
ध्यानंयथा॥तदुक्तंस्वतंत्रेच॥ब्रह्माणीहंसमारूढांस्वर्णवर्णांचतुर्भुजां॥चतुर्वक्त्रांत्रिनेत्रांचअक्षस्रक्
चैवपंकजं॥अक्षस्रक्चलक्षणं॥छिन्नमूलैःकुशैर्दीर्घैःसप्तविंशतिसंख्यकाः॥अक्षग्रंथियुतास्त्वग्रे
द्वयोःकूर्चरहोच्यते॥दंडंपद्माक्षसूत्रंचदधतींचारुहासिनीं॥जटाजूटधरांदेवींभावयेत्साधकोत्तमः॥१
नारायणींमहादीप्तांश्यामांगरुडवाहनां॥नानालंकारसंयुक्तांचारुकेशींचतुर्भुजां॥घंटांखड्गंकपा २१
लंचचक्रंसंदधतींपरां॥मधुमत्तमदोल्लोलदृष्टिंसर्वांगसुंदरीं॥२॥माहेश्वरीवृषारूढांमुक्तांत्रिनयनान्वितां॥
कपालंडमरुंचैववरदाभयमूलकं॥टंकंचदधतींदेवींनानाभरणभूषितां॥३॥चामुंडामहाहासांविक

दितस्त्रानांभीमवक्त्रां त्रिनेत्रां नीलांभोजप्रभां तां समुदितवपुषां नारमुंडाद्रिमालां॥ खड्गं शूलं क
पालं नरशिरघटितं खेटकं धारयंतीं प्रेतारूढां प्रमत्तां मधुमदमुदितां भावयेच्चंद्ररूपां॥५॥ कौमारीं कुंकुम
भां त्रिनेत्रां शिखिसंस्थितां॥ चतुर्भुजां शक्तिपाशांकुशाभयधारिणीं॥ नानालंकारसंयुक्तां प्रमत्तां
परिचिंतयेत्॥ अपराजीतां च पीताभां मत्तसत्त्ववरप्रदां॥ कमलं मातुलिंगं च दधतीं परिचिंतयेत्॥६
वाराहीं धूम्रवर्णां च वराहवदनां शुभां॥ फलकं खड्गमुशलं हलं वेदभुजैर्धृतां॥७॥ नारसिंहीं नृसिंह
स्य बिभ्रतीं सदृशां वपुः॥ दंष्ट्राकरालवदनां घोररावां नखायुधां॥८॥ अथ पूर्वा दिक्॥ यत्र रवेरुदयः
किमथवा पूज्यपूजकयोरंतर्नीय॥ अत्रागमे सर्वदेवतापूजने पूज्यपूजकयोरंतरेव पूर्वा दिक्॥ नत्व
न्यावशेषवचनात्॥ तदुक्तं शारदातिलकटीकाकारराघवभट्टेन॥ यत्रैव भानुरुत्तुवीयस्युदीतप्राची
तु तां वेदविदो वदंति॥ तथापरां पूजकपूज्ययोश्च सदागमज्ञाः प्रवदंति तज्ज्ञाः॥ अन्यत्र॥ अथ पूर्वमु
खो मंत्री पूजयेत्सुरसुंदरीं॥ यदा॥ देवीसाधकयोरंतः पूर्वाशादिगहोच्यते॥ तंत्रेऽपि॥ होतुः पूर्वं भाग
मुद्दिष्टं पूर्वे सव्यभागं दक्षिणं भागमाहुः॥ दक्षविद्यादुत्तरं भागमग्रे प्रज्ञा विद्धि पश्चिमं भागमुक्तं॥
अग्रभाति स्वसंमुखीमित्यर्थः॥ एतेन देवतापृष्ठमेव प्रतीचि॥ इति बोद्धव्यं॥ यत्तु॥ पुरंदरमुखो मं
त्री पूजयेत्त्रिपुरां परि॥ देवी पश्चात्तदा प्राची प्रतीची त्रिपुरा इति ज्ञानार्णववचनं॥ तत्तु त्रिपुरा
विषयमेवेति बोद्धव्यं देवीमात्रविषयकल्पने मानाभावात्॥ वचनांतरदर्शनाच्च॥ तदुक्तं शांभवीये॥
स्वसंमुखं भवेत्प्राची देवीपृष्ठं तु पश्चिमं॥ सव्यं तु दक्षिणं विद्याद्दक्षिणं सव्यमेव च॥ इत्येवं विधिना
रश्मीदेवता आवाहस्याद्या तमूलां तेऽथो महाकालसहितां दक्षिणाकालिकां तर्पयामीति त्रिः संतर्प्य॥
सायुधां सवाहनां सपरिवारामीपर्यंततर्पयेत्॥ ततोऽष्टादशोपचारैः षोडशोपचारैः पंचोपचारैर्वा र

्यामा वींपूजयेत्॥तदुक्तंस्वतंत्रे॥आवारणेस्मिंतिदलेमूलदेवींचतर्पयेत्॥तर्पयेत्कालिकांदेवींसायु रहस्य
धांसपरिच्छदां॥पाद्यादिभिर्मूलदेवींसंपूज्यतर्पयेत्पुनः॥अथोपचाराणियथा॥तदुक्तंमंत्ररत्नाव
ल्यां॥पाद्यार्घ्याचमनीयंचस्नानंवसनभूषणं॥गंधपुष्पधूपदीपनैवेद्याचमनंतथा॥तांबूलमर्च
नंस्तोत्रंतर्पणंचनमस्क्रिया॥प्रयोजयेत्सर्वनाथामुपचारांस्तुषोडश॥फेत्कारिण्यां॥आसनंस्वाग
तंपाद्यमर्घ्यमाचमनंतथा॥स्नानंवासोपवीतंचभूषणानिचसर्वतः॥गंधपुष्पंतथाधूपंदीपमन्नं
चतर्पणं॥माल्यानुलेपनंचैवनमस्कारंविसर्जनं॥अष्टादशोपचारस्तुमंत्रीपूजांसमाचरेत्॥अन्य
त्र॥आसनंस्वागतंपाद्यमर्घ्यमाचमनीयकं॥मधुपर्काचमनेस्नानंतथावसनभूषणे॥सुगंधंधू
पदीपौचनैवेद्यंस्तोत्रवंदने॥प्रयोजयेत्सर्वनाथामुपचारांस्तुषोडश॥दशोपचारोयथा॥अर्घ्यंपा
द्यंनिवेद्यायतथैवाचमनीयकं॥मधुपर्काचमनंचैवगंधप्रसूनकेततः॥धूपदीपौचनैवेद्यंदशो
पचारकंस्मृतं॥पंचोपचारोयथा॥गंधाद्यानैवेद्यांताःपूजापंचोपचारिकाः॥अथपूजायांविशेषाय
था॥कालीकल्पे॥श्रीपदंपूर्वमुच्चार्यपादुकांपरमुद्धरेत्॥पूजयामिततःपश्चात्पूजयेदंगदेवताः॥का
ल्यादयःपूजनीयाःक्रमेणपरमेश्वरी॥स्वाहांतेभितर्पणंचतर्पयामिचसंस्मरेदिति॥अथक्रमः॥दे
वीदक्षिणेमहाकालंपूजयेत्॥तथाकुमारीकल्पे॥देव्यास्तुदक्षिणेभागेमहाकालंसमर्चयेत्॥का
लिकातंत्रेपि॥महाकालंयजेदादौपश्चाद्देवींप्रपूजयेत्॥इति॥अथमंत्रोयथा॥ ॥ओंक्ष्रांयांरांलां
ह्रांक्ष्रौंमहाकालभैरवसर्वविघ्नान्नाशय■नाशयह्रींह्रीं फट्स्वाहा॥अनेनपाद्यादिभिराराध्य २२
त्रिस्तर्पयित्वामूलदेवींप्रपूजयेत्॥यथा॥मूलमंत्रमुच्चार्य॥एतस्यार्घ्यंमहाकालसहितायै
श्रीदक्षिणकालिकायैनमइतिपाद्यस्थानेदद्यात्॥केषांचिन्मतेतुमहाकालसहितपदसंवलि

तद्देवीनामप्रयोगो न भवतीति सांप्रदायिकाः ॥ एषार्घ्यः स्वाहा ॥ शिरसि दद्यात् ॥ इदमाचमनीय
कं ॥ मधुपर्कं च तथा मंत्रितवरुणबीजांताः ॥ श्रीमुखपंकजे दद्यात् ॥ स्नानीयं नमः ॥ सर्वांगे स्नानीयं
दत्वा समुत्थाप्य मृदुसद्दुकूलेनांगं प्रोक्ष्य विचित्रपट्टवस्त्रद्वयकस्तूरीकुंकुमचंदनसिंदूरकज्जलमु
कुटकुंडलताटंकहारत्रेयवंशस्वस्वर्णकंकणांगदग्रीवाभूषणकांचीनूपुररत्नांगुलीयकाद्याभरणा
नि विविधपुष्परचितमाल्यादीनि निवेद्य वस्त्रजलेन पुनराचमनीयं दद्यात् ॥ तदुक्तं कालीतंत्रे ॥ पा
द्यं च पाद्ये यद्दद्यान्नमोंते तन्मंत्रवित् ॥ शिरोमंत्रेण देवेशी अर्घ्यं दद्याच्छिरोपरि ॥ आचमनं मधुपर्कं सु
सुधामंत्रेण वै मुखे स्नानं गंधं हृदा दद्यात्पुष्पाणि वौषडंतकं ॥ ततो निवेद्य याभीतिर्दद्यात्सर्वमहेश्वरि ॥
सुधामंत्रेणेति वरुणमंत्रेण स्यर्थः ॥ गुप्तार्णवेपि ॥ उपस्पृश्याचमनीयं च त्रिवारं मुखपंकजे ॥ ओष्ण्यतंत्रां
तरे ॥ नमः स्वाहा स्वधा चैव वौषडिति यथाक्रमं ॥ अत्र लिखितवचने स्यात्तत्राह्वानात् ॥ स्वाहा सन्निधेपा
ठः ॥ आचमने स्वधेति वा ॥ ओंकारमध्यपाठो युक्तश्चेति वदंति ॥ तत्र समीहितं ॥ अत्रागमे ॥ प्रायः संके
तेनैव मंत्रोद्धारः क्रियते ॥ एवं मंत्रोद्धारोपि कुत्रापि तत्तदक्षरेण कुत्रापि ज्ञाप्यवर्णद्वैनापि तत्तन्मंत्रो
द्धारादृष्ट इति ॥ तस्मादोंकारमध्यपाठः किंतु ॥ ओंकारमध्यपाठो निर्णीत इति ॥ सत्सांप्रदायिका
वदंति ॥ अन्यथा शारदाटीकाकारराघवभट्टलिखितवचनविरोधमतं तद्यथा ॥ मधुपर्कविष
ये इदमेव सूचनं मधुपर्काचमनयोरेकमंत्रोपादानात् ॥ तस्मात्तत्रापि स्वधेति पाठो युक्त एवेति
निश्चितं ॥ तदुक्तं शारदाटीकायां ॥ मधुपर्कं मुखे दद्यादाचमनमंत्रेण देशिकः ॥ ततो मध्यमानामिकां
गुष्ठैर्गंधेन मर्दितं गंधं ॥ अंगुष्ठतर्जनीभ्यां पुष्पाणि वौषट् ॥ इति पुष्पैरिति समभ्यर्च्य साक्षतं स्वयंभूकु
सुमादिकं च दत्वा ॥ धूपपात्रं फडिति संप्रोक्ष्य ॥ यमिति मंत्रेण पुष्पं दत्वा ॥ पुरतो निधाय ॥ वाम

तर्जन्यां संस्पृशन्॥ धूपं निवेदयामीति। श्रीपात्रामृतेनोत्सृज्य। गजध्यानमंत्रेण मातः स्वाहेति घंटां सं
पूज्य वामेन वादयन्॥ मध्यमानामिकांगुष्ठैर्धूपं धृत्वा देवतागायत्रीं मूलमंत्रं च पठन्॥ त्रिधोत्तोलनं
कृत्वा देवतां धूपयेत्॥ अथ दीपभाजनं संमुखे संस्थाप्य पूर्ववत्पूजनं प्रोक्षणं च कृत्वा। वाममध्यम
या दीपपात्रं स्पृशन्। दीपं निवेदयामीति निवेद्य पूर्ववत्प्रोक्षणं पूर्ववत् घंटां वादयन्॥ मध्यमानामि
कामध्ये दीपपात्रमंगुष्ठाग्रेण धृत्वा दर्शयेत्। ततो मधुद्रव्यं संमुखे कृत्वा॥ ओं कालि कालि महाकालि
हुं हुं अमृतमासवं विधिवत्स्वादुं कुरु कुरु स्वाहा॥ इति मंत्रेण सप्तधाभिमंत्र्य। त्रिखंडग्रासमुद्रया
पात्रमादाय। दक्षिणपाणिना मुष्ट्यादिकं गृहीत्वा कनिष्ठांगुष्ठाभ्यां संयोज्य मूलमंत्रान्ते इदं सुध्यादि
सहितमासवं निवेदयामीति दद्यात्॥ ततो नैवेद्यं सुवर्णादिपात्रे कृत्वा त्रिकोणमंडलोपरि पुरतः सं
स्थाप्य। ह्रीमित्यवगुंठ्य। यमिति वायुबीजेन संशोष्य। रमिति वह्निबीजेन संदह्य। वमिति धेनुमु
द्रामृतीकृत्य। मूलं तदुपरि सप्तधा प्रजप्य वामांगुष्ठेन नैवेद्यपात्रं स्पृशन्॥ नैवेद्यं निवेदयामीति द
क्षिणहस्तेन दर्शयेत्॥ ततो दक्षहस्तानामिकांगुष्ठाभ्यामुत्सृजेत्॥ ततः पुनराचमनं दत्वा। कर्पूरा
दियुक्तं तांबूलं वामांगुष्ठेन धृत्वा तांबूलं निवेदयामीति तत्वमुद्रया दद्यात्॥ सर्वमेवार्घ्यजलेनोत्स
र्गः कार्यः॥ ततस्तत्वमुद्रयार्घ्यामृतेन देवीं त्रिः संतर्प्य पूर्ववद्योन्यादिमुद्रादिकं कुर्यात्॥ दर्शयेत्॥
तदुक्तं तंत्रांतरे॥ मध्यमानामिकाभ्यां तु अंगुष्ठाग्रेण पार्वति॥ दद्याद्वा विमलं गंधं मूलमंत्रेण देशिकः।
अंगुष्ठतर्जनीभ्यां तु यत्नेन पुष्पं निवेदयेत्॥ यथा गंधं तथा देवि धूपं दद्याद्विचक्षणः॥ मध्यमानामि २३
काभ्यां तु मध्यपर्वे निरोधकः॥ अंगुष्ठाग्रेण देवेशि धृत्वा धूपं निवेदयेत्॥ उत्तोलनं त्रिधा कृत्वा
गायत्र्या मूलयोगतः॥ तत्वाख्यमुद्रया देवि नैवेद्यं तु निवेदयेत्॥ मूलेनाचमनं दत्वा तांबूलं तेन मुद्रया।

तेनतत्वेनेनिसामान्यविशेषेणान्वयः॥शारदाटीकायामपि॥धूपभाजनमस्त्रेणप्रोक्ष्याभ्यर्च्य
स्त्राधुना॥मंत्रेणरजितांघंटांवादयन्गुग्गुलंदहेत्॥अन्यत्रापि॥गजध्वानततोमंत्रमातःस्वा
हेत्युदीर्यच॥अभ्यर्च्यवादयन्घंटांसुधूपधूपयेत्ततः॥केचांतरेव॥ततःसमर्पयेद्धूपंघंटावाद्यं
जयस्वनैः॥दीपश्चदानेपि॥घंटावाद्यमितिसांप्रदायिकाः॥राघवभट्टः॥अथगंधादिनिवेदनस्थ
लंयथा॥यामले॥निवेदयेत्पुरोभागेगंधपुष्पंचभूषणं॥दीपंदक्षिणतोदद्यात्पुरतोवामभागतः।
वामतस्तुतथाधूपमग्रेवानतुदक्षिणे॥नैवेद्यंदक्षिणेभागेपुरतोवामपक्षतइति॥दीपभी॥तद्य
तयुक्तेन्वेद्दक्षिणे॥तैलयुक्तंचद्वामे॥इतिसांप्रदायिकाः॥एवंशीतावर्तिर्भवेदक्षिणेरक्तावर्तिश्चेद्वा
मतइति॥राघवभट्टेन॥सम्मुखेतुननियमः॥वामदक्षिणभागस्तुदेवतायाःएवनतुसाधकस्य
क्वचनांतरदर्शनात्॥धूपदीपौसुभागेपचदेवताग्रेनिवेदयेत्॥नैवेद्यमितिसर्वंचेदक्तावामे।
आमंचेद्दक्षिणइतिवोध्यं॥स्वभपक्वापक्वभेदान्नैवेद्यंकल्पनीयं॥अथपुष्पनियमोयथा॥
मुंडमालातंत्रे॥पुष्पाण्यपितथादद्यात्रक्तरक्तअमितानिच॥श्वेतरक्तजयापुष्पेकरवीरंचतथा
प्रिये॥तगरंमल्लिकाजातिमालतीयूथिकातथा॥धूसराशोकवकुलंवेलकद्यमापराजिता॥व
कपुष्पंबिल्वपत्रंचंपकंनागकेसरं॥मल्लिकाझिंटिकाकांचिरक्तयत्पीतकार्तितं।अर्कपुष्पज
यंतीचकर्चनंचप्रियंवदे॥अष्टम्यांचविशेषेणतुष्टाभवतिपार्वती॥पद्मपुष्पेणरक्तेनसंतुष्टा
सर्वदेवताः॥रुधिरंचयदिद्याच्छुक्लंकालिकावरदाभवेत्।श्मशानेदुत्तरस्यैवतुष्टाधूमाव
तीपरा॥वनपुष्पैश्चविविधैःसंतुष्टादेविपार्वति॥अमलक्यास्तुपत्रेणतुष्टाभवतुपार्वती॥अष्ट
म्यांचचतुर्दश्यांनानापुष्पैःसमर्चयेत्॥विशेषवाद्यानिभौमादिनेवापिनवमीनिच॥मत्स्यसू

ल्कोपि॥ सुगंधिभिश्चतल्लोहितकुसुमैरर्चयेद्दले॥ बिल्वैर्मरुबकाद्यैश्च तुलसीवर्जितैः शुभैः॥ ओड्र

पुष्पैर्विशेषेण रजःपुष्पेण मिश्रितैः॥ सर्वपुष्पमयस्यात्र भक्तियुक्तेन चेतसा॥ शारदातिलकायां॥ सर्वैः
पुष्पैः सदा पूज्या विहिताविहितैरपि॥ कर्त्तव्या सर्वदेवानां भक्तिर्योगोत्रकारणं॥ देवानामप्युपलक्षणं॥
देवीनामिति बोद्धव्यं॥ तदुक्तं योगिनीतंत्रे॥ देवीपूजा सदा शस्ता जलजैः स्थलजैरपि॥ विहितैर्वानिषि
द्धैर्वा भक्तियुक्तेन चेतसा॥ नीलतंत्रे॥ नानोपहारबलिभिर्नानापुष्पैर्मनोरमैः॥ अपामार्गदलं भृंगैस्तु
लसीदलवर्जितैः॥ पूजनीया सदा भक्त्या नूनं शीघ्रफलाप्तये॥ अथ पुष्पदानविधानं यथा॥ तदुक्तं फे
त्कारिणीतंत्रे॥ पुष्पं वा यदि वा पत्रं फलं नैव भधोमुखं॥ दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्पणं॥
अधोमुखं फलं चैव पुष्पांजलिविधौ न तु॥ अथ नैवेद्यं॥ तदुक्तं मत्स्यसूक्ते॥ पायसं कृसरं दध्याज्य
शर्करागुडसंयुतं॥ गव्यं सर्पिर्मधुपयस्तथान्यानि निवेदयेत्॥ रयालमत्स्यंच पाठीनं गोधामांसम
नुत्तमं॥ अन्नंच मधुनायुक्तं यत्नाद्दद्यात्त्र्यंबकंत्रीवित्॥ शालमत्स्यंच पाठीनं गोधामांसमनुत्तमं
कृसरमिति॥ तिलतंडुलः पाठीनं। चेरालमिति। अन्यत्रापि॥ कंदुपक्वं स्नेहपक्वं घृतसंयुक्त
पायसं॥ मनःप्रियंच नैवेद्यं दद्याद्देव्यैः प्रयत्नतः॥ कंदुपक्वमिति भ्रष्टतंडुलपृथुकादिकं॥ स्ने
हपक्वं वटकादि॥ कुमारीकल्पेपि॥ तांबूलंच सकर्पूरं नारिकेलं सशर्करं॥ जंबीरपनसंचैव मा
भ्रातकफलं तथा॥ कदलीतिंतिलीं देवी श्रीफलं फलमुत्तमं॥ करंजंचकुलंचैव तालखर्जूरमेवच
अन्यानिच सुगंधीनि स्वादूनिच फलानिच॥ मुंडमालातंत्रेपि॥ दधिक्षीरं गुडंचान्नं पायसं शर्क २४
रान्वितं॥ पायसं स्वोद्रमांसंच नारिकेलं समोदकं॥ शालाकं मेषखडुं च सार्द्रकं सहशर्करं॥ रंभा
घृतं लडुकंच भर्जितान्नंच पिष्टकं॥ शालमत्स्यंच पाठीनं सकुलं मुद्गरं तथा॥ जलजं मत्स्यं॥

मधुजं चोलिङ्गं तथा मांसं माहिषमेव च ॥ पक्षिमांसं वराहस्य मांसं नानारसमुद्भवं । कूर्मछा
गमहामांसं गोधिकाहरितं तथा ॥ जलजं मत्स्यमांसं च गण्डकामांसमेव च ॥ नानाव्यंजनसंयुक्ता
नि दुग्धानि च बहूनि च ॥ तंत्रांतरेपि ॥ नराश्वागास्तथा मेषा माहिषा नत्रान्त्राकास्तथा ॥ एतेषां चै
व रक्तानि देयानि परमेश्वरि ॥ न खड्गं कदाचन महेशानि कार्यं नान्येन त्स्यर्थः ॥ तदुक्तं यामले ॥ राजान
र्वलिर्देयान्नान्योपि परमेश्वरि ॥ अथ नैवेद्यपात्रं यथा ॥ रुद्रयामले ॥ तैजसेषु च पात्रेषु सौवर्णरा
जतेन तथा ॥ ताम्रे वा प्रस्तरे वापि पद्मपत्रेथवा तथा ॥ पद्मदारुमये वापि नैवेद्यं कल्पयेद्बुधः ॥ सर्वा
भावे नमाहेयस्य हस्तपात्रे तयादि । यथा योग्यमर्घ्यपात्रे तु तद्दुधाय निवेदयेत् ॥ अन्यतो यैर्यद्दत्त
श्च मध्यपात्रे स्थिते तरैः ॥ न गृह्णाति महादेवी दत्तौर्विविधैरतैरपि ॥ एषामन्यतमे पात्रे कृत्वा नैवे
द्यमर्पयेत् ॥ नैवेद्यक्रममत्राभ्यस्य तंत्रे तंत्रे ॥ दक्षिणे वा पुरोभागे वामे वामं अलं लिखेत् ॥ त्रिकोण
वृत्तभूविंबमाधारं शक्तिमर्चितं ॥ नैवेद्यं तत्र संस्थाप्य प्रोक्षयेद्रक्षमंत्रतः ॥ कवचेनावगुंठ्येतं
मूलं संशोष्य वायुना ॥ रतिबीजेन संदह्य अमृतेनामृतीकृतिः ॥ पुष्पं दत्वा तत्र मंत्रं सप्तधा प्रजपे
त्सुधीः ॥ ततः समुत्सृजेद्रत्नपात्रस्थैर्मूलादि मंत्रितः ॥ सर्वोपकरणादीनि मूलांते नाभिवेदयेत् ॥ अ
शक्तौ मनसा दद्यात्स्वक्रर्मे न लोपयेत् ॥ चुलकं प्रदाय तत्र पंचमुद्राः प्रदर्शयेत् ॥ प्राणापा
नौ तथा व्यान उदानश्च समानकः ॥ चतुर्थ्यंता स्वाहायां ता मुद्रा मंत्रा स्वाहांतिकाः ॥ कनिष्ठा नामा
कनिष्ठाभिः प्राणमुद्रा समीरिताः ॥ समानमुद्रा सर्वाभिरंगुलीभिरितीरिताः ॥ वामहस्ते ग्रास
मुद्रा विकस्योत्पलसन्निभा ॥ ततः सुवासितजलं दद्यात्स्वर्णादिभाजने ॥ पुनश्चुलुकं दत्वा द
द्यात्तांबूलमुत्तमं ॥ एलालवंगकर्पूरजातीफलपरिस्कृतं ॥ सर्वाण्येतान्यर्घ्यजलैर्देयानि ॥

रयामा अर्घ्यपात्राणिपुनः॥श्रीतत्वचिंतामणावनुसंधेयानि॥अथकृतांजलिः श्रीदक्षिणेकालिकेनाे रहस्
वरणं पूजयामीसाज्ञांगृहीत्वा॥अग्नीशासुरवायव्यासंमुखेषुचदिक्ष्वस्त्रंचषडंगदेवताध्यात्वा
षडंगमंत्रेणार्चयेत्॥तदुक्तंज्ञानार्णवे॥अग्नीशासुरवायव्यमध्यदिक्ष्वस्त्रदेवताः॥हृदयं
मग्नेय्यामैशान्यांतुशिरोयजेत्॥यजेत्पुरतोस्त्रंदिक्षुशस्त्रमथार्चयेत्॥अपिच॥वन्ह्यादिदिक्षु
वापूज्यंनेत्रंतदंगेषुचाक्रमात्॥अथषडंगदेवताध्यानंयथा॥तदुक्तंज्ञानार्णवे॥तुषारस्फटिकश्या
मनीलकृष्णारुणास्तथा॥वरदाभयधारिण्यःप्रधानतोनवस्त्रियइति॥ततोगुरुपंक्तिक्रमेणैवादिशं वाय
तेयजेत्॥तदुक्तंशारदाटीकायां॥वायव्यादिदिग्पर्यंतंगुरुपंक्तिंसमर्चयेदिति॥तदुक्तोगुरुचतु
ष्टयंवागुरुत्रयंचततोदेवताऋषिर्मिति॥अथगुरुपंक्तिर्यथा॥भावचूडामणौ॥भैरवउवाच॥मा
तर्देवीमहाभागेबंधमोक्षप्रवर्धिनी॥इदानींश्रोतुमिच्छामिगुरुक्रममनुत्तमं॥देव्युवाच॥गुरुक्रम
स्तुबहुधाग्रंथेविस्तरगौरवात्॥कालानाम्यनादित्वात्कथंतत्कथयामि ते॥नज्ञातात्तत्कुलेदेवन
ष्टमार्गोभविष्यति॥नष्टमार्गोन्मंत्रविधेनताहग्फलगोचरे॥गुरूणांशिष्यभूतानांनास्तिचेत्संततिक्र
मः॥तंत्रमंत्राश्चविद्याश्चनिष्फलानात्रसंशयः॥विंशतिःपुरुषावापिनवसप्तत्रयोपिवा॥नज्ञात्वा
गुरुवंशानांशिष्यश्चेन्नष्टसंतति॥स्ववंशादधिकंज्ञेयंगुरुवंशंमहाशुभे॥जनकादधिकोज्ञेयो
मंत्रदस्तुमहेश्वरः॥तस्मात्सर्वत्रदेवत्वासंक्षेपाच्छृणुतान्गुरून्॥आदौसर्वत्रदेवेशीमंत्रदःप
मोगुरुः॥परापरगुरुस्त्वंहिपरमेष्ठीगुरुस्त्वहं॥सर्वमंत्रेषुविद्यासुस्वयंप्रकृतिरूपिणी॥ततः २५
पुरुषरूपश्चततश्चगुरुसंततिः॥तेनेवाहिगदूशाश्चभक्ताश्चविशेषतः॥सर्वमंत्रेषुगुरवःसर्व
त्रःसिद्धिदायकः॥शाक्ताःशैवाश्चयेविद्यास्तेपिसर्वत्रदीक्षकाः॥गणेशगाणपत्याश्चगणदीक्षा

प्रभूर्मता ः॥ सौरास्तथा वत्स चिरस्मुर्ये वाचिरूपपरायणाः॥ दिव्यौघा गुरवो देवि सिद्धौघा गुरवस्त
था॥ मानवौघाः समासेन कथयामि तवानघ॥ सर्वमंत्रेषु तंत्रेषु प्रोक्तं मंत्रचतुष्टयी॥ नवादौ कालिकाद्वी
तस्याः शृणु गुरुक्रमं॥ महादेवी महादेव त्रिपुरश्चैव भैरवः॥ दिव्यौघा गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते॥
ब्रह्मानंदः पूर्णदेवश्चलचित्तश्चलाचलः॥ कुमारः क्रोधनश्चैव वरभीमसेनः सुधाकरः॥ मीनो गोरक्षकश्चैव भोज
देवः प्रजापतिः॥ मूलदेवो रतिदेवो विघ्नेश्वरहुताशनौ॥ समयानंदसंतोषौ कालिकागुरवः स्मृताः॥ अत्र
देवी श्रीभैरवीवाक्यं॥ दिव्यौघा वसंति स्वर्निलये सिद्धा भूमौ विहारिणश्च॥ मानवौघा मानवेषु भ्रमरूपध
राः सदा॥ आनंदनाथशब्दांते गुरवः सर्वसिद्धिदाः॥ स्त्रियोऽपि गुरुरूपाश्च देवतास्ताः परिकीर्तिताः॥
मानवौघांतिके देवी स्वगुरुं परिपूजयेदिति॥ अथवा प्रातःकृत्येय सामान्यगुरुः॥ कुलमुक्तं तदे
वार्चयेत्॥ तदुक्तं भावचूडामणौ॥ अथवा सर्वशाक्तेषु गुरवः पूर्वसूचितः॥ कुलचूडामणौ च॥ एक
चित्तमना भूत्वा शृणु वत्स समाहितः॥ येषु येषु च मंत्रेषु येयऋषिगणाः स्मृताः॥ तत्तेपूज्याः सपर्या
दौ संक्षेपात्कथितं मया॥ आज्ञात्वा गुरुनाम्ना वै गुरुस्त्रितयमर्चयेत्॥ चतुष्टयं वा संक्षोत्वा नन्यकार्यं
ततःपरं॥ गुरुः परमगुरुश्चैव परात्परगुरुस्ततः॥ परमेष्ठीगुरुश्चैव कथिता गुरवस्तथा॥ गुरुपूजां वि
ना वत्स यदि पूजां समाचरेत्॥ तद्दोषवशादेवत्सकुलं पूजां समाचरेत्॥ विगुणं मंत्रयंत्रं स्यात्सगुणं
कुलपूजनात्॥ कुलाय लोकनंद्येत्स्या कुलप्रक्षाणभाजनं॥ कन्यास्नानं च ना शुद्धिः कन्यया
सिद्धिर्न्नायनं॥ दीक्षाप्रभृत्कुलीनश्च कुले वा बहुकेश्वरः॥ तदेहागुरुमानी स्यात्कुलरूपगुरुं स्मरेत्॥
कुलयथा गुरुस्तत्र न तथा कुलसाधकः॥ गुरुक्रमं च कथितं गोपनीयं प्रयत्नतः॥ नंदेयं यत्र कुत्रापि
योगभ्रष्टस्य पुत्रके॥ नन्यो रिक्तमनश्चैव तन्नामग्राह्यं कुलेश्वरः॥ शैशवे शाक्ततंत्रे वा गाणपत्येऽथवा पुनः॥ प

श्यामा निजगुरुंपुराध्यात्वाततोगुरुचतुष्टयं॥पूजयित्वाजपेद्देवंनैवसंकोचमाचरेत्॥अथप्रयोगः॥ ॥ रहस्य
श्रीमहादेव्यंबाश्रीपादुकांपूजयामिनमः॥एवंसंपूज्यपूर्ववत्तर्पयेत्॥गुरुपात्रामृतेनत्रिःसकृद्वा
तर्पयेत्॥एवंश्रीमहादेवानंदनाथगुरुश्रीपादुकांपूजयामिनमः॥इतिसंपूज्यपूर्ववत्तर्पयेत्॥
गुरुरूप एवंक्रमेणगुरुपंक्तित्रयंसंपूज्यमानवौघंत्रयंपूजयेत्तर्पयेच्च॥ततोरश्मिन्वृंददेवताःतर्पयेत्पू
जयेच्च यथा॥बाह्यत्रिकोणस्यसंमुखकोणेओंकालीश्रीपादुकांपूजयामिनमः॥इतिपाद्यादि
भिस्त्रिःसंपूज्ययोगिनीपात्रामृतेनतत्त्वमुद्रयात्रिःसकृद्वातर्पयेत्॥एवंदेव्यावामेःओंकपालि
नीदक्षेओंकुल्लातदंततःस्त्रिकोणेओंकुरुकुल्लाओंविरोधिनीओंविप्रचित्तातदंतस्त्रिकोणेओंउ
ग्राःओंउग्रप्रभाओंदीप्तातदंतस्त्रिकोणेओंनीलाः।घनाः।बलाकाः।तदंतस्त्रिकोणेओंमात्राःओंमुद्रा
ओंमीनाः।पाद्यादिभिःपूर्ववत्तर्पयेच्च॥देव्यादक्षिणेमहाकालंपूजयेत्॥तदुक्तंकुमारीकल्पे॥
देव्यास्तुदक्षिणेभागेमहाकालंसमर्चयेत्॥ततोष्टदलेपूर्वादिक्रमेणाष्टशक्तिःपूजयेद्यथा॥पूर्वेओंआं
ब्रह्माणीश्रीपादुकांपूजयामिनमः॥इतिपाद्यादिभिस्त्रिःसंपूज्यतर्पयेत्॥अग्निकोणेओंईनाराय
णीदक्षिणेओंऊंमाहेश्वरींनैर्ऋत्यांओंऋंचामुंडांवारुण्येअंलृंकौमारींवायौःओंऐंअपराजि
तांउदीच्यांओंऔंवाराहीं।ईशान्येओंअःनारसिंहींपूर्ववत्पूजयेत्तर्पयेच्च॥तदुक्तंश्रुतौहीती
य्यचलुःषष्टाष्टदलद्वादशचतुर्दशषोडशास्वरभेदेनप्रथमेणयंत्रमंत्रक्रमेणनाहृणंपूजनमि
ति॥कुमारीकल्पेपि॥ब्राह्म्याद्याःपूजयेत्तत्रपत्राग्रेभैरवान्यजेत्॥लोकपालांस्ततोबाह्येतद २६
स्त्राणिचततोबाह्यद्वारेहः॥अथभैरवायथाज्ञानार्णवे॥ओंअसितांगोरुरुश्चंडःक्रोधश्चोन्मत्तभैरवः॥
कपालीभीषणश्चैवसंहारश्चाष्टमस्मृताः॥एषांमंत्रोयथा॥स्वरवार्णबिंदुसंयुक्तावाद्यायांबिंदु

५८

भूस्रता॥ इति॥ अत्र प्रयोगः॥ फत्रागे पूर्वादिवामावर्त्तेन यजेद्यथा॥ ओं ऐं ह्रीं अं असितांगभै
रवश्रीपादु० एवं॥ ऐं ह्रीं रुं रुरुभैरवं० ऐं ह्रीं चं चंडभैरवं० ऐं ह्रीं क्रं क्रोधनभैरवं० ऐं ह्रीं उं उन्मत्तभैरवं०
ऐं ह्रीं एं एकपालीभैरवं० ऐं ह्रीं भीं भीषणभैरवं० ऐं ह्रीं सं संहारभैरवं० पूर्ववत्पूजयेत्तर्पयेच्च॥ यथा
पूर्वादितः लं इंद्रपादुकां पूजयामि नमः। एवं रं वह्निं। यं यमं। क्षं निर्ऋतिं। वं वरुणं। यं वायुं। कुं कुबे
रं। हौं ईशानं। इंद्रेशानयोर्मध्ये ह्रीं ब्रह्माणं। निर्ऋतिवरुणयोर्मध्ये अं अनंतं। पूर्ववत्पूजयेत्तर्प
येच्च॥ चतुरस्रबाह्ये। एतेषामस्त्राणि तत्तत्स्थलेषु यजेद्यथा॥ एवं वं वज्रपादुकां पूजयामि नमः।
शं शक्तिं। दं दंडं। खं खड्गं। पां पाशं। अं अंकुशं। गं गदां। शुं शूलं। पं पद्मं। चं चक्रं। एवं क्रमेण सर्वा
वरणदेवताः अनुलेपनगंधपुष्पधूपदीपपानद्रव्यादिभिः संपूज्य त्रिः सकृद्वा तर्पयेत्॥ तदुक्तं
ज्ञानार्णवे॥ त्रिवारं तर्पयेद्वापि अथवा स्कोतुयथेच्छयाइति॥ कालीतंत्रेपि॥ सर्वासामपिदातव्याब
लिपूजा तथैव च॥ अनुलेपनगंधं च धूपदीपान्नपानकं॥ त्रिः पूजा च प्रकर्त्तव्या सर्वासामपि साध
कैः॥ ततो देव्या अस्त्राणि पूजयेद्यथा॥ देवीवामोर्ध्वहस्ते ओं खड्गं। तदधो ओं मुंडं। दक्षोर्ध्वे ओं अ
भयं। तदधः ओं वरं। पूजयेत्तर्पयेच्च। तदुक्तं यामले॥ ततः संपूजयेद्देव्या अस्त्राणि क्रमयोगतः॥
वामे खड्गं च मुंडं च दक्षिणे च वराभय॥ ततः षडंगन्यासं विधाय पूर्ववद्देवीं ध्यात्वा गंधपुष्पाक्षत
धूपदीपं दत्वा पूर्ववत् घंटां वादयन्॥ धूपदीपान्दर्शयेत्॥ ततः पानादिद्रव्यं दत्वा पूर्ववन्नैवेद्या
दिकं निवेद्य त्रिस्तर्पयेत्॥ ततः पुष्पांजलित्रयेण देवीं संपूज्य सायुधसवाहनसपरिवार महाका
लसहितश्रीदक्षिणकालिकां पूजयामि नमः इति पुष्पांजलित्रयेण त्रिस्तर्पयेत्॥ ततो योनिमुद्रा
दिकं पूर्ववद्दर्शयेत्॥ तदुक्तं स्वतंत्रे॥ ततः पुनर्मूलदेवीं मुद्रातर्पणपूजनैः॥ अर्चयित्वा जपं कुर्यात्तानता

विसर्जयेत्सुधीः ॥ कालीतंत्रेपि ॥ एवं पूजां पुरा कृत्वा नियमेन यथाविधिः ॥ नैवेद्यादीन्यथाश
क्तिदद्याद्देव्यै पुनः पुनः ॥ ततो वै दशवारं तु दीपं दत्वा च साधकः ॥ पुष्पादिकं पुनर्दद्यान्मूलेन च यथा
विधि ॥ कुमारीकल्पेपि ॥ ततो नीराजनं कुर्याद्दशवारं प्रदीपकैः ॥ इति ॥ अथानंतरं त्रिकोणमंडलमा
लिख्य । मांसमीनरक्तपुष्पाद्यन्नतंदुलानेकीकृत्य तत्र संस्थाप्य संशोध्य च ॥ ओं क्रीं मूलमंत्रोच्चार
त्वा श्रीदक्षिणायै कालिकायै स्वाहा एष बलिर्नमः इत्युत्सृज्य नैर्ऋत्यां धारयेत् ॥ तदुक्तं स्वतंत्रे ॥ पूजां
ते भोजनादौ तु बलिं दद्यान्महेश्वरी मित्ति ॥ ततः प्राणायामं कृत्वा कामकलां विभाव्य शिरसि गुरुं ध्या
त्वा हृदि देवीं भावयन्मनसा अष्टोत्तरसहस्रं रहस्यमालया वा सेतुं दत्वा प्रजप्य पुनः प्राणायामं विधा
यार्घ्यजलपुष्पादिकं गृहीत्वा ॥ ओं गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु मे देवि त्व
त्प्रसादान्महेश्वरी ऐं ह्रीं ह्सौं क्रीं स्त्रीं ओं हूं ॥ तदुक्तं भैरवतंत्रे ॥ योनिरेव भूतिनी चैव बीजाख्या सुनाशिनी ॥ दानवध्वंसिनी व्याख्या
ले श्रीहानाक्रमेणत्याप्रसादान्महेश्वरी ॥ इति मंत्रेण तेजोमयं जपजलं देव्या वामहस्ते समर्पयेत् ॥
तदुक्तं कालीतंत्रे ॥ ततः सा वाहितो मंत्री गुरुं नत्वा शिरस्थितं ॥ देवीं ध्यात्वा चाष्टोत्तरसहस्रं जपेन्मनुं
तेजोमयं जपफलं देव्या हस्ते समर्पयेत् ॥ गुह्यातिगुह्यगोप्त्री त्वमिति तंत्रेण मंत्रवित् ॥ रहस्यमा मं
लया वर्णमाला करमाला च ॥ तत्र रहस्यमाला यथा ॥ तदुक्तं कालिकुलार्णवे ॥ ओं ह्रीं श्रीं क्रीं क्लीं हूं
फट् स्वाहा ॥ इति मंत्रेण सप्ताभिमंत्र्य च षट्कोणे निक्षिपेत् ॥ तत्रावाहनादि मंत्रादिभिर्भगवतीं समावा
ह्य सपरिवारां भगवतीं षोडशोपचारैरभ्यर्च्य मूलमावर्त्य दश धाता तां त्र्यंबीजमनुस्मरन् धेनुमुद्रया २७
मृतीकृत्य कवचेनावगुंठ्य महामुद्रया तां मायया देवीरूपां तां मालां ध्यायन् बिंदुप्रक्षेपं कुर्यात् ॥
तत्र मंत्रः ॥ ओं ह्रीं स्वाहा ओं फट् स्वाहा ओं स्त्रीं स्वाहा ओं ह्रीं हूं फट् स्वाहा ॥ ओं क्षीं फट् स्वाहा अनेन मं

त्रेण बिंदु प्रक्षेपं कुर्यात्॥ कस्तूरिकासुधाकागुरु धूपादिकं दत्वाच षकारात्तीर्याभिमंत्रयेत्॥ त
त्रमंत्रः॥ ओं ह्रीं श्री महावज्रिणी घोररूपे कर्कन्तु महार विमंडल प्रविश्य सर्वसिद्धिं प्रयच्छ ओं हूं
ह्रीं ह्रीं स्वाहा महाकपालिनी घोररूपे स्वाहा॥ ओं ह्रीं ह्रीं हूं फट् स्वाहा दूर्वाक्षतैरभ्यर्च्य कामबीजेनो
द्दीपनं कृत्वा थाउच्चारेरभ्यर्च्य मातृका मंत्रेण संदीप्य हूंकारेण वेष्टयित्वा बलिं दद्यात्॥ तद्यथा॥ ओं
ह्रीं श्रीं हूं हूं ओं फट् हूं ऐं ओं हूं स्वाहा ओं हूं महायोगिन॥ त्रिभुवनतारिणी महाशंखास्थिमालामध्ये
निवासं कुरु कुरु सर्वसिद्धिं देहि देहि सुरामांसोपहारान् गृह्ण गृह्ण गृह्णापय २ ह्रीं क्रीं हूं फट् स्वाहा॥
अनेन यथाचितद्रव्येण बलिं दत्वा विसर्ज्य मालां निभृतस्थाने स्थापयेत्॥ इति काकुलार्णवे शंख
८ मालाशोधनं नाम विंशतितमः पटलः॥ ॥ अथ वर्णमाला यथा॥ तदुक्तं ली
विशुद्धेश्वर महातंत्रे॥ मालाविधानं परमं शृणु पार्वति तत्वतः॥ येन विज्ञानमात्रेण मंत्राः सिध्यंति
तत्क्षणात्॥ अनुलोमविलोमेन मंत्रमातृर्थभेदतः॥ मंत्रेणांतरितार्णस्य वर्णेनांतरितं मनुः॥ कुर्या
न्मंत्रमयीं मालां सर्वमंत्रप्रदीपिनीं॥ परमार्णं मेरुरूपं लंघनं नैव कारयेत्॥ एतत्परम रहस्यं मयोक्तं
ते यत्राश्विनीं लया गुप्तनं कार्यं नाख्येयं यस्य कस्यचित्॥ मत्तांतरमुक्तं यामले यथा॥ सबिंदुवर्ण
मुच्चार्य पश्चान्मंत्रं जपेत्सुधीः॥ क्षे मेरुकं कल्पयित्वा जपेत्तत्राति लंघयेत्॥ अकारादि क्षकारांता
वर्णमाला प्रकीर्तिता॥ सबिंदु वर्णमुच्चार्य पश्चान्मंत्रं जपेत्सुधीः॥ अनुलोमविलोमेन क्षकारं मेरु
मान्वेरत्॥ अथ मुक्ताफलमयी चतुर्वर्गप्रदायिनी॥ वाग्सिद्धिश्च तथामाला स्फटिकेन विनिर्मिता॥
रुद्राक्षमालिका मोक्षं भवेत्सर्वसमृद्धिदा॥ प्रवालमाला वश्ये तु सर्वकामार्थसाधिका॥ पुत्रजीविक
मालातु लक्ष्मी विद्याप्रदायिनी॥ पद्माक्षमालया लक्ष्मीर्जायते सुमहीयसी॥ रक्तचंदनमालातु वश्ये॥

यामा भाग्यदा भवेत्॥ स्वर्णरौप्येन घटिता माला कामप्रयच्छति॥ निर्मिता सप्तमानाभिः कुरुते कीर्त्तिमुत्तमां॥ रहस्य
सर्वैरेभिर्विरचिता माला स्यान्मुक्तिसिद्धये॥ पंचविंशतिभिर्माला बीजैर्मोक्षैः प्रकल्पयेत्॥ सप्तविंशति
भिः पुष्टौ त्रिंशद्भिर्मोक्षकर्मणि॥ त्रिंशद्भिः पंचसप्ताभिरभिचारककर्मणि॥ पंचाशद्भिश्च बीजैर्या माला
सा सर्वकर्मणि॥ चतुरुत्तरैर्या माला काम्यकर्मफलप्रदा॥ अष्टोत्तरशतैः सर्वा सिद्धिदा चापवर्गदा॥ अ
धिका स्यान्महद्दोषा न तु सिध्यन्ति साधकाः॥ शुक्लं रक्तं तथा कृष्णं शांतिवश्याभिचारके॥ सूत्रं सपा
दयेद्विद्वांस्त्रैसूत्रमथ चापि वा॥ ऊर्णाभिर्वा सनैर्वापि पिशोभिर्मालाग्रकीर्त्तिना॥ कार्पासैर्वैस्त्वथवा माला
पट्टसूत्रैरथापि वा॥ फेत्कारिणीतंत्रे॥ उच्चारनेमार्कनैकसूत्रं लोहस्य सूत्रं खलु मारणे च॥ पट्टस्य सूत्र ट
ं मरुतेष्टशीयेत्कार्पाससूत्रं खलु सर्वसिद्धौ॥ गृहीत्वा संस्कृतां मालां चंदनेन प्रपूजितां॥ समाश्रित्य
जपेद्धिया कल्प्यमानेन साधकः॥ संख्यापूर्णे निजद्रव्यं जपसंख्या दशांशतः॥ यद्वा जपं चतुर्थांशं स्वा
हांतं मंत्रमुच्चरन्॥ यथोक्तकुंडे जुहुयाद्यथाविधि समाहितः॥ अथवा प्रत्यहं जप्त्वा जुहुयात्तद्दशांशतः॥
अथ वक्ष्यामि मालायाः संस्कारं सर्वसिद्धिदं॥ अप्रतिष्ठितमालाभिर्मंत्रं जपति यो नरः॥ सर्वं तद्विफ
लं विंद्यात्क्रुद्धा भवति देवता॥ कांतयारचितासा तु द्रुतसिद्धिकरी स्थिरा॥ यथा॥ ऊर्ध्वं तु त्रिवृत्तं
कार्यं तत्तु त्रयमधोवृतं॥ मुण्यस्त्री रचितं सूत्रं कार्पासं पद्मसंभवं॥ मूलाग्रं च पठन् सूत्रं बीजं प्रक्षा
लयेत्ततः॥ एकैकं मणिमादाय ब्रह्मग्रंथिं प्रकल्पयेत्॥ ग्रंथिहीनं प्रकर्त्तव्यं स्पृष्टास्पृष्टेन न २८
नश्यति॥ नैवं चैव भवेत्सारगणे श्रेष्ठी करोपि च॥ बीजस्पर्शं पुनः कुर्यात्तत्र नास्ति विचारणा॥
यदि स्याद्ग्रंथिहीना स्यात्छिरव्यं तेत दशेषतः॥ कालिका तारिता याश्च शाक्ता याः षड्भेदतः॥ तोतला
वन्वासिन्या वाराह्याश्चाश्च योजयेत्॥ अनुलोमविलोमाभ्यां मातृकां तारितां न्यसेत्॥ पंचगव्ये क्षिपेन्मा

लांशिवमंत्रेणमंत्रितां॥सद्योजातेनगंधाद्यैर्वामदेवेनघर्षयेत्॥धूपितांमघोरेणलेपयेत्पुरुषेणतु॥
मंत्रयेत्तच्चमेनैवमंत्रेनानेनमंत्रवित्॥सद्योजा०वामदेवा०अघोरेभ्यो०तत्पुरुषा०ईशानःसं०द्रांत
ऋ पंचवक्त्रविधिर्नश्शक्तिविषयमता॥ततोःसमीहितामुउमालाच्चसस्मृतायतः॥ततःसुरूपितामालां
स्थापयेच्छुभपात्रके॥पद्माकारेऽश्वत्थपत्रैर्नवकैःस्थापयेच्चवा॥पंचामृतेनसंस्नाप्यशीतलेनजले
नच॥महाप्रेतासनंबीजंविन्यस्तेत्रसाधकः॥तत्रदेवींप्रपूज्येवपरिवारगणैःसह॥विधिवद्वह्नि
मारोप्यघृतेनशक्तितोहुनेत्॥होमकर्मण्यशक्तश्चेद्विगुणंजपमाचरेत्॥अष्टोत्तरशतंजप्त्वागुरोर्मा
लांप्रकल्पयेत्॥शिष्यहस्तेततःसोपिप्रजप्याष्टोत्तरंशतं॥गुरवेदक्षिणांदद्यात्पश्चाद्विभवमात्मनः॥
गुरोरभावेमालायाःसंस्कारंस्वयमाचरेत्॥अभ्युदयादौजपेन्मालांपूजांतेपितथैवच॥वाग्भवंभु
वनेशानीमस्समालान्तेउन्मुता॥स्मन्मंत्रंचसमुच्चार्यपूजयेत्साधकोत्तमः॥ओं॥मालेमालेमहामाले
सर्वशक्तिस्वरूपिणी॥चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव॥अभिमंत्र्यततोमालांगृह्णीयाद्द
क्षिणकरे॥मायासिद्धेश्वरीस्थितांहृदयांतेमनुस्मृतः॥एषपंचाक्षरोमंत्रोग्रहणेषुजपांतके॥ह
स्तेस्थाप्यसमाभिप्यनतुवामेनसंस्पृशेत्॥मध्यमायामध्यभागेस्थापयित्वासमाहितः॥तर्जन्या
स्पृशयेन्मालामंगुष्ठाग्रेणचालयेत्॥प्रत्येकमणिमादायमेरुंचैवनलंघयेत्॥अंगुष्ठानामिका
भ्यांतुजपमुत्तमकर्मणि॥तर्जन्यंगुष्ठयोगेनविद्वेषोच्चाटनेजपः॥कनिष्ठांगुष्ठयोगेनजपेन्मारण
कर्मणि॥जपांतेमस्तकेमालांक्षिप्त्वानेनसमर्चयेत्॥ओंक्लींमालेसर्वदेवानांप्रीतिदाशुभदाभ
व॥शुभंकुरुष्वमेभद्रेयशोवीर्यंचसर्वदा॥जपान्यकालेतांमालांगोपयेत्प्रयतःसुधीः॥जपकालेपि
गोप्तव्याजपमालासुशोभना॥गणनाविधिमुल्लंघ्ययोजपेत्परतोजपं॥गृह्णंतुराक्षसास्तेनगणय

ामा त्सर्वथा बुधः॥ जीर्णे सूत्रे पुनः सूत्रं ग्रथयित्वा शतं जपेत्॥ कराद्भ्रष्टे च्छुरिते जपेदष्टोत्तरं शतं॥ रहस्य
निषिद्धस्पर्शने तद्वज्जपेत्स्वस्यात्म्य मंत्रवित्॥ इति वर्णमाला समाप्ता॥ अथ करमाला॥ तदुक्तं ब्र
हृषीक्तेसंहितायां॥ तर्जन्यग्रे तथा मध्यया जपेत्स तु पापकृत्॥ अनामायास्त्रयं पर्व कनिष्ठायास्त्रि
पर्विका॥ मध्यमायास्त्रयं पर्व तर्जनीमूलपर्वणि॥ जपेदित्यर्थः॥ हंसपारमेश्वरेपि॥ पर्वद्वयमना
मायाः परिवर्त्तेन वैक्रमात्॥ पर्वत्रयं मध्यमायास्तर्जन्येकं समाहरेत्॥ शक्तिमालासमाख्याता स
र्वमंत्रप्रदीपिका॥ मुंडमालायां॥ अनामायाद्वयं पर्व कनिष्ठादिक्रमेण तु॥ तर्जनीमूलपर्यंतं करमा
लाप्रकीर्त्तिता॥ मेरुं प्रदक्षिणी कुर्वन्ननामामूलपर्वतः॥ नित्यं जपं करे कुर्यान्न तु काम्यं कदाचन॥
काम्यं चापि करे कुर्यान्मालाभावे प्रियंवदे॥ इति॥ यामले॥ स्वतागुरुमंत्राणामैक्यं संभावयन्धिया॥
सवासनं जपेन्मंत्रं संतुष्टः स्थिरमानसः॥ सवासनं सार्थं॥ वासनामाह मुत्तरतंत्रे॥ अथ वक्ष्ये मह
शान्यावासनातत्वनिर्णयं॥ बीजत्रयात्मिकाभव्या सा केवला चित्कलात्मिका॥ तद्बलेस्वाद्यमात्रेण सृष्टि
स्थित्यंतकारिणी॥ शुद्धबीजद्वयेनैव शुद्धाशाप्रबोधिनी॥ संबोधनपदेनैव सदा संचित्तिरूपिणी॥
जागर्त्येषा महाविद्या केवलं चित्प्रकाशिनी॥ नसुप्तान्यवशासान्तु तस्मात्स्वात्मफलप्रदा॥ अत्र शुद्ध
बीजद्वयं प्रगुण्य राक्रमात्पदक्रमबोधकः॥ एकाक्षरार्थयस्याभिसाक्षात्मेसफलप्रदं॥ कैंशोधि का
वरूपत्वात्केवलं भास्वदायिनी॥ बीजत्रयेण देवेशी सृष्टिस्थित्यंतकारिणी॥ ज्वलनार्कसमा योगा
सर्वतेजोमयी शुभा॥ बिंदुना निष्फलत्वाच्च केवल्यफलदायिनी॥ बीजत्रयेण देवेशी विदीर्णस्वपरावरा॥ १९
जीवात्मना बीजत्रयात्स्वशक्तिस्वरूपिणी॥ बीजद्वयार्थशुद्धभाविनी भाववर्जिता॥ इति॥ कुलेश्वरसं
हितायां॥ जपन्मंत्रप्रसन्नात्मा मंत्रार्थं च हृदि स्मरन्॥ असंख्यातं न पठ्यते ज्ञात्वा मेरुलंघनं॥ पर्वसंधिषु

यज्जप्तं तत्सर्वं विफलं भवेत्॥ सावधानं जपेन्मंत्रं न द्रुतं नाविलंबितं॥ एतद्ब्रह्मचनिकः प्रोक्तं संख्यातत्फ
लमुच्यते॥ अयं क्रमो निशायामप्यमर्षणीयः॥ तदुक्तं यामले॥ बलिपूजादिकं सर्वं निशायां क्रियते सदा॥
तत्र रहस्यतां याति कालीविद्याप्रसादतः॥ कुकुम्बुडामणौ च॥ रात्रौ पर्यटनं कुर्याद्रात्रौ च शक्तिपूजनं॥ न
करोति कथं देवी साधकः कौलिको भवेत्॥ ततः काम्यबलिं दद्यात्तदुक्तं कालिकाश्रुतौ॥ पुराणे॥ छागं
तु वामतो दद्यान्महिषं वितरेत्पुनः॥ दक्षिणा वामतो दद्यान्मेषरक्तस्य शोणितं॥ नाभेरधस्ताद्रुधिरं शरभा
गस्य न प्रियः॥ स्वगात्ररुधिरं दद्यान्न कदाचित्तु साधकः॥ नोष्ठस्य चुबुकस्यापि नेन्द्रियाणां तथैव च॥
कंठाधो नाभितश्चोर्ध्वं रुद्रभागस्य च पदतः॥ पार्श्वयोश्चापि रुधिरं दुर्गायै विनिवेदयेत्॥ नवनागादि
कांगाच्च नान्यथा च भैरव॥ सौवर्णं राजतं ताम्रं कांस्यं धास्यमानवः॥ निधायेद्देव्यै दद्यात्तु तदुक्तं मंत्र
पूर्वकं॥ यः स्वरक्तस्य संजातं मांसं माषप्रमाणतः॥ तिलमुद्गप्रमाणं वा दद्याद्देव्यै स्याद्भक्तितः॥ षण्मासाभ्यं
तरे तत्तत्कामानिष्टमवाप्नुयात्॥ ॥अथ बलिदानं॥ अथातो बलिदानं तु वक्ष्यामि श्रीश्रियःकरं॥
प्रणवं पूर्वमुद्धृत्य पश्येयुगं ततः पठेत्॥ महापश्यपदं ब्रूयात्सर्वावतिपदं ततः॥ वन्हिजायावधिः पश्चा
द्बलिं दद्याच्चतुःपथे॥ प्रणवं भुवनेशानि भिक्कजेत्यपदं ततः॥ महाप्रसादिकं ब्रूयात्ततयपदमुच्चरेत्॥
मयोपनीतकं ब्रूयाद्बलिं गृह्ण द्वयं पदं॥ गृह्णापय युगं मम सर्वशान्तिं कुरु द्वयं॥ एवं विधाद्विधाक
ष्यकृद्वंद्वं च धिंधिं धिक्कुरु॥ मायाबीजं ततो हूं च बलिं दद्यात्स्वाहान्तिकं॥ बलिमंत्रद्वयं प्रोक्तं वीराणां
हितकाम्यया॥ वाराहीसंहितायां॥ अथातो बलिदानस्य विधानेत्र प्रवक्ष्यते॥ चामरं रुधमसारस्थम
त्स्यामेषाय शूकरः॥ महिषो वानरः खड्गो बलिश्छागादिको भवेत्॥ दशमच्छागदं पंदद्यात्सप्तास्यान्महा
बलिः॥ श्वेतः कृष्णो लोहितश्च कपिलश्चित्रपांडुरौ॥ षड्विधः छागलः प्रोक्तो गृहस्थानां परो बलिः॥

यामा उत्तमोऽसितरूपेणान्यमध्यमोपिचित्रपांडरो॥लोहितःकपिलश्चैवकनिष्ठःपरिकीर्तितः॥त्रिमासात्परतश्चैव रहस्य
यथावदेकंतुवत्सरं॥कृष्णवर्णश्चततरुणःप्रशस्तोबलिरुच्यते॥षण्मासात्परतश्चैवयावद्वर्षद्वयंभवेत्॥उत्त
मोसौबलिःप्रोक्तस्तस्माद्धीनोधमःस्मृतः॥कृष्णवर्णोबलिर्यस्तुस्वेतपुच्छोयदाभवेत्॥छागलंतादृशंविद्या
न्दूरतःपरिवर्जयेत्॥एवंकृष्णपुच्छंछागंवर्जयेन्मतिमान्सदा॥कृष्णवर्णश्चवाछागएकदेशेसितोयदि॥
प्रशस्तंतंविजानीयाद्विपरीतंतुवर्जयेत्॥खंजंकाणंतथाकुब्जंसाधुरूंव्याधिसंयुतं व्यसनेदन्तरहितंवर्जये
त्तंविचक्षणाः॥पंचाब्दमाहिषश्चैवतंप्रशस्तंपरिकीर्तितं॥सएवमाहिषःकृष्णपांडुरश्चाधमोबलिः॥पक्षि
णस्तुप्रशस्तास्तुसर्वेवर्णाःसुशोभनाः॥त्रिपक्षात्परतश्चैवदिनेचापिविवर्जयेत्॥मनुष्यकोटिवर्षाणि
तृप्तिंगच्छंतिदेवताः॥गंडैवर्षसहस्राणिमाहिषैःशरदःशतं॥छागलैर्वत्सरादूर्ध्वंद्वादशाब्दंदशाब्दकं॥पूर्ण
संवत्सरेचैवत्रिवर्षकच्छपेनतु॥वराहेनतुपंचाशत्तदर्द्धंचामरेणतु॥अर्द्धकंगोधिकाभिश्चषण्मासंगात्रभे
दिते॥पायसेनापिषण्मासंतत्तृप्तिंगच्छंतिदेवता॥नद्यास्त्रीपश्वोर्मांसंस्यकथ्येविशेषतः॥छागेतु
क्रागमांसंचसरोमंचार्द्धरात्रके॥सिंहेबिल्वाकृतिंचैवरमस्तुपद्मभेकच॥वृकागमांसमानंस्यात्
खुलापस्यनरस्यच॥तथाप्रमाणमानंस्यादजस्यचरणस्यच॥धातकीफलमानंतुगोधिकायादतीदि
तं॥एतदाममजस्यैवभर्जितंमानवर्जितं॥हीनेन्द्रियपशोर्मांसंदूरतःपरिवर्जयेत्॥दिवानजुहुयान्मांसं
संध्यायांसावसानके॥ब्राह्ममुहूर्तेजुहुयादथवासर्वसंधिषु॥एकेनचसहस्रंस्यात्द्विगुणंचार्द्धरा
त्रके॥ब्राह्ममुहूर्तेत्रिगुणंसंध्यायांचचतुर्गुणं॥पर्वसंधौशतगुणंतिथिसंधौशतोत्तरं॥काम्येषुजुहुया ३०
न्मांसंपुरश्चरणशेषके॥योन्यारेत्शतगुणंस्यांउलीपनचाचरेत्॥ ॥अथसंप्रोक्षणंकृत्वाबलिंसमुत्सृ
जेद्बुधः॥स्वयंपूर्वमुखोभूत्वाबलिंकुर्यादुदङ्मुखं॥अथचैतत्त्वयस्यपस्यासीद्द्रावेरलंकृतं॥अर्घ्य

पात्रोदकैःशुद्धैर्मूलेनप्रोक्षयेत्त्रिधा॥वाराहीयमुनागंगाकरतोयासरस्वती॥कावेरीचंद्रभागाच
सिंधुभैरवसागरी॥अत्रस्नानेमहेशानिसान्निध्यमिहकल्पय॥पशुपाशविनाशायहेमकूटस्थिताय
च॥परायपरमेष्टिनेहुंकारायस्वमूर्तये॥ओंसहस्रारहुंफट्॥बिल्वपत्रोदकैरेभिःप्रोक्षणं
कारयेदथ॥त्रिधासंपूजयेत्तंचतत्रेष्टंगंधचंदनैः॥ततोनिरीक्षितोमंत्रीपठेत्करपुटस्त्वयं॥छागत्वं
बलिरूपेणममभाग्यादुपस्थितः॥प्रणमामिसदाभक्त्यारूपिणंबलिरूपिणं॥चंडिकाप्रीतिदानेनदा
तुरापद्विनाशने॥चंडिकाबलिरूपायबलेतुभ्यंनमोनमः॥यज्ञार्थेपशवःसृष्टाःस्वयमेवस्वयंभुवः॥
अतस्त्वांघातयाम्यद्यतस्माद्यज्ञेवधोऽवधः॥वाग्मायाकमलाबीजैस्तन्मूर्ध्नित्रिःपशुःक्षिपेत्॥ततोब
लिंसमुत्सृज्यकार्यंकृत्वाविशालधीः॥आनीयखड्गंपुरतोगंधादिभिःसमर्चयेत्॥कृष्णंपिना
कपाणिंचकालरात्रिस्वरूपिणं॥उग्रंरक्तास्यनयनंरक्तमाल्यानुलेपनं॥रक्तांबरधरंचैवपाश
हस्तंकुटुंबिनं॥पिबमानंचरुधिरंभुंजानंक्रव्यसंहतिं॥इतिध्यात्वायजेत्तत्तन्मंत्रेणानेनयाजकः
रसानांत्वंचंडिकायाःसुरलोकप्रसाधकः॥मायाद्वंद्वंखड्गपदंकालीकालिपदंतथा॥वज्रेश्वरततो
ततोलोहदंडांगेत्यांनमःपदं॥मायाबीजंलिखेत्खड्गेसिंदूरचंदनादिना॥देव्याबीजंन्यसेत्तत्रपूज
यित्वानमश्चरेत्॥असिर्विशसनःखड्गस्तीक्ष्णधारोदुरासदः॥श्रीगर्भोविजयश्चैवधर्मपालनमो
स्तुते॥ततःखड्गंगृहीत्वातुदेवतारस्सनाधिया॥अभिमंत्र्यचमूलेनवक्ष्यमाणंचवस्त्वयं॥ब्रह्मा
यामयंकालीयुगंविकरालपतः॥दंष्ट्रेस्फेस्फेंपदंब्रूयात्स्फेत्कारिणीतिखादयेत्॥द्वितीयंच्छेदययुगं
सर्वदुष्टांततःपठेत्॥मारयद्वितयंपश्चाज्जंखड्गेनछिधियुक्॥कालिकालिकिपिबद्वंद्वंपिबयुग्
रुधिरंपदं॥स्फ्रोंस्फ्रोंकिलियुगंकानिरुन्तियुगंनिमंत्रणे॥ओंह्रींफडितिमंत्रेणस्कंधेखड्गंनियोजयेत्

श्यामा अथवक्ष्यामि खड्गानां लक्षणं तंत्रवर्त्मनां ॥ येन संछेदने नापि साधकः सिद्धिमालभेत् ॥ सर्वेषा
मुत्तमः खड्गश्चंद्रहासः सुखावहः ॥ पंचाशदंगुलैः कार्यः किंवा तालत्रयेण तु ॥ करवीरदलाकारः किं
वा पद्मदलाकृतिः ॥ अथवा कुञ्जरखेड्गेन दंडखड्गेण भेदयेत् ॥ महाबलीनां सर्वेषां दात्रमत्र प्रकीर्त्तितं ॥ क
र्त्तकया क्षुरेणापि छिंद्याच्छुरिकयान्च ॥ कुठारपर्शुखंडाभ्यां भेदयेन कदाचन ॥ छेदयेत्तीक्ष्णखड्गेन
अच्छिद्रेण शुभेन च ॥ नाकार्द्रो छेदयेत्तं तु वनेद्रेशोशुवातथा ॥ छेदयेदनिश्चां सर्वबलिपूर्वमुखं शुभं ॥ उ
दङ्मुखः स्वयं नेत्तु बीजे नैव च साधकः ॥ छागलादिपशूनां च विपरीतमुखेन तु ॥ प्रहाराणां चाधिक्ये
तेषामेव विधीयते ॥ स्वयं वा भ्रातृपुत्रो वा भ्राता वा सुहृदेव वा ॥ सपिंड छेदयेद्वापि पशून्तःकरणं यदि ।
नरिपुर्नं गहीनोवा न कालेनापि कुत्रकं ॥ न योजयेच्छत्रुपक्षं बलिछेदनकर्मणि ॥ पतिद्वाय व्यदिग्भा
गे नैर्ऋते दक्षिणे पि वा ॥ मस्तकं पतितं चेव हि निरत्नं विनिर्दिशेत् ॥ शेषासु दिक्षु सर्वासां विदिक्षु च फ
लं शृणु ॥ पूर्वे चोत्तरदिग्भागे पतते यदि मस्तकं ॥ सर्वसंपत्करं क्षिप्र राजा राज्यं विनिर्दिशेत् ॥ आमित्व
दक्षिणे कर्णे यदा पतति वैरिमः ॥ तदा सिद्धिं च मासां तेवामकर्णे विपद्भवेत् ॥ राजा मंत्र भवेद्धानि गृह
स्थानां शुभं वदेत् ॥ ऐश्याम्य मध्यये श्चैव पततेते यदि मस्तकं ॥ तदा स्वल्पेन कालेन सर्वसिद्धिर्भवे
ध्रुवं ॥ छिन्नं शिरो निपतितं सहासं पश्यदि दृश्यते ॥ विभूतिं तस्य जानीयाद्राजा राज्यं विनिर्दिशेत् ॥ ए
कवारे भवेत्सिद्धिर्द्विवारे हानिरुच्यते ॥ गृहस्थानां विजानीयात्रातंतु विपरीतकं ॥ यदा शुस्त्रुयते नेत्रे
तदा हानिं विनिर्दिशेत् ॥ यदा कटकटा शब्दो दंतानां श्रूयते क्वचित् ॥ तदा तु मरणं विप्राश्चान्नि सर्वत्र
निर्दिशेत् ॥ स्थान्त्रासस दिग्भागे मंत्री बाला शास्त्वयं ॥ तद्दक्षिणे स्कपात्रं विपरीतं न संदेत् ॥ देवस्य
संमुखं कृत्वा छिन्नं भागं प्रकल्पयेत् ॥ तदैव त्वदास्तु जानीयान्मध्यमं विपरीतकं ॥ महाबलीनां वाय

य्येप्रदद्यात्साधकोत्तमः ॥ बलिनाभिनिसंहृष्टानां त्रिरश्वपुरतोऽर्दयेत् ॥ कीलकांनेन्यसेत्सर्वं यथाकाम्या
नजायते ॥ शीर्षोपरिज्वलद्दीपंप्रदद्यात्खंदनोक्षितं ॥ घृतेनसार्धंभामस्यातेनासिद्धिंर्विंदति ॥ सूत्र
वर्त्तिंनरस्यात्खवस्त्रवर्त्यंनशस्यते ॥ अंगुष्ठस्यप्रमाणंवदीर्घंचैवषडंगुलं ॥ कार्पाससूत्रैर्वादद्यादेकं
विंशतिसूत्रकैः ॥ सुगंधिद्रव्यैस्तत्कुर्यात्कर्पूरागरुचंदनैः ॥ ब्राह्मणांकपिलानांचगोधायाश्चविशेष
तः ॥ मत्स्यानामपिपक्षाणांनदीपंदापयेत्क्वचित् ॥ शीर्षोपरिज्वलद्दीपोयावत्कालंभविष्यति ॥ तावत्कालं
वसेत्स्वर्गेतस्माद्यत्नेनदापयेत् ॥ लोमदाहाद्भवंगंधंघ्रात्वादेवीप्रसीदति ॥ तस्मात्संवर्धयेद्दीपंतस्मा
त्पात्रंविवर्जयेत् ॥ निर्वाणमृत्युमात्रानिर्दीपमानेप्रदीपके ॥ नस्पीरस्त्रानितरद्यान्नवाजस्यकदाचन ॥
शर्करायुतदुग्धानिप्रदद्यान्निर्महाघृतं ॥ सैंधवंशृंगवेरंश्चकदलीफलमेवच ॥ पातयेन्मधुराणांचका
ममुद्दिश्यसाधकः ॥ बलिप्रकारमुद्दिष्टंवाराहीसंहिताक्रमात् ॥ अथान्यत्प्रवक्ष्यामिमंत्रसिद्धिकरंपरं ॥
मंत्रसाधकयोरैक्यंदुर्लभंभुविमानवैः ॥ उक्तंसंकर्षणेतंत्रेशिवेनाखिलवेदिना ॥ आनंदाख्येपंचा
त्रेश्रुत्वायच्चवेयपुरा ॥ संस्कृतंपूजितंमंत्रंदत्वाशिष्यायदेशिकः ॥ कुर्यादथतयोरैक्यंशास्त्रदृष्टेन
वर्त्मना ॥ मंत्रंविदर्भितंकृत्वानामवर्णंयथाक्रमं ॥ आद्यंतेसकलंनामततःप्रणवमालिखेत् ॥ स्वनाः
पत्रेषुसंलेख्यध्यायेत्तानमृतात्मकान् ॥ भूर्जेरोचनगंधाद्यैःपद्ममध्येसुशोभनात् ॥ त्रिधापक्वि
योवेस्यतत्पुनःसिक्थकेनतु ॥ निःक्षिपेन्मधुरेतत्तुमृन्मयेलघुभाजने ॥ क्षीरपूर्णेनवेकुंभेतत्क्षिप
लघुभाजने ॥ धारयेद्देशिकःकुंभमग्निकुंडसमीपतः ॥ मंत्रसाधकयोरैक्यसिध्यर्थंजुहुयात्ततः ॥
मूलमंत्रेणमंत्रज्ञःसहस्रंशतमेववा ॥ कुंभेसंपातयेन्मंत्रीमधुराणांत्रयंशुभं ॥ निधायतंनिःक्षिपेत्कुं
भंशानैस्तंमहदंभसि ॥ मंत्रसाधकयोरैक्यंभवेदेवंनसंशयः ॥ एतद्योनविजानातिनासौदेशिकउच्यते ॥

ामा रहस्यंकथितंचैवंनदेयंयस्यकस्यचित्॥उत्तमायसुशिष्यायसुपुत्रायाथवावदेत्॥पयोमधुघृतंचैव रहस्य
समंत्रिमधुरंस्मृतं॥महायंत्रस्यसंस्काराःसर्वकार्येषुसिद्धिदाः॥शुभेन्हिस्नानमाचर्यशुभेलग्नेशुभेक्षणे॥
कृतनित्यक्रियामौनिप्राङ्मुखोवाप्युदङ्मुखः॥भूतशुध्यादिकंकृत्वाकल्पोक्तंन्यासमाचरेत्॥सुवर्णराजतंताम्रं
श्रेष्ठंमध्यंतथाधमं॥ताम्रंशतगुणंप्रोक्तंरौप्यंकोटिगुणंभवेत्॥सुवर्णानंतफलदंस्फाटिकोपितथासमं॥
एकतोलंद्वितोलंवात्रितोलंपंचतोलकं॥रसतोलंचतुस्तोलंसप्ततोलंपलंतथा॥साधकस्यमनोज्ञंवाकृ
त्वापीठंसुसाधकः॥पूर्वोक्तधातुद्रव्येभ्यःसुंदरंसुमनोहरं॥सुरेखंसुस्वरंयंत्रंलेखयेत्तद्विधानतः॥
अथवाप्रतिमांकृत्वानिजदेवस्वरूपिणीं॥प्रतिष्ठांचततःकुर्याद्यथाशास्त्रप्रमाणतः॥स्नात्वासंकल्पयेन्मं
त्रीततोन्यासंसमाचरेत्॥ततःसंकल्पमुच्चार्यशिवमंत्रविशोधितं॥शिवमंत्रनाममहाप्रेतासनबीजभेद
र्थः॥पंचगव्यंसमानीयतत्रयंत्रंसमाक्षिपेत्॥सुवर्णादिमणीजःसंक्षिपेल्लक्षणंचमुच्चरन्॥तदुद्धृत्यसुवर्णादौ
पात्रेसंस्थाप्यमंत्रवित्॥पंचामृतेनतीर्थेनजलेनचततोनच॥सहस्रशीर्षामंत्रेणमूलमंत्रपुरःसरं॥
संस्नाप्यशुभ्रवस्त्रेणजलंतत्तुल्यतेजसे॥सिंहासनादावारोप्यकुंकुमाद्यैर्विलेपयेत्॥पीठपूजांततःकुर्या
त्स्वकल्पोक्तविधानतः॥कुर्यात्स्वस्वान्यंत्रराजेन्द्रेतमष्टोत्तरंजपेत्॥प्रणवंयंत्रराजायविद्महेपदमुच्चरेत्॥म
हायंत्रायधीमहिसंलिखेत्ततोभिहितत्त्व॥तन्नोयंत्रःप्रचोदयादेषाप्रकीर्तिताः॥इमांयंत्रस्यगायत्रीं
जप्त्वादिक्तत्त्वमालभेत्॥अथेष्टदेवतांध्यात्वामुद्रयावाहयेत्क्रमात्॥जीवन्यासंततःकुर्यात्पूजयेदिष्टदेवतां॥
उपचारैःषोडशभिर्नानाविभवविस्तरैः॥नृत्यगीतैश्चवाद्यैश्चपंचघोषपुरःसरं॥ततोजपेदिष्टमंत्रम ३२
ष्टोत्तरसहस्रकं॥इष्टसिद्ध्यैबलिंदत्वाप्रणम्यचक्रमुत्तमम्॥ततःस्वकल्पोक्तभासाप्यहविषासंस्कृतानले
अष्टोत्तरशतंहुत्वागुरुंविभवपूर्वकं॥तोषयेत्स्वर्णवस्त्राद्यैःप्रदद्याद्दक्षिणामपि॥षोडशोपचारमुद्रा

उच्यंते लक्षणान्यथा ॥ प्रसारयेदुभौ हस्तौ तद्वद्भ्रौ विनियोजितौ ॥ अंगुल्यो विस्तृताः कार्याः मध्येंगुष्ठौ
तु विन्यसेत् ॥ देवतासनविन्यासे पद्ममुद्रां प्रदर्शयेत् ॥ ईषल्लग्नांगुलिर्यासंहतसांगुष्ठकं धरे ॥ नम्रक
निष्ठा तर्जन्यो करयोरग्रसंगते ॥ मध्यमानामिके कुर्याद्दीयमासनमुद्रिका ॥ ईषल्लग्नांगुलिर्दक्षसंयोऽअंगु
ष्ठकंपरं ॥ स्वागतेस्य स्तिको मुद्रा मध्या मूलगतांगुलिः ॥ उपचारे स्वागतेति प्रयोक्तव्या विपश्चिता ॥ तौ न प्रसारि
तौ हस्तौ पाद्यमुद्रा प्रकीर्तिता ॥ दक्षिणे निम्नलग्नांगुष्ठादक्षिणाधःकनीयसि ॥ प्रसार्यानामिकाग्रेण मुद्रा
मे प्रकीर्तिता ॥ संयुक्ता नामिकांगुष्ठे तिस्रोग्रसंप्रसारिता ॥ मधुपर्कस्य या मुद्रागदिता तंत्रवेदिभिः ॥ मुष्टि
युक्तं तथा स्नाने अंगुष्ठाग्रमधोमुखं ॥ मध्यमांगुष्ठकोलग्नौ तिस्रो मध्यप्रसारिताः ॥ यज्ञोपवीतमुद्रेयं क
थिता तंत्रपारगैः ॥ मधुपर्कस्य स्थाने मुद्रालंकारनिर्मिता ॥ मुक्तानामिकया मुष्टिं गंधमुद्रेति कीर्तिता ॥
उच्छ्रिता धोमुखी मध्या बद्धांगुष्ठाग्रदीतराः ॥ पुष्पमुद्रा समाख्याता पुष्पदानि कदर्शिनी ॥ अंगुष्ठात्त
र्जनीलग्ना तिस्रः संकुचिता परा ॥ मुद्रा मधुप्रदाने स्याद्देवानां प्रीतिकारणी ॥ उत्तानायैधूपकां मुद्रां दी
पमुद्रेति गीयते ॥ पंचांगुल्यान्यग्रलग्नाः प्रार्थिता धोमुखी यदि ॥ त्रिधा निबद्धा मुद्रेयं नैवेद्यस्य प्रकीर्ति
ता ॥ द्वौ करौ स्पष्टसंलग्नौ भ्रामयेद्ग्रथितांगुलाः ॥ स्फोटिकेति समाख्याता प्रणम्य तां प्रदर्शयेत् ॥ अ
थवा दर्शयेन्मुद्रां रम्यां गंधादिषु क्रमात् ॥ कनिष्ठांगुष्ठसंयुक्ता गंधमुद्रा प्रकीर्तिताः ॥ ज्येष्ठांगुष्ठात्पु
ष्पस्य युक्ता धूपस्य तर्जनी ॥ दीपस्य मध्यमा नामा नैवेद्यस्य प्रकीर्तिताः ॥ गंधादिष्वपि दत्तेषु मुद्रास्त्वेषा
प्रकीर्तिता ॥ मुद्रया यत्कृतं कर्म तदनंतफलं लभेत् ॥ अथ पवस्याभिदेवानां सुप्रातिष्ठा विधिक्रमं ॥ पु
ण्यक्षेत्रे पुण्यकाले दोलादि विहितस्थले ॥ मंत्री कल्पानुसारेण पूर्वे पुरधिवासयेत् ॥ चंद्रेत्यादिमंत्रेण
सायं संकल्प्य विधिवत् घटस्थापनपूर्वकं गणेशादीन् समभ्यर्च्य दिग्पालान्पीसृजयेत् ॥ यथा ॥

पामा श्रीलपुष्पाद्यैः पूजयेन्मूलदेवतां॥ सुगंधितैलगंधाद्यैर्द्रव्यैस्तामधिवासयेत्॥ चंद्रसूर्यादिमंत्रेण ज रहस्य
पघोषपुरःसरं॥ इत्यधिवासितं रात्रौ संयतो विजितेंद्रियः॥ प्रातर्नित्यं तु निर्वर्त्य कलशे तत्रागस्थले विलोल्
पताकाध्वजसंकीर्णे दिव्यमंडलमंडिते॥ वितानचामरच्छत्रपुष्पमालाजितेतथा॥ मंगलांकुरपात्राद्यैः क
शैः परिभूषिते॥ मंडलं सर्वतोभद्रं वेद्यामुपरि संलिखेत्॥ प्राङ्मुखो वाग्यतो भूत्वा संकल्प्याभीष्टसिद्धये॥
पंचशुद्धिं समाचर्य कूर्चमस्त्रसंयुतं॥ संस्थाप्य मंडले तत्र यजेदाधारशक्तिकां॥ पीठमंत्रान्तमास्तीर्य स्था
पयेत्कलशं बुधः॥ दीक्षाक्रमोक्तविधिना अभिषेककलशं तथा॥ पंचगव्यं ततः कुर्याच्छिवमंत्रविशोधितं॥
तेन संस्नापयेन्मंत्री प्रतिमां प्रणवं जपेत्॥ पंचामृतेन हविषा दध्ना च पयसा क्रमात्॥ ततउद्वर्तनं कुर्या
ज्जलेन स्नापयेद्घटं॥ वाससा जलमुत्तुल्य गंधलेपं विधापयेत्॥ नये स्थापितकुंभस्य समीपे देवतां बुधः॥
ततो ध्यात्वा यथोक्तां तां मुद्रयावाहयेत्क्रमात्॥ लेलीहामुद्रया हस्तं विन्यसेद्देवताहृदि॥ प्राणप्रतिष्ठामंत्रं तु
दशधा प्रजपेत्ततः॥ ततो देवतगायत्रीं शामस्तोत्तरामपि॥ कल्पोक्तविधिना तत्र परिवारसमन्वितां॥ पूज
येद्देवतां पश्चात्स्नानमंडले॥ अष्टपत्रसमायुक्ते पीठोपरि निधाय च॥ सुगंधिद्रव्यतैलेन र
यादभ्यंगमेव हि॥ मूलेन पात्रमाणेन सहस्रशीर्षया बुधः॥ स्नापयेद्भक्तिभावेन अभिषेच्य घटामृतैः॥
कर्पूरागरुकस्तूरीप्रसूनचंदनोदकैः॥ नानातीर्थोदकेनापि स्वर्णरत्नोदकैर्जलैः॥ सर्वौषधिजलैर्गंध
जलैर्यत्नेन संस्नापयेत्॥ ततः शुभ्रदुकूलेन जलमुत्तुल्य साधकः॥ परिधाय दुकूले द्वे स्वर्णनिर्मितदोलया॥
मंडले तां समानीय नृत्यगीतैर्जयस्वनैः॥ षोडशैरुपचारैस्तु पूजयेत्कल्पमानतः॥ यथाविधिविधानेन ३३
श्रुवाहोमं समाचरेत्॥ ग्रासप्रमाणं चरुकं मूलेनाष्टशतं मंत्रवित्॥ घृतस्रुचस्ततो दत्वा जुहुयाद्दीपसंमुखे॥
पंचविंशतिवारं च देवमुद्दिश्य यत्नतः॥ चरुणा दिक्पतिभ्यश्च दद्यात्पूर्वादितो बलिः॥ ततआवरणदेवेभ्यो॥

घृतेनाहुतिमाचरेत्॥अथवाचरणानद्धत्ततोदेवसमीपगे॥गंधपुष्पांजलिंचप्रदद्यात्सुत्रच्यामरे॥अ
शेषत्तस्यातंमंत्रंजप्तामूलंसमाहितः॥अभिषिंचेत्ततोदेवींपूर्णाकुंभस्थपल्लवैः॥मातृकापुटमंत्रंच
जपञ्जयजयस्वनैः॥गत्वाहोमसमीपंतुदद्यात्पूर्णाहुतिंतथा॥दक्षिणांगुरवेदद्यात्सुवर्णकर्षमानतः॥ तैः
अथवातत्त्वचतुर्थांशंयथाविभवपूर्वकं॥गुंजाद्वादशकोमाषतद्दशैःकर्षउच्यते॥ततःसंतोषयेद्विप्रांग
हीत्वाचाशिषोद्विजात्॥इतिदेवप्रतिष्ठानमुक्तंसर्वसमृद्धिदं॥यःकरोतिप्रतिष्ठानंदेवतस्यमहाजनः॥
वसेद्दिविसहस्राणिवर्षाणिदेवमानतः॥ततोवर्षसहस्राणिब्रह्मलोकेमहीयते॥अथवाकोटिकल्पांत
मोदतेचाच्युतेपदे॥लिंगंपीठिमथमूलसूत्रंततोद्वितीयंपृथुपीठिकायां॥ब्रह्माचविष्णुस्तथशंकरांतं
ऊर्ध्वंत्रिभागंत्रितयंत्रिसूत्रं॥चतुर्थकंलिंगप्रनालभगंयपंचमंलिंगशिरस्यसूत्रं॥न्यूनाधिकार्येकुल
हानिदायंशुभप्रदायंसमकायसूत्रे॥इतिशिवार्चनचंद्रिकायां॥ ॥इतिप्रतिष्ठाविधिः॥ ॥ततोदेवीस्तूय
भाणस्तवेनस्तुत्वाप्रदक्षिणंविधायसाष्टांगप्रणामंकुर्यात्॥तदुक्तंकालिकातंत्रे॥ततोवैशिरसेपुष्पंदत्त्वा
ष्टांगंप्रणम्यच॥अथप्रदक्षिणायथायामले॥त्रिकोणाकारसर्वत्रनतिःशक्तिःसमीरिता॥अर्धचंद्रम
हेशस्यपृष्ठतच्चसमीरितं॥कालिकापुराणे॥वृषंसोमंवृषंचैवसोमसूत्रंपुनर्वृषं॥चंडंचसोमसूत्रं
चपुनश्चंडंपुनर्वृषं॥सोमसूत्रंततःसूर्यात्प्रादक्षिण्यमहेशितुः॥नमनंमानसंप्रोक्तंकायिकंवाचिकंतथा
त्रिविधेचनमस्कारेकायिकस्तूत्तमःस्मृतः॥पौराणिकैर्वैदिकैर्वामंत्रैर्वाक्रियतेनतिः॥मध्यमोसौनमस्का
रोभवेद्वाचनिकःसदा॥यास्वयंगद्यपद्याभ्यांघटिताभ्यांनमस्कृतिः॥क्रियतेभक्तियुक्तेनवाचिकस्तूत्तमः
स्मृतः॥जानुभ्यामवनींगत्वाशिरसास्पृश्यमेदिनीं॥क्रियतेयोनमस्कारःकायिकस्तूत्तमःस्मृतः॥पुटीकृ
त्यकरौशीर्षेदीयतेचयथातथा॥नस्पृष्ट्वाजानुशीर्षाभ्यांमध्यमाकायिकानतिः॥अष्टांगप्रणामोयथा॥

चिबुकेनमुखेनापिनासयाहनुनैवच॥ब्रह्मरंध्रेणकर्णाभ्यांयद्भूमेःस्पर्शनंक्रमात्॥प्रणामोऽष्टांग
उक्तोयंसर्वदेवस्यतुष्टिदः॥प्रदक्षिणंसंख्यातत्रैव॥एकंदेव्याःरवेःसप्तत्रीणिकुर्याद्विनायके॥चत्वारिकेश
वेकुर्याच्छिवेचार्धप्रदक्षिणमिति॥प्रसार्यदक्षिणंहस्तंस्वयंनम्रशिरस्तुनः॥दक्षिणंदर्शयित्वार्थंमनसापि
चदक्षिणां॥त्रिधाचैवस्वयंस्वयंकालिकायाःप्रदक्षिणं॥एषप्रदक्षिणाज्ञेयःसर्वदेवौघतुष्टिदः॥अष्टोत्त
रशतंयस्तुकालिकायाःप्रदक्षिणं॥सर्वान्कामानवाप्नोतिपश्चान्मोक्षमवाप्नुयात्॥कालिकापुराणेच॥दो
र्भ्यांपद्भ्यां।अंसाभ्यांउरसाशिरसादृशा॥मनसावचसाधिया॥पंचांगस्त्वःप्रणामस्याद्विद्वद्भिःपरि
कीर्तितः॥अथसामायिकैःसहपानादिकंकुर्यात्तथा॥चक्राकारेणपंक्त्याकारेणवास्थित्वासनेसाध
कैःसहशक्तिसंयुक्तश्चयुग्मयुग्मक्रमेणपद्मासनेनोपविश्यसामायिककललाटेचंदनाक्षतंदत्वाशि
वशक्तिबुध्यापुष्पंदद्यात्॥ततोऽग्रेगुरुस्तिष्ठतितदाऽदौगंधपुष्पादिनागुरुंपूजयित्वातत्पात्रंशुद्धि
सहितंतस्मैसमर्पयतत्पात्रणमेत्॥गुरोरभावेतत्पात्रंजलेनिक्षिपेत्॥ततःशक्तिपात्रंशुद्धिसहितंशक्त्यै
दत्वासामायिकेभ्योज्येष्ठादिक्रमेणवीरपात्रात्परमामृतेनशुद्धिसहितंपात्रंदद्यात्॥ततःसामायिको
ऽपिभक्त्याहस्तद्वयेनसंगृह्यमूलमंत्रंतदुपर्यष्टधाजप्त्वापूर्ववदानंदभैरवानंदभैरव्योःसंतर्प्यगुरुंदेवतां
तर्पयेत्॥ततःस्वस्वकल्पोक्तविधिनातत्पशुद्धिंकुर्यात्॥ततस्तैःसहपात्रवंदनंकुर्याद्यथा॥श्रीमद्भैरव
शेखरप्रविलसच्चंद्रामृताप्लावितंक्षेत्राधीश्वरयोगिनीजनगणैःसिद्धैःसमाराधितं॥आनंदार्णवकं
महात्मकमिदंसाक्षात्त्रिखंडामृतंवंदेश्रीप्रथमंकरांबुजगतंपात्रंविशुद्धिप्रदं॥इत्यभिमंत्र्यवामहस्ते ३४
नपात्रमुत्तोल्यवंदनंकृत्वागृण्हामीतिगुरुःशक्तिसाधकेभ्यआज्ञांगृण्हीयात्॥तेचजुषस्वेतिब्रूयुः॥
ततोमूलाधारात्कुंडलिनीमिष्टदेवतास्वरूपामाजिह्वान्तंविभाव्यगुरुपादुकांस्मृत्वाऽत्रिवाहमितिविचिंत्य।

हस्ताभ्यांपात्रंधृत्वामूलमंत्रमुच्चरन्कुंडलिनीमुखेदेवींतर्पयेत्॥तदुक्तमुद्रयाकरपद्मस्थांकृत्वामं
त्रतनुंस्मरेद्गुरुपदंदेवींकलाचिन्मयीं।पश्चात्पात्रयंपलासवघटतंदीपैर्युतंचोज्वलैः॥पुष्पादिभिरभि
मंत्रितंचभिबिंदुसंमोहनंत्वासवंयेसंचिंत्यपिबंतियांतिखलुतेमुक्तिंश्चमुक्तिंपरां॥तंत्रांतरेच॥सिंदू
तिलकंभालेपाणौचमदिरारसं॥कृत्वापिबेद्गुरुंध्यायेत्तथादेवींचिचिन्मयीं॥इतितत्त्वपात्रमाधा
रोपरिसंस्थाप्यपुनःस्तेनक्रमेणपरमामृतंगृहीत्वाद्वितीयपात्रवंदनंकुर्याद्यथा॥हैमंमीनरसाव
हंदीयतयाद्रत्तंभ्रमन्नौषधंपीतंकिंचिच्चंचलरक्तपंकजदृशासंस्मेरमानंदितं॥वामेस्वाद्यविशिष्टशु
द्धिकवलंपाणौनिधायात्मकेवंदेपात्रमहंद्वितीयमधुनानंदैकसंवर्धनं॥ततःपूर्ववत्पात्रंस्वीकृत्य
अन्यत्पात्रवंदनंकुर्याद्यथा॥पूर्वाम्नायकुलाकुलाप्रसहितंकौतूहलोद्योतनंचंद्रोपेंद्रशंभुवरुण
ब्रह्मादिभिःसेवितं॥ध्यातंसिद्धगणैस्तथामुनिगणैर्मोक्षार्थिभिःसर्वदावंदेपात्रमहंतृतीयम
धुनाचात्मावबोधक्षमं॥मद्यंमीनरसावहंहरिहरब्रह्मादिभिःपूरितंमुद्रामैथुनधर्मकर्मनिर
तंक्षारामृतीकृतंप्रियं॥आचार्यास्तुकोसिद्धिभैरवकुलाधीनेशानसंस्थापितंपायात्पंचमकारतत्व
सहितंपात्रंचतुर्थंनमः॥आधारभुजगाधिराजकलशपात्रंमहीमंडलंमद्यंसप्तसमुद्रवारिविधिनं
चास्तेचंद्रदिगंतिनः॥सोहंभैरवमर्चयाम्यनुदिनंतारागणैरक्षतैरादित्यप्रमुखैःसुरासुरगणैरा
ताकरैःकिंकरैः॥इतिपंचमपात्रं॥ततोयावद्दुःखवादोनभवतितावत्पानंकार्यं॥अथास्यप्रमा
णंयथा॥तदुक्तंयामले॥साधकेभ्यश्चश्वेशाकैभ्योद्यानिर्माल्यचंदनंसामान्यकैःसम्यक्कुर्याद्देवी
यानादिभक्षणं॥अन्यत्रापि॥निवासश्चक्ररूपेणपंक्त्याकारेणवायथा॥नपङ्क्तौचस्पृशेत्पात्रंनबिं
दुपातयेत्सधः॥शक्तियुक्तश्चवेद्यापियुग्मयुग्मविधानतः॥शिवशक्तिधियासर्वंचक्रमध्येसमर्चयेत्॥

ताम। अथपात्रपरिमाणंयथातदुक्तंकुलसंभारे॥नयनाग्निबाणसंख्यंकार्यंतुकुलसाधने॥हेतुपानं रहस्य
प्रकर्तव्योमेत्युक्तंपरमेश्वरि॥इतोप्यधिकपानंतुनकर्तव्यंतुसाधकैः॥यथोत्तरतंत्रे॥अनुज्ञांपुरतोल
ब्ध्वागृण्हामीतिस्वयंवदेत्॥जेष्ठस्यत्वप्यनुज्ञातोगुरुणावाकुलीनकैः॥गृण्हीयाच्चस्वयंसिद्धः पिबेत्स
स्वासनःसुधीः॥ज्ञानार्णवेपि॥एकासनोपविश्यैवभुंजीतचैकभाजने॥एकपात्रेपिबेद्द्रव्यंतेयांति
नरकेधमाः॥एकपात्रमितिसर्वैर्मिलित्वाएकपात्रेनपिबेत्॥नतुप्रतिवारंद्रव्ययानेभिन्नपात्रंकार्यम
नुष्ठानापत्तेःसंप्रदायविरोधाच्च॥विनामंत्रेणयापूजाविनामांसेनतर्पणं॥विनाशक्त्यातुयत्पानंतत्स
र्वंनिष्फलंभवेत्॥स्वशक्तिंवीरशक्तिंवादीक्षितांगुरुमानिनीं॥पाययित्वास्वयंस्त्रीपिबेतदमृतंधुना॥ना
र्चयेदेकहस्तेननपिबेदेकपाणिना॥अन्योन्यंवंदनंकृत्वापिबेत्तदमृतंपुनः॥सव्येनाधस्यपात्रंतुमुद्रांकृत्वा
पसव्यतः॥विनासंगेनयोगेननकुर्याद्द्रव्यसंहतिं॥साधारणोहरेत्पात्रमाधारेषुचिनिक्षिपेत्॥पात्रंनचा
लयेत्स्थानान्नकुर्याद्द्रव्यसंकरं॥सशब्दंनपिबेद्द्रव्यंतथैवनचपूरयेत्॥नस्थूलंनैवसूक्ष्मंचपानंकुर्यान्मनो
हरं॥उच्छिष्टंनस्पृशेच्चक्रेकुलद्रव्याणिसुंदरी॥बहिःप्रक्षाल्यपाणीचकुलद्रव्याणिदापयेत्॥निष्ठीवनमधोवा
युश्चचक्रमध्येविवर्जयेत्॥चक्रमध्येघटेभग्नेपात्रेचपतितेभुवि॥दीपनाशेवस्त्रांतेसंयर्थेचक्रस्वीकारयेत्सुधीः॥
स्वपात्रस्थितहेतुश्चनदद्याद्दूरवास्य॥दत्तेचसिद्धिहानिस्यात्क्रुद्धाभवतियोगिनी॥परिहासंप्रलापंच
वितंडावितंडाबहुभाषणं॥औदासिन्यंभयंक्रोधंचक्रमध्येविवर्जयेत्॥अन्योन्यंचिंतयेत्पात्रंनपात्रमा
चरेद्बुधः॥गुरुशक्तियुतानांचगुरोर्ज्येष्ठकनिष्ठयोः॥उच्छिष्टंभक्षयेत्स्त्रीणांताभ्योनोच्छिष्टमर्पयेत्॥चक्र ३५
मध्येचानियतत्त्वन्यथानरकंव्रजेत्॥पततंभवेदितिपाठः॥कनिष्ठानांस्वशिष्याणांदद्याच्चोच्छिष्टमेवहि॥
दद्यात्स्नेहेनयोन्येभ्यःसभवेदापदांपदं॥अन्यत्रापि॥शान्त्युच्छिष्टंपिबेद्द्रव्यंवीरोच्छिष्टंतुचर्वणं॥आलो

क्लिष्टंनरा तव्यंगुरूपिष्टंतुभक्षयेत्॥पीत्वापीत्वापुनःपीत्वायावत्पततिभूतले॥उत्थायचपुनःपीत्वापु
नर्जन्मनविद्यते॥ततःशांतिस्तोत्रंपठेत्तद्रुद्रयामले॥पीत्वास्त्वापिजनैःसार्द्धंशांतिस्तोत्रंसदापठेत्॥न
श्यंतुप्रेतकूष्मांडानश्यंतुदूषकानराः॥साधकानांशिवाःसंतुआम्नायपरिपालिनां॥जयंतिमातरःसर्वा
जयंतियोगिनीगणाः॥जयंतिसिद्धडाकिन्योजयंतिगुरुपंक्तयः॥जयंतिसाधकाःसर्वेविशुद्धाकौलि
काश्चये॥समयाचारसंपन्नाजयंतिपूजकानराः॥अणिमाद्यादिसिद्धाश्चनंदंतुभैरवादयः॥नंदंतुदेव
ताःसर्वाःसिद्धविद्याधरादयः॥सदाम्नायविशुद्धायेमंत्रिणःशुभबुद्धयः॥सर्वदानंदहृदयानंदंतुकु
लपालकाः॥इंद्राद्यास्तर्पमायान्तुतृप्यंतुवास्तुदेवताः॥चंद्रसूर्यादयोदेवास्तृप्यंतुममभक्तितः॥नक्ष
त्राणिग्रहायोगाःकरणानिचराश्रयः॥तृप्यंतुपितरःसर्वेमाससंवत्सरादयः॥खेचराभूचराश्चैवतृ
प्यंतुममभक्तितः॥अंतरिक्षचरायेचयेचान्येदेवयोनयः॥सर्वेचसुखिनोभूतासर्पाःनद्यश्चपक्षिणः॥
पशवस्थावरात्सैवपर्वताःकंदरागुहाः॥ऋषयोब्राह्मणाःसर्वेशांतिंकुर्वंतुमेसदा॥तीर्थानिवहवो
रोधाश्चैवान्येपुण्यभूमयः॥धन्यास्यातीव्रतायास्ताःशांतिंकुर्वंतुमेसदा॥शिवंसर्वत्रमेवास्तुपुत्रदा
रधनादिषु॥राजानःसुखिनंयान्तुक्षेमंकुर्वंतुमेसदा॥शुभामेदिवसायांतुमित्रानंदंतुमेसदा॥शुभा
मेविदिताःसंतुसर्वदाभुविपूजकाः॥येयेपापधियःस्वदूषणमभिनिंदकाः॥पूजनेदेवाचारविसर्ग
नष्टतद्याश्चनश्यंत्वयेसाधकाः॥द्रव्यार्चक्रमपूर्वंदुष्टतद्योनश्यन्त्वयेकौलिकास्तेतेयांतुविनाश
मत्रसमयेयश्रीभैरवस्याज्ञया॥साधकानांचदेष्टारःसदैवाम्नायदूषकाः॥डाकिनांमुखयांतुतत्सास्तीस
शितैस्तुतः॥रात्रिवीनाद्याभायांतुयमानिंदाकराश्चये॥द्वेषाःसाधकानांचविनश्यंतुशिवाज्ञया॥इति
शांतिस्तोत्रं॥ततोयथाविधिनाशिवशक्तिसंयोगंकृत्वादेवीपदंआत्मानंसमर्प्यश्रीपात्रस्थकारणंस्वप॥

ा।मा। त्रेकृत्वा स्वीकृत्य पात्रान्युद्धीकृत्य तदुपरि पुष्पं दत्वा पात्रमुत्तोल्य देव्या उपरि त्रिधा भ्रामयित्वा पुनः रहस्य
संस्थाप्य पश्चाल्लगोपयेत्॥ स्वतंत्रे॥ ततस्तु दक्षिणां देव्या देहस्थास्तास्तु देवताः॥ विलीनाः संतु मूलेन देव्यंगे
निहिताः स्मरेत्॥ ततः संहारमुद्रया॥ गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि॥ यत्र ब्रह्मादयो देवा न विदुः प
रमं पदं॥ इत्यनेन मंत्रेण देवीं स्वहृदि समानीय श्रीदक्षिणकालिके पूजितासि क्षमस्वेति विसृज्य॥ ततः
पूरकवायुना ध्यायेद्देवीं मुद्रास्य ऐशान्यां मंडलिकां कृत्वा निर्माल्येन निर्माल्यवासिन्यै नमः इति मंडले सं
पूज्य॥ तदुक्तं स्वतंत्रे॥ त्रिकोणगर्भवृत्तं तु अभिलिख्य च मंडलं॥ ऐशान्यां देवि कां देवीं निर्माल्यवासि
नीं यजेत्॥ कुमारीकल्पे॥ देवतायास्तु संभोगाद्देवतापूजनं भवेत्॥ संभोगं तु परं कृत्वा देवीं हृदि समापयेत्॥
कृतकृत्यो भवेन्मंत्री नात्र कार्या विचारणा॥ समर्पणमंत्रो यथा॥ ओं इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो
जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मा
र्पणं भवतु स्वाहा॥ मां मदीयं सकलं श्रीदक्षिणकालिकाचरणे समर्पणमस्तु॥ ओं तत्सदिति पठेत्॥ अथ
कालितंत्रे च॥ विसृज्य परया भक्त्या सान्निधापनमुद्रया॥ उद्वास्य हृदये देवीं तन्मयो भवति ध्रुवं॥ पुरश्चरण
काले तु पूजान्ते षा प्रकीर्तिताः॥ भैरवतंत्रेपि॥ हृदये च बहिर्देवीं समर्प्य विधिवत्पुनः॥ निर्माल्यं वैष्णवो
देव्यै नैवेद्यं भक्षयेत्ततः॥ ततस्तदमृतं स्निग्ध भूमौ मायाबीजं विलिख्य त्वा कनिष्ठांगुलिना तिलकं कुर्या
देनेनैवं यं यं स्पृष्ट्वा अभिपादेन यं यं पश्यत्या अभिवसुधा॥ स एव दासतां पातु यदि स्यात्कृसमो भवेत्॥ ततो यं-
त्रलेपं ग्रहणं अथ घृत्वा नैवेद्यं सर्वदेवाय साधकाय च दत्वा शेषं स्वीकृत्य साहमिति भावयन् सुखास ३६
१८ तो वैष्णवाचारपरायणो निःसंगो यथासुखं विहरेदिति॥ तदुक्तं कुलचूडामणौ॥ अनंतरं अथ गुप्तस्थाने स्ना
यंत्रलेपं तु धारयेत्॥ नास्तिकेभ्यो न मूर्खेभ्यो न पशुभ्यो न चाद्विजे॥ कुलीनाय च दातव्यमथवा जल

मध्यतः॥ ततः साह्मितिध्यात्वा चैरम्बा वारमध्यतः॥ यामले॥ नैवेद्यं त्रिपुरादेव्या बांछंति विधाः सु
राः॥ तस्माद्दियं सुरश्रेष्ठं ब्रह्मणा विष्णवे पि च॥ महेशाय सूर्याय गणेशाय यमाय च॥ चंद्राय वरुणा
यापि वायवे धनदाय च॥ इत्याद्यं च महादेवी साधकाय प्रदापयेत्॥ यामले॥ नैवेद्यं गुरवे दत्वा योषित्
भ्यः साधकाय च॥ शेषं भुंजीत मतिमान्देवी भक्तिपरायणः॥ तत्रैव॥ दिव्यं देव्यग्रतः पानं वीरभैकांत
वासिनां॥ अन्यत्रापि॥ पानं तु त्रिविधं प्रोक्तं दिव्य वीर पशु क्रमात्॥ उद्यादकरपर्यंतं स्यात्॥ असंस्कृ
तं पत्रेण पानं पापकृच्छोककोपकृत्॥ दिव्यं देव्यग्रतः पेयादीरं वीरासनस्थितं॥ तृतीयं तु पत्रेणः
पानं पापकृच्छोककोपकृत्॥ उद्याकरपर्यंतं॥ असंस्कृतं पत्रेणः पानं संस्कृतं भरवः स्वयं॥ चक्र
पूजादिके स्थित्वा सर्व शुध्दिकरं शुभं॥ असंस्कृतं पत्रे॥ पानं कुलहंताकरं तथा॥ संस्कृतं सिद्धिज
नकं प्रायश्चित्तादि शोधनं॥ मंत्राणां स्फुरणं तेन महापातकनाशनं॥ आयुः श्रीकांतसौभाग्यं ज्ञानं
संस्कृतकर्मणा॥ अश्रैश्वर्यपरिवेचन तं पतनं विधिवर्जनात्॥ नान्यत्कर्मप्रज्ञानां तव परिचरणं यद्दतेवि
श्वमात्तर्नान्याकाचित्प्रभावात्तव चरणमनो भावनायां विनायैः॥ नान्या ज्ञानं विना ते परतरमहद्दुत्कृ
ष्टभावं स्वरूपं तस्माद्देदेस दाहं त्वच्चरणयुगं पाहिमां सर्वमान्ये॥ ॐ स्वस्ति श्रीगणेशाय नमः॥ ॐ
नमः शिवाय श्री शिव उवाच॥ कथितोयं महामंत्रः सर्वमंत्रोत्तमोत्तमः॥ यमासाद्य मया प्राप्त मैश्वर्यं
पदमुत्तमं॥ संयुक्तः परया भक्त्या यथोक्तं विधिना भवान्॥ कुरु तामर्चनं देव्या त्रैलोक्य विजिगीष
या॥ २॥ श्रीराम उवाच॥ प्रसन्नो यदि मे देव परमेश पुरातनः॥ रहस्यं परया देव्याः कृपया कथय प्र
भो॥ ३॥ विनार्चनं विना होमं विना न्यासं विना बलिं॥ विना गंधं विना पुष्पं विना नित्योदितां क्रियां॥

धामा प्राणायामंविनाध्यानंविनाभूतविशोधनं॥विनाजपंविनाध्यानंयथाकालीप्रसीदति॥५॥श्री दे रहस्य
त्रिवठवाच॥एवंत्वयोक्तंमंत्रार्तभगवंशसमुद्भव॥भक्तानामपिभक्तोसितमेयसाधयिष्यसि॥६॥देवी
दानवकोटिघ्नीलीलयारुधिरप्रिया॥सदास्तोत्रप्रियमुद्रांकामकौतुहलालसां॥७॥सर्वदानंद
हृदयामासवासक्तमानसां॥माध्वीकमत्समांसानुरागणीवैष्णवीपरां॥८॥श्मशानवासिनीप्रेत
गणनृत्यमहोत्सवां॥योगप्रभांयोगनिशांयोगीन्द्रहृदयस्थितां॥९॥तामुग्रकालिकांरामप्रसादयितु
मर्हसि॥तस्यास्तोत्रंमहापुण्यंस्वयंकाल्याप्रकाशितं॥१०॥तवतत्कथयिष्यामिश्रुत्वावत्सावधार
य॥गोपनीयंप्रयत्नेनपठनीयंपरात्परं॥११॥यस्यैककालपठनात्सर्वेविघ्नाःसमाकुलाः॥नश्यंतिदह
नेदीप्तेपतंगाइवसर्वतः॥१२॥निरीथमुक्तकेशास्तुनग्नःशक्तिसमन्विताः॥मनसाचिंतयेत्कालींमहा
कालेनलालितां॥१३॥पठेत्सहस्रनामाख्यंस्तोत्रंमोक्षस्यसाधनं॥प्रसन्नाकालिकातस्यपुत्रत्वेनानुकंपया॥१४
यथाब्रह्मामृतैर्ब्रह्मकुसुमैःपूजितापुरा॥प्रसीदतितथानेनस्तवाकालीप्रसीदति॥१५॥अस्यश्रीदक्षि
णाकालिकास्तोत्रमंत्रस्यभैरवऋषिरनुष्टुप्छंदः॥श्मशानकालीदेवता॥धर्मार्थकाममोक्षार्थेजप
विनियोगः॥श्मशानकालिकाकालीभद्र[redacted]कालीकपालिनी॥गुह्यकालीमहाकालीकुरुकुल्लाविरोधि
नी॥१८॥कालिकाकालरात्रीश्चमहाकालनितंबिनी॥कस्तूरीरसलिप्तांगीकुंजरेश्वरगामिनी॥१९॥ककार
वर्णसर्वांगीकामिनीकामसुंदरी॥कामार्त्ताकामरूपाचकामधेनुःकलावती॥२०॥कांताकामस्वरू
पाचकामाख्याकुलपालिनी॥कुलीनाकुलवत्यंबादुर्गादुर्गतिनाशिनि॥२१॥कौमारीकुलजाकृष्णाकृष्णदेहा ३७
कृशोदरी॥कृशांगीकुलिशांगीचक्रींकारीकमलाकला॥२२॥करालास्याकरालीचकुलकांतापराजिता॥उग्राउ
ग्रप्रभादीप्ताविप्रचित्तामहामनाः॥नीलाघनामेघनादामहामुद्रासितामता॥ब्राह्मीनारायणीभद्रासुभक्ताभ

रुवत्सला॥२४॥माहेश्वरीच्चामुंडावाराहीनारसिंहिका॥वज्रांगीवज्रकंकालीनरमुंडस्रग्विणीशिवा॥२५
मालिनीनरमुंडालीगलद्रक्तविभूषणा॥रक्तचंदनसिक्तांगीसिंदूरारुणमस्तका॥२६॥घोररूपाघोरदंष्ट्रा
घोराघोरतराशुभा॥महादंष्ट्रामहामायासुदंतीयुगदंतुरा॥२७॥सुलोचनाविरूपाक्षीविशालाक्षीत्रि
लोचना॥शारदेंदुप्रसन्नास्यास्फुरत्स्मेरांबुलोचना॥२८॥अट्टहासप्रसन्नास्यास्मेरवक्त्रासुभाषिणी॥
प्रसन्नपद्मवदनास्मितास्याप्रियभाषिणी॥२९॥कोटराक्षीकुलश्रेष्ठामहतीबहुभाषिणी॥सुमतिःकुम
तिश्चंडाचंडमुंडातिवेगिनी॥प्रचंडाचंडिकाचंडीकाचंडीचर्चिकाचंडवेगिनी॥सुकेशीमुक्तकेशीचदीर्घकेशी
महाकचा॥३१॥प्रेतदेहकर्णपूराप्रेतपाणिःसुमेखला॥प्रेतासनाप्रियप्रेताप्रेतभूमिकृतालया॥३२॥श्म
शानवासिनीपुण्यापुण्यदाकुलपंडिता॥पुण्यालयापुण्यदेहापुण्यश्लोकाचपावनी॥३३॥पूतापवित्रापर
मापरापुण्यविभूषणा॥पुण्यनाम्नीभीतिहरावरदाखड्गपाणिनी॥३४॥नरमुंडहस्ताशस्ताछिन्नमस्तासुना
सिका॥दक्षिणाश्यामलाश्यामाशांतापीनोन्नतस्तनी॥३५॥दिगंबराघोररावासृक्वतीरक्तवाहिनी॥घोररा
वाशिवासंगाविसंगामदनातुरा॥३६॥मत्ताप्रमत्ताप्रमदासुधासिंधुनिवासिनी॥अतिमत्तामहामत्तासर्वा
कर्षणकारिणी॥३७॥गीतप्रियावाद्यरताप्रेतनृत्यपरायणा॥चतुर्भुजादशभुजाअष्टादशभुजातथा॥३८
कात्यायनीजगन्माताजगतीपरमेश्वरी॥जगद्बंधुर्जगद्धात्रीजगदानंदकारिणी॥३९॥जगज्जीवमयीहैमव थी
तीमायामहामही॥नागयज्ञोपवीतांगीनागिनीनागशायिनी॥४०॥नागकन्याकुरंगाक्षीगांधर्वीकिन्नरी
श्वरी॥मोहरात्रिर्महारात्रीर्दारुणाभासुरेश्वरी॥४१॥विद्याधरीवसुमतीयक्षिणीयोगिनीजरा॥राक्षसीडाकिनीवे
दमयीवेदविभूषणा॥४२॥श्रुतिःस्मृतिर्महाविद्यागुह्यविद्यापुरातनी॥चिंत्याचिंत्यास्वधास्वाहानिद्रातंद्राचपार्वती॥४३

या॰भ॰ अपर्णा निश्चला लोला सर्वविद्यातपस्विनी ॥ गंगा काशी शची सीता सती सत्यपरायणा ॥४४॥ नीति रहस्य
सुनीतिस्सुरुचीतुष्टिः पुष्टिर्धृतिक्षमा ॥ वाणी बुद्धिर्महालक्ष्मीर्लक्ष्मीनीलसरस्वती ॥४५॥ स्रोतस्वती सारस्वती
मातंगी विजया जया ॥ नदी सिंधुः सर्वमयी तारा शून्यविनाशिनी ॥४६॥ शुद्धा तरंगिणी मेधा शाकिनी बहु
रूपिणी ॥ स्थूला सूक्ष्मा सूक्ष्मतरा भगवत्यनुरूपिणी ॥४७॥ परमाणुस्वरूपा च चिदानंदस्वरूपिणी ॥ स
दानंदमयी सत्या सर्वानंदस्वरूपिणी ॥ रंकिनी डाकिनी चित्रा विचित्रा चित्ररूपिणी ॥ शुभदा नंदिनी स्तुत्या
स्तवनीयस्वरूपिणी ॥४९॥ पद्मा पद्मालया पद्ममुखी पद्मविभूषणा ॥ हाकिनी शाकिनी शांता राकिनी
रुधिरप्रिया ॥५०॥ भ्रांतिर्भवानी रुद्राणी मृडानी शत्रुमर्दिनी ॥ उपेंद्राणी महेशानी ज्योत्स्ना चंद्रस्वरूपि
णी ॥५१॥ सूर्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पुमान् ॥ शक्तिः सूक्तिर्मतिर्माता भुक्तिर्मुक्तिः पतिव्रता ॥५२
सर्वेश्वरी सर्वमाता शर्वाणी हरिवल्लभा ॥ सर्वज्ञा सिद्धिदा सिद्धा भव्या भाव्या भयापहा ॥५३॥ कर्त्री हर्त्री
पालयित्री शर्वरी तामसी दया ॥ तमिस्रा तामसी स्थाणुः स्थिरा धीरा तपस्विनी ॥५४॥ चार्वंगी चंचला
लोलजिह्वा चारुचरित्रिणी ॥ त्रपा त्रपावती लज्जा विलज्जा ह्रीरजोवती ॥५५॥ सरस्वती धर्मनिष्ठा श्रेष्ठा नि
ष्ठुरनादिनी ॥ गरिष्ठा दुष्टसंहर्त्री विशिष्टा श्रेयसी घृणा ॥५६॥ भीमा भयानका भीमनादिनी भीः प्रभावती ॥
वागीश्वरी श्रीर्यमुना यज्ञकर्त्री यजुःप्रिया ॥५७॥ ऋक्सामाथर्वनिलया रागिणी शोभनस्वरा ॥ कलकंठी
कंबुकंठी वेणुवीणापरायणा ॥५८॥ वंशिनी वैष्णवी स्वच्छा धात्री त्रिजगदीश्वरी ॥ मधुमती कुंडलिनी ऋ
द्धिः शुद्धिः शुचिस्मिता ॥५९॥ रंभोर्वशी रती रामा रोहिणी रेवती मघा ॥ शंखिनी चक्रिणी कृष्णा गदिनी पद्मि ३८
नी तथा ॥६०॥ शूलिनी परिघास्त्रा च पाशिनी शार्ङ्गपाणिनी ॥ पिनाकधारिणी धूम्रा शरभी वनमालिनी ॥६१
रथिनी समरप्रीता वेगिनी रणपंडिता ॥ जटिनी वज्रिणी नीला लावण्यांबुधिचंद्रिका ॥६२॥ बलिप्रियासु

दापूज्यापूर्णादैत्येंद्रमाथिनी॥ महिषासुरसंहंत्रीवासिनीरक्तदंतिका॥ ६३॥ रक्तपारुधिराक्तांगीरक्तखर्पर
हस्तिनी॥ रक्तप्रियामांसरुचिरासवासक्तमानसा॥ ६४॥ गलच्छोणितमुंडालिकंठमालाविभूषणा॥ शवासना
चितांतस्थामाहेश्वरीवृषवाहिनी॥ ६५॥ व्याघ्रत्वगंबराचीनचेलिनीसिंहवाहिनी॥ वामदेवीमहादेवीगौरीसर्वज्ञ
भाविनी॥ ६६॥ बालिकातरुणीवृद्धावृद्धमाताजरातुरा॥ सुभ्रुर्विलासिनीब्रह्मवादिनीब्राह्मणीमही॥ मंदा
किनीमंदहासाज्वालामुख्यसुरांतका॥ मानदामानिनीमान्यामाननीयामदोत्तरा॥ मदिरामेदुरोन्मादा
मेध्यासाध्याप्रसादिनी॥ सुमध्यानंतगुणिनीसर्वलोकोत्तमोत्तमा॥ ६९॥ जयदाजित्वराजैत्रीजयश्रीर्ज
यशालिनी॥ सुखदाशुभदासत्यासभासंक्षोभकारिणी॥ ७०॥ शिवदूतीभूतिमतीविभूतिर्भीषणानना॥
कौमारीकुलजाकुंतीकुलस्त्रीकुलपालिका॥ ७१॥ कीर्तिर्यशस्विनीभूषाभूष्याभूतपतिप्रिया॥ सुगुणा
निर्गुणाधृष्टानिष्ठाकाष्ठाप्रतिष्ठिता॥ ७२॥ धनिष्ठाधनदाधन्यावसुधास्वप्रकाशिनी॥ उर्वीगुर्वीगुरुश्रेष्ठा
सगुणानिर्गुणात्मिका॥ ७३॥ महाकुलीनानिःकामासकामाकामजीवनी॥ कामदेवकलारामाभिरामाशिव
नर्तकी॥ ७४॥ चिंतामणिःकल्पलताजाग्रतीदीनवत्सला॥ कार्तिकीकृत्तिकाकृत्याअयोध्याविषमासमा॥ ७५
सुमंत्रामंत्रिणीघूर्णाह्लादिनीक्लेशनाशिनी॥ त्रैलोक्यजननीज्येष्ठामीमांसामंत्ररूपिणी॥ ७६॥ तडागनिम्न
जठराशुष्कमांसास्थिमालिनी॥ अवंतीमथुराहृद्यात्रैलोक्यपावनीश्वरी॥ ७७॥ व्यक्ताव्यक्तानेकमूर्तिःशरभीभीम
नादिनी॥ क्षेमंकरीशंकरीचसर्वसंमोहकारिणी॥ ऊर्ध्वतेजस्विनीक्लिन्नामहातेजस्विनीतथा॥ अद्वैताभो
गिनीपूज्यासुरभीसर्वमंगला॥ ७९॥ सर्वप्रियंकरीभोग्याधरणीपिशिताशना॥ भयंकरीपापहरानिःकलं
कावशंकरी॥ ८०॥ आशातृष्णाचंद्रकलानिद्राणावायुवेगिनी॥ सहस्रसूर्यसंकाशाचंद्रकोटिसमप्रभा॥ ८१
वह्निमंडलमध्यस्थासर्वसत्वप्रतिष्ठिता॥ सर्वाचारवतीसर्वदेवकन्याधिदेवता॥ ८२॥ दक्षकन्यादक्षयज्ञ

श्यामा नाशिनीदुर्गतारिणी॥ ईज्याप्रज्याविनिर्भूतिः सत्कीर्तिब्रह्मरूपिणी॥८३॥ रंभोरुश्चतुराकाराजयंतीक रहस्य
रुणाकुहूः॥ मनस्विनीदेवमातायशस्याब्रह्मचारिणी॥८४॥ सिद्धिदावृद्धिदावृद्धिः सर्वाद्यासर्वदायिनी॥ अ
गाधरूपिणीध्येयामूलाधारनिवासिनी॥८५॥ आज्ञाप्रज्ञापूर्णमनाश्चंद्रमुख्यनुकूलिनी॥ वा — दूकानिम्नना
भिः सत्यसंध्यादृढव्रता॥ आन्वीक्षिकीदंडनीतिस्त्रयीत्रिदिवसुंदरी॥ ज्वालिनीज्वालिनीशैलतनयाविंध्यवासि
नी॥८७॥ प्रत्ययाखेचरीधैर्यातुरीयाविमलातुरा॥ प्रगल्भावारुणीच्छायाशशिनीविस्फुलिंगिनी॥८८॥ मु
क्तिः सिद्धिः सदाप्राप्तिः प्राकाम्यामहिमाणिमा॥ इच्छासिद्धिर्वशित्वाचईशित्वोर्ध्वनिवासिनी॥८९॥ लघिमाचैवगा
यत्रीसावित्रीभुवनेश्वरी॥ मनोहराचितादिव्यादेव्युदारामनोरमा॥९०॥ पिंगलाकपिलाजिह्वारसज्ञारसिकार
सिकारसा॥ सुषुम्नेडाथयोगवतीगांधारीनवकांतिका॥९१॥ पांचालीरुक्मिणीराधाराध्याभीमाधमाधिका॥ अमृ
तातुलसीवृंदाकैटभीकपटेश्वरी॥९२॥ उग्रचंडेश्वरीवीरजननीवीरसुंदरी॥ उग्रतारायशोदाख्यादेवकीदेव
मानिता॥९३॥ निरंजनार्चितादेवीक्रोधिनीकुलदीपिका॥ कुलवागीश्वरीज्वालामत्त।को - - - - ॥९४
द्राविणीगोपिनीमायाकामकामबीजेश्वरीक्रिया॥९६॥ शाकंभरीकोकनदामत्सालास्यातिलोत्तमा॥
अमेयाविक्रमाक्रूरासंपच्छीलात्रिविक्रमा॥९७॥ स्वस्तिर्हव्यवहाप्रीतिरुष्माधूमार्चिरंगदा॥ तापिनीताप
नीविश्वाभोगदाभोगधारिणी॥९८॥ त्रिखंडाबोधिनीवश्यासकलाशब्दरूपिणी॥ बीजरूपामहामुद्रावशि
नीयोगरूपिणी॥९९॥ अनंगकुसुमानंगमेखलानंगरूपिणी॥ अनंगमदनानंगरेखानंगांकुशेश्वरी॥१००
अनंगमालिनीकामेश्वरीसर्वार्थसाधिका॥ सर्वमंत्रमयीमोहिन्यरूपानंगरूपिणी॥१॥ वज्रेश्वरीच ३९
जननीसर्वदुःखक्षयंकरी॥ षडंगयोगयुवतीयुक्ताज्वालांशुमालिनी॥२॥ दुराशयादुराधर्षादुर्ज्ञेयादुर्गरू
पिणी॥ दुरंतादुष्कृतिहरादुर्ध्येयादुरतिक्रमा॥३॥ हंसेश्वरीत्रिकोणस्थाशाकंभर्यनुकंपिनी॥ त्रिकोण

नित्यानित्यापरमामृतरंजिता॥४॥महाविश्वेश्वरीश्वेताभेरुंडाकुलसुंदरी॥लीरिताभक्तिसंयुक्ताभक्त
वश्यासनातनी॥५॥भक्तानंदमयीभक्ताभाविताभक्तसुंदरी॥सर्वसौंदर्यनिलयासर्वसौभाग्यशालि
नी॥६॥सर्वसंभोगभवनासर्वसौख्यनिरूपिणी॥कुमारीपूजनरताकुमारीव्रतचारिणी॥७॥कुमारीभ
क्तिसुखिनीकुमारीरूपधारिणी॥कुमारीपूजकप्रीताकुमारीप्रीतिदाप्रिया॥८॥कुमारीसेवकासंगाकु
मारीसेवकालया॥आनंदभैरवीबालाभैरवीवटुभैरवी॥९॥श्मशानभैरवीकालभैरवीपुरभैरवी॥म
हाभैरवपत्नीचपरमानंदभैरवी॥१०॥सुरानंदभैरवीचअमृतानंदभैरवी॥मुक्तानंदभैरवीचतथात
रुणभैरवी॥११॥ज्ञानानंदभैरवीचअमृतानंदभैरवी॥महाभयंकरीतीव्रातीव्रवेगातरस्विनी॥१२॥त्रिपु
रापरमेशानीसुंदरीपुरसुंदरी॥त्रिपुरेशीपंचदशीपंचमीपुरवासिनी॥१३॥महासप्तदशीचैवषोडशी
त्रिपुरेश्वरी॥महांकुशस्वरूपाचमहाचक्रेश्वरीतथा॥१४॥नवचक्रेश्वरीचक्रेश्वरीत्रिपुरमालिनी॥
राजराजेश्वरीवीरामहात्रिपुरसुंदरी॥१५॥सिंदूरपूररुचिराश्रीमत्त्रिपुरसुंदरी॥सर्वांगसुंदरीरक्तारक्तव
स्त्रोत्तरीयिणी॥१६॥यवायावकसिंदूररक्तचंदनरूपधृक्॥यवायावकसिंदूररक्तचंदनधारिणी॥१७
चामरीबालकुटिलनिर्मलश्यामकेशिनी॥रत्नमौक्तिकरत्नाढ्यकिरीटमुकुटोज्ज्वला॥१८॥रक्तकुं
डलसंयुक्तस्फुरद्गंडमनोरमा॥कुंजरेश्वरकुंभोत्थमुक्तारंजितनासिका॥मुक्ताविद्रुममाणिक्यहा
राढ्यस्तनमंडला॥सूर्यकांतेंदुकांताढ्यस्पर्शाश्मकंठभूषणा॥२०॥बीजपूरस्फुरद्बीजदंतपंक्तिरनु
त्तमा॥कामकोदंडकाभुग्नभ्रूकटाक्षप्रवर्षिणी॥२१॥मातंगकुंभवक्षोजालसत्कोकनदेक्षणा॥
मनोज्ञशष्कुलीकर्णाहंसीगतिविडंबिनी॥२२॥पद्मरागांगदद्योतद्दोश्चतुष्कप्रकाशिनी॥नानामणिप
रिस्फूर्जत्स्वर्णकंकणभूषणा॥२३॥नागेंद्रदंतनिर्माणवलयांचितपाणिनी॥अंगुलीयकचित्रांगीविचित्र

क्षुद्रघंटिका ॥२४॥ पट्टांबरपरीधाना कलमंजीररंजिता ॥ कर्पूरागरुकस्तूरीकुंकुमद्रवलेपिता ॥२५॥
विचित्ररत्नपृथिवीकल्पशाखितलस्थिता ॥ रत्नद्वीपस्फुरद्रत्नसिंहासननिवासिनी ॥२६॥ षट्चक्रभेदनकरी
परमानंदरूपिणी ॥ सहस्रदलपद्मांतश्चंद्रमंडलवर्तिनी ॥२७॥ ब्रह्मविष्णुशिवक्रोडनानासुखविलासिनी ॥
हरविष्णुविरंच्यैंद्रग्रहनायकसेविता ॥२८॥ आत्मयोनिर्ब्रह्मयोनिर्जगद्योनिरयोनिजा ॥ भगरूपा भगस्थात्री
भगिनी भगवासिनी ॥२९॥ लिंगस्था लिंगिनी लिंगरूपिणी लिंगसुंदरी ॥ लिंगस्था लिंगिनी लिंगात्रिया लिंगसुकांक्षिणी ॥१३०॥
शिवा शैवा शुभद्राणि शिवदा शिवनादिनी ॥ मातंगी भ्रामरी माता मोक्षवानंगमेखला ॥३१॥ डाकिनी योगिनीचैव
त्रयायोगी नमस्कृता ॥ माहेश्वरी चैश्रवी च भ्रामरी शिवरूपिणी ॥३२॥ अलंबुषा वेगवती क्रोधरूपा सुमेख
ला ॥ गांधारी गजलंबा च इडा चैव शुभंकरी ॥३३॥ पिंगला ब्रह्मदूती च सुषुम्ना चैव गंधिनी ॥ लिंगस्था चैव लिंगे
शी त्रिपुरा भैरवी तथा ॥३४॥ लिंगस्था लिंगिनी तस्मा लिंगगीति तथैव च ॥ लिंगमाला लिंगभवा लिंगलिंगा च पार्व
ति ॥३५॥ भगवती कौशिकी चैव प्रेमा चैव प्रियंवदा ॥ गृध्ररूपा शिवारूपा चक्रिणी चक्ररूपधृक् ॥३६॥ लिंगाभीति
र्भगाभीतिर्भगगीतिः सदारतिः ॥ लिंगनामं सदानंदा भगनामसदारतिः ॥३७॥ लिंगमालाकंठभूषा भगमा
लाविभूषणा ॥ भगलिंगामृतप्रीता भगलिंगस्वरूपिणी ॥३८॥ भगलिंगस्वरूपा च भगलिंगसुखावहा ॥ स्व
यंभूकुसुमप्रीता स्वयंभूकुसुमार्चिता ॥३९॥ स्वयंभूकुसुमप्राणा स्वयंभूकुसुमोत्थिता ॥ स्वयंभूकुसुमस्ना
ता स्वयंभूकुसुमार्पिता ॥१४०॥ स्वयंभूपुष्पघटिता स्वयंभूपुष्पधारिणी ॥ स्वयंभूपुष्पतिलका स्वयंभूपुष्प
चर्चिता ॥४१॥ स्वयंभूपुष्पनिरता स्वयंभूकुसुमग्रहा ॥ स्वयंभूपुष्पयज्ञांगा स्वयंभूकुसुमात्मिका ॥४२॥ ४०
स्वयंभूपुष्पनिलया स्वयंभूकुसुमप्रिया ॥ स्वयंभूकुसुमादानलालसोन्मत्तमानसा ॥४३॥ स्वयंभूकुसुमानं
दलहरीस्निग्धदेहिनी ॥ स्वयंभूकुसुमाधारा स्वयंभूकुसुमाकुला ॥४४॥ स्वयंभूपुष्पनिलया स्वयंभू

स्वयंभूपुष्पवासिनी ॥ स्वयंभूकुसुमस्निग्धा स्वयंभूपुष्पकारिणी ॥ स्वयंभूकुसुमप्राणा स्वयंभूकुसु
मप्रभा ॥ स्वयंभूकुसुमज्ञाना स्वयंभूकुसुमव्रता ॥ ४६ ॥ स्वयंभूकुसुमज्ञाना स्वयंभूपुष्पभोगिनी ॥ स्वयं ध्यौ
भूकुसुमोल्लासा स्वयंभूपुष्पवर्षिणी ॥ ४७ ॥ स्वयंभूकुसुमानंदा स्वयंभूपुष्पपुष्पिणी ॥ स्वयंभूकुसुमोत्सा
हा स्वयंभूपुष्परूपिणी ॥ ४८ ॥ स्वयंभूकुसुमोन्मादा स्वयंभूपुष्पसुंदरी ॥ स्वयंभूकुसुमाराध्या स्वयंभूकु
सुमोद्भवा ॥ ४९ ॥ स्वयंभूकुसुमव्यग्रा स्वयंभूपुष्पपूर्णिता ॥ स्वयंभूपूजकप्रज्ञा स्वयंभूहोतृमातृका ॥ ५०
स्वयंभूदधिनक्षत्री स्वयंभूभक्तिभाविता ॥ स्वयंभूपूजकग्रस्ता स्वयंभूपूजकप्रिया ॥ ५१ ॥ स्वयंभूवं
दकाधारा स्वयंभूनिंदकांतका ॥ स्वयंभूप्रदसर्वस्वा स्वयंभूप्रदपुत्रिणी ॥ ५२ ॥ स्वयंभूप्रदसस्मेरा स्व
यंभूपुष्पवीरिणी ॥ सर्वकालोद्भवप्रीता सर्वकालोद्भवोद्भवा ॥ ५३ ॥ सर्वकालोद्भवोद्भावा सर्वकालोद्भवोद्भवा क्लिंक्लौं
कुंडपुष्पसदाप्रीतिर्गोलपुष्पसदारतिः ॥ ५४ ॥ कुंडगोलोद्भवप्रीता कुंडगोलोद्भवात्मिका ॥ स्वयंभुवा शिवा ऊ
धात्री धात्रीपुष्पसदारतिः ॥ ५५ ॥ पावनी लोकपावनी ॥ ५५ ॥ कीर्तिर्यशस्विनी मेधा विमेधा शुक्रसुंदरी ॥
सुखदा मोक्षदा मोक्षा मोक्षदात्मप्रकाशिनी ॥ ५६ ॥ शुक्राधारा शुक्ररूपा शुक्रसिंधुनिवासिनी ॥ शुक्राल
या शुक्रभोगा शुक्रपूजासदारतिः ॥ ५७ ॥ शुक्रपूज्या शुक्रहोमसंतुष्टा शुक्रवत्सला ॥ शुक्रमूर्तिः शुक्रकी
शुक्रपूजकपुत्रिका ॥ ५८ ॥ शुक्रस्था शुक्रिणी शुक्रसंस्पृहा शुक्रसुंदरी ॥ शुक्रस्नाता शुक्रदेहा शुक्रातुष्टा
निःशुक्रिणी ॥ ५९ ॥ महाशुक्रा शुक्रभवा शुक्रवृष्टिविधायिनी ॥ शुक्राभिधेया शुक्रार्हा शुक्रवंदकवंदिता ॥ ६०
शुक्रानंदकरी शुक्रसदानंदविधायिनी ॥ शुक्रोत्सवा सदा शुक्रा पूर्णा शुक्रमनोरमा ॥ ६१ ॥ शुक्रपूजकस
र्वस्वा शुक्रनिंदकनाशिनी ॥ शुक्रात्मिका शुक्रसंपत् शुक्राकर्षणकारिणी ॥ ६२ ॥ शारदा साधकप्राणा साध
कासक्तमानसा ॥ साधकानंदसंतोषा साधकारिविनाशिनी ॥ ६३ ॥ साधकोत्तमसर्वस्वा साधकान्तर्निवासिनी ॥

आत्मविद्या ब्रह्मविद्या परब्रह्मकुटुम्बिनी॥ ६४॥ त्रिकूटस्था पंचकूटा सर्वकूटा शरीरिणी॥ सर्ववर्ण रहस्
मयी वर्णजपमाला विधायिनी॥ ६५॥ शिव उ॰ इति श्रीकालिकानाम्नां सहस्रं शिवभाषितं॥ गुह्याद्गुह्य
तरं साक्षात् महापातकनाशनं॥ ६६॥ पूजाकाले निशीथे च संध्ययोरुभयोरपि॥ लभते गाणपत्यं स यः
पठेत्साधकोत्तमः॥ ६७॥ यः पठेत्पाठयेद्वापि शृणोति श्रावयेदपि॥ सर्वपापविनिर्मुक्तः स याति का
लिकापदं॥ ६८॥ श्रद्धयाऽश्रद्धया वापि यः कश्चिन्मानवः पठेत्॥ दुर्गं दुर्गतरं तीर्त्वा स देव्याः पार्षदो भवेत्॥
६९॥ वंध्या वा काकवंध्या वा मृतवत्सा च यांगना॥ श्रुत्वा स्तोत्रमिदं पुत्रान् लभते चिरजीविनः॥ यं यं कामय
ते कामं पठेत्स्तोत्रमनुत्तमं॥ देवीवरप्रसादेन तं तमाप्नोति नित्यशः॥ ७१॥ स्वयंभूकुसुमैः शुक्लैः सुगंधि
कुसुमान्वितैः॥ यवायाकासिंदूररक्तचंदनसंयुतैः॥ ७२॥ मत्स्यमांसादिभिर्वीरमधुभिः साज्यपायसैः॥
भक्ष्यापनीतैर्मंत्रेण साधितैः शक्तिभिः सह॥ ७३॥ पंचोपचारैर्नैवेद्यैर्बलिभिर्बहुशोणितैः॥ धूपदीपैर्म
हादेवीं पूजयित्वा मनोहरैः॥ ७४॥ जप्त्वा महामनुं स्तोत्रं पठेद्भक्तिसमन्वितः॥ अनन्यचेतास्थिरधी
र्मुक्तकेशो दिगंबरः॥ ७५॥ शवारूढश्चितास्थो वा श्मशानालयमागतः॥ सर्वविद्यावतां श्रेष्ठो धनेनच
धनाधिपः॥ ७६॥ शून्यालयगतो वापि छायास्थो वा शिवात्मकः॥ स भवेत्कालिकापुत्र इति ख्यातिमुपागतः॥ ७७
वायुतुल्यबलो लोके दुर्जयः शत्रुमर्दनः॥ सर्वसंकटमुत्तीर्णः सर्वसिद्धिसमन्वितः॥ ७८॥ मधुमत्या स्वयं
देव्या सेव्यमानः स्मरोपमः॥ मेरुशाद्वयोगींद्रः सर्वसत्वपुरस्कृतः॥ ७९॥ कामिनीकामरूपोऽसौ सर्वाकर्षण
कारकः॥ जलसूर्येंदुवायूनां स्तंभको राजवल्लभः॥ ८०॥ यशस्वी मत्कविर्धीमान् समंत्री कोकिलस्वरः॥ बहुपु ८२
त्रीगजाश्वानामीश्वरो धार्मिकः कृती॥ ८१॥ मार्कंडेयस्त्वायुष्मान् जरापलितवर्जितः॥ नवयौवनसंयुक्तः स्यादपि
वर्षसहस्रभाक्॥ ८२॥ बहुना किं कथ्यते तस्य पठतः स्तवमुत्तमं॥ न किंचिद्दुर्लभं लोके यद्यन्मनसि कल्पितं॥ ८३

अथमद्यस्यासुरापानंस्तेयंगुर्वंगनागमः॥ सर्वमाशुतरत्येवस्तवस्यास्यप्रसादतः॥८४॥ रजस्वलाभगंपश्य
न्तोयोवाकालीमहामनुं॥ स्तवेनानेनसंस्तुष्य: साधकःकिंनसाधयेत्॥८५॥ परदारपरोवापिमनुंजप्त्वाप
ठेत्स्तवं॥ कुबेरइववित्ताढ्योजायतेमदनोपमः॥८६॥ अष्टोत्तरशतंजप्त्वायोनिमामंत्र्यमंत्रवित्॥ संगम्य
पठनादस्यसर्वविद्येश्वरोभवेत्॥८७॥ दिगंबरोमुक्तकेशोशय्यास्थोमिथुनीनरः॥ जप्त्वास्तुत्वामहाकालीं
खेचरोजायतेचिरात्॥८८॥ शुक्रोत्सारणकालेनजपपूजापरायणः॥ श्मशानकालिकांस्तुत्वावाणीवत्स
कविर्भवेत्॥८९॥ आलोकयेच्चिंतयेद्वाविवस्त्रांपरयोषितां॥ जप्त्वास्तुत्वामहाकालीखेचरोजायतेचिरात्॥९०
सुरतेषुमनुंजप्त्वास्तुत्वाभगवतींशिवां॥ सर्वपापैःपरित्यक्तोमानवःस्याच्छुकोपमः॥९१॥ कुहूपूर्णेंदुसं
क्रांतिचतुर्दश्यष्टमीषुच॥ नवम्यांमंगलेदिनेपठेत्स्तोत्रंसुसाधकः॥९२॥ भौमावास्यांनिशीथेचचतुःप
थगतोनरः॥ मांसभक्तबलिंदत्वासदुग्धमीनशोणितं॥९३॥ अष्टोत्तरशतंजप्त्वापठेन्नामसहस्रकं॥ सुद
र्शनोभवेच्छुद्धेवगंधर्वसेवितः॥९४॥ येनकेनप्रकारेणकालीभक्तिपरायणः॥ स्तंभयेदखिलान्लोकान्
राजानमपिमोहयेत्॥९५॥ आकर्षयेद्देवकन्यांवशयेदपिकेशवं॥ मारयेदखिलान्दुष्टानुच्चाटयतिवि
श्वान्॥९६॥ नरमार्जारमहिषच्छागमूषकशोणितैः॥ सास्थिमांससमधुभिःसाम्तैर्दुग्धपायसैः॥९७
योनिप्रक्षालिततोयेनभगलिंगामृतेनच॥ शुक्रपूजाजपांतेचकालींसंतर्प्यसाधकः॥९८॥ सहस्रनाम
भिर्दिव्यैस्तौतिभक्तिपरायणः॥ मातेवकालिकातस्यसर्वत्रहितकारिणी॥९९॥ परनिंदापरद्रोहपरवाद
परायच॥ खलायपरतंत्रायभ्रष्टायासाधकायच॥१००॥ शिवाभक्तायदुष्टायदूषकायदुरात्मने॥ हरिभ
क्तिविहीनायपरदाररतायच॥ पूजाजपविहीनायसुरास्त्रीनिंदकायच॥ नदत्तंदर्शयेद्दिव्यंसंदत्तेपिवि
वहाभवेत्॥२॥ कुलीनायमहेशायदुर्गाभक्तिपरायच॥ वैष्णवायविशुद्धायभक्तभक्तायमंत्रिणे॥३॥ १

अद्वैतानंदरूपाय निवेदितवराय च ॥ देव्यास्तोत्रं महाकाल्याः साधकाय न दातव्या ॥४॥ गुरुर्विष्णुर्महे
शानामभेदेन महेश्वरी ॥ स मंत्रं भावयेन्मंत्री महेशो नात्र संशयः ॥५॥ स शक्तिः शिवभक्तश्च स एव वैस
त्तमः ॥ संपूज्य स्तौति यः कालिमद्वैतभावमावहन् ॥६॥ देव्यानंदेन सानंदो देवीभक्त्यैव भक्तिमान् ॥ स
स्वयं धन्यो यस्यार्थे महेशो व्यग्रमानसः ॥७॥ कामयित्वा यथाकामं स्तवमेनमुदीरयेत् ॥ सर्वरोगैः परि
त्यक्तो जायते मदनोपमः ॥८॥ चक्रं वा स्तवमेनं वा धारयेदंगसंगतं ॥ विलिख्य विधिवत्साधुः स एव कालि
कातनुः ॥९॥ देव्यै निवेदितं यद्यत्तत्सर्वं भक्षयेन्नरः ॥ दिव्यदेहधरो भूत्वा देव्याः पार्श्वचरो भवेत् ॥१०॥ नैवे
द्यनंदकं दृष्ट्वा न संती योगिनीगणाः ॥ रक्तपानोद्यताः सर्वा मांसास्थिचर्वणोद्यताः ॥११॥ तस्मिन्निवेदितं दे
व्यै दृष्ट्वा श्रुत्वा तु मानवः ॥ न निंदेन्मनसा वाचा सर्वव्याधिपराङ्मुखः ॥१२॥ आत्मानं कालिमात्मानं भावयन्
स्तौति मानवः ॥ शिवोपमं गुरुं ध्यात्वा स एव श्रीसदाशिवः ॥१३॥ यस्यालये तिष्ठति नूनमेतत्स्तोत्रं भवान्या
लिखितं विधिज्ञैः ॥ गोरोचनालक्तककुंकुमाक्तकर्पूरसिंदूरमधुद्रवेण ॥१४॥ न तत्र चौरस्य भयं न दस्यो
र्न चोरगस्याशनिवह्निभीतिः ॥ उत्पातवायोरपि नात्र शंका लक्ष्मीः स्वयं तत्र वसेदलोला ॥१५॥ स्तो

श्रुहस्ताभ्यांअवलंब्योन्मनीस्रुचा॥धर्माधर्मकलास्नेहपूर्णमग्नौजुहोम्यहं॥स्वाहांतोयंमहामंत्रः
शुक्लयागोविधीयते॥अथास्यप्रयोगोलिख्यते॥यथा॥निग॥यांशक्तिंशुक्लांस्ववामभागेसमानीय वीं
तदात्रेषुकल्पोक्तन्यासान्विधाय॥अदीक्षिताचेत्तदापूर्वोक्ताभिषेकक्रमेणतीर्थादिनाभिषेकंकृत्वा
अस्याःकर्णेदेवींबुध्वामंत्रमुच्चरेत्॥इतिशक्तिशुद्धिः॥ततोमकारपंचमेनदेवींसपूज्यमूलांतेधर्मा
धर्मेत्यादिकंपठन्॥मातृपीठेपितृस्रुवंदत्वाजपंकुर्यात्॥ततोमूलांतेप्रकाशाकाशेत्यादिकंपठन्॥
तदुत्सृजेत्॥इति॥अथवामातृपीठेसावरणांदेवींध्यात्वापूजयित्वाचन्ह्निर्वोहमितिभावयन्नुभयोःसंग
मंकृत्वापूर्ववज्जपादिकंकुर्यात्॥इत्यपरःप्रकारः॥इतिश्रीपूर्णानंदपरमहंसविरचितेश्यामारहस्य
पंचमःपरिच्छेदः॥ ॥अथकुलीनाचारक्रमोलिख्यते॥तदुक्तंकालीतंत्रे॥अथा
चारंप्रवक्ष्यामियत्कृत्वामृतमश्नुते॥सर्वभूतहितेयुक्तःसमयाचारपारगः॥अनित्यकर्मसंत्यागीनित्या
नुष्ठानतत्परः॥मंत्राराधनद्वारेणशिवभावेनतत्परः॥परस्यांदेवतायांतुसर्वकर्मनिवेदकः॥अन्यमं
त्रार्चनिंदाश्चामन्यमंत्रप्रपूजनं॥कुलस्त्रीवीरनिंदांचतद्द्रव्यस्यापहारणं॥स्त्रीषुरोषंप्रहासंचवर्जये
न्मतिमान्सदा॥स्त्रीमयंचजगत्सर्वंस्वयंतावत्तथाभवेत्॥पेयंचर्व्यंतथाचोष्यंभक्ष्यंलेह्यंगृहंमुखं॥
सर्वंचयुवतीरूपंभावयेच्चतमानसः॥कुलजांयुवतींवीक्ष्यनमस्कुर्यात्समाहितः॥यदिभाग्यवशेनैव
कुलदृष्टिस्तुजायते॥तदैवमानसीपूजातत्रतासांप्रकल्पयेत्॥बालांवायौवनोन्मत्तांवृद्धांवासुंदरींतथा॥
कुत्सितांवामहादुष्टांनमस्कृत्यविभावयेत्॥तासांप्रहारंनिंदांचकौटिल्यमप्रियंतथा॥सर्वथानचकर्तव्य
मन्यथासिद्धिरोधकृत्॥स्त्रियोदेवाःस्त्रियःप्राणाःस्त्रियएवहिभूषणं॥स्त्रीसंगिनासदाभाव्यमन्यथास्व
स्त्रियापि॥विपरीतरतासातुभाविनाहृदयोपरि॥नखस्तरचितंपुष्पंनखस्तरचितंजलं॥नखस्तरचितंभोज्यं

देवताभ्यो निवेदयेत्॥ स्त्रीद्वेषो नैव कर्तव्यो विशेषात् पूजनं महत्॥ जपस्थाने महाशंखं निवेश्योर्ध्वं
जपं चरेत्॥ स्त्रियं गच्छन् स्पृशन् पश्यन् [illegible]त्र विशेषात् कुलजां शुभां॥ गंधताम्बूलमन्यं च भक्ष्यद्रव्यं यथारुचि॥
मांसमत्स्यदधिक्षौद्रनानाविधसमन्वितं॥ भुक्त्वाप्यशेषभक्ष्याणि देव्यै दत्त्वा चरेज्जपं॥ दिक्कालनियमो
नात्रस्थित्यादिनियमो न च॥ न जपे कालनियमो नार्चादिषु बलि[illegible]पि॥ सर्वदा पूजयेद्देवी मस्नातः कृतभोज
नः॥ स्वेच्छानियम उक्तोत्र महामंत्रस्य साधने॥ वस्त्रासनस्थानदेहगेहस्पर्शादिवारिणः॥ शुद्धिं नच[?]र्चयेदत्र
निर्विकल्पं मनश्चरेत्॥ सर्व एव शुभः कालो नाशुभो विद्यते क्वचित्॥ न विशेषो दिवारात्रौ न संध्यायां महानि
शि॥ नात्र शुद्ध्याद्यपेक्षास्ति न च्यामेध्यादिदूषणं॥ नाधर्मो विद्यते सुभ्रु कैञ्च धर्मो महान् भवेत्॥ स्वेच्छाचारोत्र ग
दितः प्रचरेत्स्वस्थमानसः॥ कृतार्थो मन्यमानस्तु संतुष्टो न्यूनमानसे॥ इत्याचारपरो मंत्री जपपूजादितत्
परः॥ पातकं कुलतत्त्वानां परतत्त्वे प्रलीयते॥ उद्धृत्य सच्चिदानंदमयः संसारमोचनः॥ अणिमाद्यष्टसि
द्धिनामधिपः साधको भवेत्॥ ॥अथ मंत्रभेदा निरूप्यते॥ तदुक्तं सिद्धेश्वरतंत्रे॥ अथ वक्ष्यामि तां देवीं का
लिकां भवतारिणीं॥ यद्ज्ञात्वा साधको भोगान् भुक्त्वा मोक्षमवाप्नुयात्॥ मूकोपि कविता मेति धनेन च धनाधिपः॥
बलेन पवनः साक्षाद्रूपेण च मनोभवः॥ मंत्रोद्धारं शृणुष्वाथ कुब्जाकृत्यतमं प्रिये॥ गांताद्वह्निमारूढं वामनेत्र
णसंयुतं॥ चंद्रार्धबिंदुनाभिन्नं भूषितं परमेश्वरी॥ सांताद्वामनेत्रस्थं वह्निचंद्रसमन्वितं॥ बीजरत्नमिदं प्रोक्तं
साक्षात्कल्पद्रुमं प्रिये॥ मादनं चेंद्रबीजस्थं भूतस्वरसमन्वितं॥ चंद्रार्धबिंदुभूषाढ्यं संपूर्णं सिद्धिदा मनुः॥ अ
स्यैवाशेषमाहात्म्यं वक्तुं नाहं महेश्वरः॥ तथापि कथ्यते देवी संक्षेपादस्य यत्फलं॥ मोक्षार्थी पुलभेत मोक्षं कैव
ल्यं परमं पदं॥ देवीरूपं जगत्सर्वं यत्तद्ध्येयं न तत्र विवर्जयेत्॥ अथ मंत्रांतरं तदुक्तं॥ तत्रैव विश्वेश्वरतंत्रे च॥ मंत्रांतरं प्र
वक्ष्यामि शृणु पार्वति सादरं॥ यस्या[illegible]राधनमात्रेण सर्वसिद्धीश्वरो भवेत्॥ अप्रकाश्यं परं गुह्यं न देयं यस्य कस्यचित्॥

नकुत्रापिसमाख्यातंतवस्नेहात्प्रोच्यते॥पूर्वोक्तमंत्रराजस्यशेषवर्णद्वयंप्रिये॥संहारवृत्तिमार्गेणबंधुध्यो
पिनरर्च्चयेत्॥मंत्रस्यस्मरणादेवसकृदस्यस्यसुंदरी॥कोटिद्विजन्मार्जितंपापंतत्क्षणादेवनश्यति॥गद्यपद्यम
यीवाणीतस्यसर्वविधाभवेत्॥तस्यसंस्पर्शमात्रेणवादिनःकुंठतांगताः॥सदातंगौतमीवाणीनत्यजेत्तुकदाच
न॥द्वंद्वभावंपरित्यज्यकिमन्यद्बहुजल्पितैः॥यद्यत्प्रार्थयतेमंत्रीतत्तदाप्नोतिनित्यशः॥ऋषिस्याद्भैरवोदेवो
नुष्टुप्छंदःप्रकीर्तितं॥देवताकालिकाप्रोक्ताचतुर्वर्गफलप्रदा॥ध्यानमस्याःप्रवक्ष्यामिशृणुपार्वतिसादरं॥
नीलेंदीवरसन्निभांत्रिनयनांमायीनतुंगस्तनींभास्वन्मौलिकिरीटशोभिगगनांक्षीणांभुजैर्बिभ्रतीं॥खड्गंमुंड
वराभयान्स्मितमुखीमोहांधकारापहांध्यायेत्सम्यगनाकुलेनमनसाप्रेतासनांकालिकां॥एवंध्यानपरो
देवीसर्वान्कामानवाप्नुयात्॥उक्तपीठेमहेशानीततःपूजांसमाचरेत्॥रात्रौद्वितीययामेवअन्नात्कौदिवसे
प्रिय॥हेमाद्याश्रमादाययंत्रंकुर्याद्विचक्षणः॥अष्टपत्रंलिखेत्सम्यक्चतुर्द्वारसुशोभितं॥तन्मध्येत्रि
कोणंस्यात्तन्मध्येविलिखेन्मनुं॥दक्षिणावत्समर्चादिविशेषःपुनरुच्यते॥प्रातःकृत्यादिकंकृत्वान्याप
कन्यासमाचरेत्॥तत्रविशेषोयथा॥तत्रैवोक्तं॥आचांतोमूलमंत्रेणशिखांबध्वातुमंत्रतः॥स्वाहांतंम
लमुच्चार्यसर्ववश्यकरीतिच॥मनुनानेनदेवेशिशिखाबंधनमाचरेत्॥तदुक्त्वामूलमंत्रतःसर्वशुद्धिं
समाचरेत्॥अनेनमनुनादेविस्थानशुद्धिंसमाचरेत्॥षड्दीर्घयुक्तेनाघनषडंगानिन्यसेद्बुधः॥यंत्रेत्रि
हासनेकृत्वापीठपूजांसमाचरेत्॥किंतुपीठशक्तौविशेषस्तदुक्तंतत्रैव॥ब्रह्माणीमंगलादुर्गाजयंतीवि
जयांजयां॥वाराहीभुवनेशीचप्रागादिषुयादिरस्तुच॥संपूज्यगंधपुष्पैस्तुदेवींध्यायेत्समाहितः॥गंधाद्यैर
र्चयेन्मंत्रीआत्मानंदेवतामयं॥ध्यात्वामार्गक्रमेणैवयंत्रमध्येतुसाधकः॥समानीयततोदेवींतत्रावाहनमु
द्रया॥प्राणप्रतिष्ठांकृत्वातुपाद्याद्यैरभिरर्चयेत्॥अनुलेपंप्रयत्नेनदद्यात्गंधादिभिर्युतं॥नानाविधैर्नैवेद्य

पायसंश्वार्करायुतं ॥ दत्त्वा तु यत्नतो मंत्री बलिं चैव विधानतः ॥ षडंगानि प्रपूज्याथ तथैवावरणं यजेत् ॥
त्रिकोणे पूजयेद्देवीं कामाख्यां भद्रकालिकां ॥ त्रिपुरां च समभ्यर्च्य वामावर्त्तक्रमेण तु ॥ उग्रचंडां प्रचंडां च भै-
रवीं चापरे त्रिके ॥ महेश्वरीं तथा दुर्गां वैष्णवीं चापरे त्रिके ॥ ततोष्टदलपत्रेषु ब्रह्माद्याः पूजयेत्क्रमात् ॥
पश्चाद्बहिः समभ्यर्च्य भैरवाष्टकमेव च ॥ तद्बहिश्चापि देवेशि दिक्पालांश्च समर्चयेत् ॥ तेषामस्त्राणि तद्बहिः
पूजनीयानि यत्नतः ॥ स्वाहांतेनैव मूलेन देवीं सावरणां ततः ॥ पाद्याद्यैरर्चयित्वा तु यथाशक्ति जपं चरेत् ॥ ए-
वं पूजापरो देवी साधको विजितेंद्रियः ॥ अंतकाले च देवेश्यां तस्यैव प्रविलीयते ॥ न कुत्रापि भयं तस्य
मंत्रराजं स्मरेत्तु यः ॥ न देयं कस्यचित्तस्मात् स्वकुले न्यकुलेपि वा ॥ यस्मै कस्मै न देवेशि दद्यान्मंत्रमनुत्तमं ॥
तद्राज्यस्थाय पुत्राय पंडिताय विनीतये ॥ अन्यस्मै न प्रकाश्यं तु स्नेहाद्भयादपि ॥ एतत्ते कथितं देवी मंत्रं
सर्वार्थसाधकं ॥ चतुर्वर्गफलं येन लभते नात्र संशयः ॥ पुरश्चारे तु लक्षं स्यात्तद्दशांशाद्धुतादिकं ॥ च-
तुर्वर्गफलं येन लभते नात्र संशयः ॥ पुरश्चारे तु लक्षं स्यात्तद्दशांशाद्धुतादिकं ॥ एतत्प्रमाणं तु पश्चात्क्र-
मेण लेखयिष्यामः ॥ अथान्यः प्रकारस्तदुक्तः कालिकाकुले ॥ अथाहं सर्वविद्याप्रथमैकं द्वयं त्रयं च ॥
नाम संपुटितं स्वाहयायोजयेत् ॥ गतिस्तस्यास्तीति नान्यस्य ॥ इत्युक्तं तस्मै सत्यं तत्सत् ॥ अथ गुरुं परितो-
ष्य गृह्णीयान्मंत्रराजं ॥ गुरुस्तमपि निरीक्ष्याथ सत्कुलीनाय विद्याभक्ताय शुश्रूषवे स्थिराय स्पष्टाय स्वयं पौ-
र्णमास्यां निशायां निर्जने हनि ॥ एकाकी शिवगेहे लक्षं तद्दशांशं वा जपेद्देयं ॥ ओं सत्यं तत्सत् ॥ नान्यप्रकारेण
सिद्धिर्भवति ॥ रहस्ये कालिकामनोः ॥ तारामनोर्वा त्रिपुरामनोर्वा सर्वस्य दुर्गामनोर्वा दैवस्मृतः ॥ शिवेन
ओं तत्सदिति ॥ सर्वा विद्याभीति पूर्वोक्तद्वाविंशत्यक्षर्याः ॥ प्रथमं बीजं वा बीजद्वयं बीजत्रयं वा पुटितं संबोधनं
तन्नाम वेदस्यार्थः ॥ कालीतंत्रे च ॥ कालीहृदयविधानसिद्धिविद्यामहोदयां ॥ पुनरायें न्यथा जप्त्वा सिद्धमापुरि

वीकसः॥ कामाक्षरं वन्हिसंस्थं भेदिरा नादबिंदुभिः॥ मंत्रराजमिदं ख्यातं दुर्लभं पापचेतसां॥ सुलभं
सुकृतां भक्त्या साधकानां महात्मनां॥ त्रिगुणान्तु विशेषेण सर्वज्ञ॥ स्वत्रमबोधिका॥ अनयासदृशी वि
द्या नास्ति सारस्वतप्रदा॥ आकर्षणं वशीकारमारणोच्चाटनं तथा॥ शांतिः पुष्ट्यादिकर्माणि साधयेदनया वि
रात्॥ किं वक्तव्यमनेनापि वर्णितुं नैव शक्यते॥ जिव्हाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि॥ अनयासदृशी
विद्या नानयासदृशो जपः॥ अनयासदृशं ज्ञानं न भूतं न भविष्यति॥ ध्यानपूजादिकं सर्वं साधनं च पुरस्क्रिया॥
अनिरुद्धसरस्वत्याः समानं सर्वमीरितं॥ कुलचूडामणौ॥ ब्रह्मसरस्वती प्रोक्तो देवतामुखसंयुतः॥ बी
अव्यक्तिसमायुक्तं काली मंत्रमुदीरितं॥ एकं वा द्विगुणं वापि त्रिगुणं वापि भैरवं॥ जप्त्वा चाकर्षयेत्सर्वं
स्थावरं जंगमादिकं॥ एषा विद्या महाकाली गुह्याद्गुह्यतरा स्मृता॥ सिद्धेश्वरतंत्रे च॥ शृणु देवि प्रवक्ष्यामि
एकाक्षरमनुं प्रिये॥ यस्य विज्ञानमात्रेण जीवन्मुक्तस्तु साधकः॥ गुह्याद्गुह्यतरं मंत्रं न देयं प्राणसंशये॥
गगनाद्विवान्हिमारूढं सव्येतरदृगन्वितं॥ चंद्रबिंदुसमायुक्तं परं गुह्यं महेश्वरी॥ इति विशेषा यथा॥ कु
भि लचूडामणौ॥ पूर्वबीजं पराशक्तिबीजेन मूर्ध्नि कल्पना॥ षड्दीर्घभाजा बीजेन कुर्यादंगादिकल्पना॥
अथ ध्यानं॥ तदुक्तं तत्रैव॥ ध्यायेत्कालीं करालास्यां दंष्ट्रा नीलविलोचनां॥ स्फुरच्छववकरश्रेणीकृत
कांचीं दिगंबरां॥ वीरासनसमासीनां महाकालोपरिस्थितां॥ श्रुतिमूलसमाकीर्णसृक्कणी चंडना
दिनी॥ मुंडमालागलद्रक्तचर्चितां पीवरस्तनीं॥ मदिरामोदितास्फालकोपताखिलमेदिनी॥ वामे करे
खड्गमुंडधारिणीं दक्षिणे करे॥ वराभययुतां घोरवदनां लोलजिव्हिकां॥ तांकुतपस्संयुक्तबाणकर्ण
विभूषितां॥ शिवाभिर्घोररूपाभिः सेवितां प्रणयोदितां॥ चंडैश्च चंडनादैश्च चंडासैः पश्चभैरवैः॥ गृ
हीतनरकंकाले जयशब्दपरायणैः॥ सेवितां खिलसिद्धौघैः सिद्धिभिः सेवितां परां॥ एवं तां कालिकां

ध्यात्वापूजयेत्कुलनायकः॥विनायरंभावेशाधिकारांतःप्रसर्पिणी॥यत्किंचित्कुलसिद्धस्तुजायतेन रहस्य
मनागपि॥सर्वसिद्धिप्रदादेवीहेलयापरिचिंतिता॥अतःसद्दक्षिणानाम्नीत्रिषुलोकेषुगीयते॥सिद्धेश्वर
तंत्रेच॥ध्यानंशृणुवरारोहेसाधकानांसुदुर्लभं॥शवासनस्थांमहाभीमांघोरदंष्ट्रांवरप्रदां॥हास्ययुक्तांत्रिनेत्रां
चकपालकर्त्तृकाकरां॥मुक्तकेशीललज्जिह्वांपिबंतींरुधिरंमुहुः॥चतुर्बाहुयुतांदेवींवराभयकरांस्म
रेत्॥पुरश्चरणेतुलक्षसंख्याजपः॥कार्यः॥तदुक्तंतत्रैव॥एवंध्यात्वाजपेन्मंत्रंलक्षमेकंविधानतः॥तद्
शांशविभागेनहोमकर्मादिकंस्मृतं॥पूर्वोक्तमंत्रराजस्यजपमेवंवरानने॥अथान्यत्संप्रवक्ष्यामिभका
लिकामंत्रमुत्तमंत्रमुत्तमं॥येनविज्ञानमात्रेणजीवन्मुक्तस्तुसाधकः॥स्कंदारूढामहाकालींशिवादिस्व
रसंयुतां॥चंद्रार्द्धबिंदुनाक्रांतांतत्सरोज्वलनास्वरः॥नादबिंदुकलासार्द्धंमहामायान्वितःप्रिये॥रुद्रा
रूढाशिवानाथाभवेत्तूर्यस्वरान्वितः॥कलाबिंदुसमायुक्तःकथितःकामदःप्रिये॥गोप्तव्योयंप्रयत्नेन
नदेयोयस्यकस्यचित्॥गुरुभक्तायदातव्यंतायरसाह्वातायनैवहि॥ध्यानपूजादिकंदेवीसर्वंपूर्ववदाचरेत्॥
एकलक्षेणसिद्धिःस्यात्पुरश्चरणकर्मणि॥अथप्रकारांतरं॥तदुक्तंकालीतंत्रे॥अथातःसंप्रवक्ष्यामि
मंत्रकल्पद्रुमंपरं॥येनज्ञातेनविधिवत्सिद्धयोष्टौभवंतिहि॥यस्याःस्मरणमात्रेणपलायंतेमहापदः॥ यं
यस्याःस्मरणमात्रेणवाच्याःसिद्धिःप्रजायते॥यस्यविज्ञानमात्रेणलभेन्मुक्तिंचतुर्विधां॥येजपंतिपरां
देवींनियमेनतुसंस्थिताः॥देवाःसर्वेनमस्यंतिकिंपुनर्मानवादयः॥बृहस्पतिसमोवाग्मीधनेधन
पतिर्भवेत्॥कामतुल्यश्चनारीणांरिपूणांयमनोपमः॥तस्यपादांबुजद्वंद्वंराज्ञांकिरीटभूषणं॥तस्यभू
तिंविलोक्यैवकुबेरोपितिरस्कृतः॥यएनांपूजयेद्देवींनियतःपद्मकानने॥तस्यचाज्ञाकराःसर्वेसि
द्धयोष्टौभवंतिहि॥तस्यैवजननीधन्यापितातस्यसुरोत्तमः॥संप्रदायविदांवक्त्रात्पएनांवेत्तितत्त्वतः॥

अस्याविज्ञानमात्रेण कुलकोटिंसमुद्धरेत्॥ नंदंतिपितरःसर्वेगाथांगायंतितेमुदा॥अपिधन्यकुलेकः
श्चिदस्मत्कुलेभविष्यति॥सधन्यःसचविज्ञानीसकविःसचपंडितः॥सकुलीनससुकृतीसवशीसचसाधकः।
सब्राह्मणःसवेदज्ञःसचश्रोत्रीसदीक्षितः॥सतीर्थःसेविपीठानांसभिवासीचसर्वदा॥ससोमपायीसव्रती
सशांतःसपरंतपः॥ससन्यासीसयोगीचसमुक्तःसचब्रह्मवित्॥सवैष्णवःसशैवश्चसशाक्तःसचगाणपः।
सचविज्ञानवेत्ताचयएनांवेत्तितत्वतः॥तस्मात्सर्वप्रयत्नेनसर्वावस्थासुसर्वदा॥इमांज्ञात्वायजेन्मंत्रसु
खमोक्षमवाप्नुयात्॥विचारस्तंप्रवक्ष्यामिश्रुत्वाकर्णवतंसय॥मायाद्वंद्वंकूर्चयुग्मभैरवांतंमादनद्वयं॥
मायाबिंदीश्वरयुतंदक्षिणेकालिकेपदं॥संहारक्रमयोगेनबीजसप्तकमुद्धरेत्॥एकविंशत्यक्षराय
स्तारायाःकालिकामनुः॥पूर्वोक्तमंत्रवत्कुर्यात्सर्वंपूजांविचक्षणः॥भैरवतंत्रे॥मायाद्वंद्वंकूर्चयुग्मभैं
द्रांतंमादनत्रयं॥मायाबिंदीश्वरयुतंदक्षिणेकालिकेपरं॥संहार[redacted]क्रमयोगेनबीजसप्तकमुद्धरेत्॥
एकविंशत्यक्षरोयंताराख्याविश्वपूजितः॥आकाशांतांवामकर्णेंदुयुतंबिंदुविभूषितं॥चतुर्थबीजमाख्या
तंत्रैलोक्यवशाकारकं॥स्वाहांतश्चत्रयोविंशाक्षरोमंत्रराजकः॥स्वाहांध्विनै[redacted]कविंशात्यक्षराःका
मदोमनुः॥विंशत्यर्णामहाविद्यास्वाहाप्रणववर्जिता॥ध्यानपूजादिकंसर्वंदक्षिणावदुपाचरेत्॥
सारस्वततंत्रे॥शृणुदेवीप्रवक्ष्यामिकालिकाविधिपूर्वकं॥मायाद्वयंकूर्चयुग्मभैरवांतंमादनत्रयं॥ मुंत्वमं
मायाबिंदीश्वरयुतंदक्षिणेकालिकेपदं॥संहारक्रमयोगेनबीजसप्तकमुद्धरेत्॥द्वाविंशात्यक्षरी
विद्या॥वन्हिजायान्विताशुभा॥कालिकेयंमहाविद्यासिद्धिदाभुवनत्रये॥मायाबीजैःषडंगानि
महादेव्याःप्रकल्पयेत्॥भैरवोनुष्टुपकालीकान्यकृष्यंपदुश्चदेवतेति॥अथान्यप्रकारंतदुक्तंका
लिकातंत्रे॥अथवक्ष्येमहाविद्यांसिद्धाचांचमहेश्वरीं॥ईश्वरेणपुराप्रोक्तांदेवीतद्ध्यसंस्थितां॥

ऱ्याभा

अस्याज्ञानप्रभावेनकलयाभिजगत्रयं॥प्रणवंपूर्वमुच्चार्यहृल्लेखाबीजमुच्चरेत्॥रतिबीजंसमु
च्चार्यसर्पंचमभगान्वितं॥ठद्वयेनसमायुक्ताविद्याराज्ञीप्रकीर्तिता॥अनयासदृशीविद्याकालीतंत्रे
सुदुर्लभा॥भैरवोस्यऋषिःप्रोक्तोविराट्छंदउदाहृतं॥सिद्धिकालीत्रि[illegible]रूपादेवताभुवनेश्वरी॥रतिबी
जंबीजमस्याहृल्लेखाशक्तिरुच्यते॥हृल्लेखाषड्दीर्घेणप्रणवाद्येनकल्पयेत्॥अंगषट्कंततोन्यस्य
ध्यात्वादेवींशिवोभवेत्॥खड्गोद्धूर्णेंदुबिंबश्रवदमृतरसाप्लावितांगीत्रिनेत्रासव्येपाणौकपालेद्गु
लद्सृजमथोमुक्तकेशीश्रवंती॥दिग्वस्त्राबद्धकांचीमणिमयमुकुटाद्यैर्युतादीप्तजिह्वापायान्नीलो
त्पलाभारविशशिविलसत्कुंडलालीढपादा॥जपेद्दशायुतंसाहस्रंसहस्रैकेनसंयुतं॥होमयेत्तद्दशां
शेनमधुपुष्पेणमंत्रवित्॥त्रिकोणकुंडमासाद्यसिद्धविद्यःशिवोभवेत्॥बिल्वपत्रस्यहोमेनराज्यंभव
तिनिश्चितं॥रक्तपद्मस्यहोमेनवशयेदखिलंजगत्॥पीतपुष्पस्यहोमेनस्तंभयेद्वायुमप्यथ॥मालती

ॡ्भैः

पुष्पहोमेनसाक्षाद्वाग्पतिसंभवाः॥कृष्णपुष्पस्यहोमेनमारयतेचिरात्॥अस्यसर्वस्यहोमस्य
संख्यास्याद्युतावधिः॥अस्यास्मरणमात्रेणमहापातककोटयः॥सद्यःप्रलयमायान्तिसाधकः
खेचरोभवेत्॥अथप्रकारांतरमंत्रः॥तदुक्तंस्वतंत्रे॥स्मशानकालिकामंत्रंशृणुष्वावहिता[illegible]री
ये॥वाणीमायांततोलक्ष्मीकामबीजंततःपरं॥कालिकेसंपुटत्वेनचतुष्कबीजमालिखेत्॥एकादशार्ण
स्यैशिचतुर्वर्गप्रदायिनी॥ऋषिर्भृगुर्विराट्छंदोदेवताकालिकापरा॥श्मशानायान्वाऽन्यायबीज
शक्तिमहेश्वरी॥कीलकंकामबीजंतुशृणुपूजाविधिंप्रिये॥चतुर्भिश्चतुरर्णैस्तुविद्यामंत्रैःषडंगकं
विन्यस्यध्यानंकुर्वीतकालिकायाःसमाहितः॥अंजनाद्रिनिभांदेवींश्मशानालयवासिनीं॥त्रिनेत्रां
मुक्तकेशींचशुष्कमांसातिभीषणां॥पिंगाक्षींवामहस्तेनमद्यपूर्णकपालकं॥सद्यःछिन्नशिरोदक्ष

हसेनरत्थतींत्रिशिवां ॥ भिन्नक्रांसदावामभांसस्यचर्वणतत्परां ॥ नानालंकारभूषांगीं नग्नांमत्तांसदास
वैः ॥ एवंध्यात्वाजपेद्देवींरमन्त्रानेतुविशेषतः ॥ गृहेवापि गृहस्थ[illegible]मत्स्यमांसैः सुभोजनैः ॥ नग्नो
भूत्वामहापूजांकुर्याद्रात्रौसमाहितः ॥ पद्मंचाष्टदलंरक्तं तद्वाह्येधरणीतलं ॥ चतुर्द्वारसमायुक्तंमध्ये
मि मूलसमालिखेत् ॥ दलेष्वष्टासुसंलिखेत्कवर्गाद्यष्टवर्गकं ॥ धरण्यांविलिखेदाद्यंचतुष्कंचचतुष्कके ॥
पूर्वादिउत्तरांतांयांमध्येदेवींप्रपूजयेत् ॥ ब्राह्म्याद्याःपूजयेन्मातृदलेष्वष्टासुसर्वतः ॥ भैरवान्नसितांगा
द्यान्धरण्यांपूजयेत्प्रिये ॥ अथपुरश्चरणजपनिर्णयः ॥ तदुक्तंस्वतंत्रे ॥ वर्णलक्षंजपेन्मंत्रंतद्दशांशेनहो
मयेत् ॥ वर्णलक्षंमंत्रवर्णसंख्यालक्षजपमित्यर्थः ॥ रजस्वलांस्त्रियंगत्वारेतोरुधिरसंयुतं ॥ द्रव्यंवा
त्रिविधंमांसंमत्स्यंवाकुर्यर्घ्यंप्रिये ॥ निवेद्यन्नामसाकृत्वाकालीभक्तिपरायणः ॥ तदाभोगंचमोक्षंचल
भतेनात्रसंशयः ॥ अथमंत्रांतरं ॥ तदुक्तंतत्रैव ॥ कामबीजसमालिख्यकालिकायैपदंततः ॥ नमोंतेनच
देवेशि सप्तार्णोमनुरुत्तमः ॥ सर्वांगिकालिकादेवीअन्यत्सर्वंतुपूर्ववत् ॥ श्रीगुरोःकृपयालब्ध्वासर्व
सिद्धिमवाप्नुयात् ॥ प्रकारांतरंतत्रैवविमार्षण्यां ॥ ब्रह्मावह्निसमारूढस्त्रिगुणीकृतविग्रहः ॥ वामने
त्रेणसंयुक्तोनादबिंदुसमन्वितः ॥ कूर्चयुग्मंशिवायुग्मंदक्षिणेकालिकेततः ॥ प्रागुक्तवह्निजायादीक्ष
णयाद्विविंशतिः ॥ तत्रैव ॥ त्रयोदशीद्वादशीचदशम्येकादशीतथा ॥ एताःप्रशस्तास्तिथयोदीक्षाकर्मसु
कीर्तिता ॥ षष्ठीचनवमीचैवअधमेपरिकीर्तिते ॥ कृष्णाष्टम्यांचतुर्दश्यांदीक्षांकार्याशुभप्रदा ॥ ॥
इतिपूर्णानंदपरमहंसस्यपरचितेश्यामारहस्येमंत्रभेदविवरणंनामसप्तमःपरिच्छेदः ॥ ७ ॥ ॥ पञ्च
अथविद्यामाहात्म्यंतदुक्तंकालीतंत्रे ॥ एवंसमस्तविद्यानांराज्ञीस्तोतुंनशक्यते ॥ वक्त्रकोटिसहस्रैस्तुजि
श्रीभै ह्वाकोटिशतैरपि ॥ सर्वसिद्धिप्रदादेवी[illegible]रानिरुध्यसरस्वती ॥ तस्मादस्याज्ञानमात्रात्सिद्धयःसंभवंतिहि ॥

अनिरुद्धसरस्वत्याज्ञानमात्रेणसाधकः॥ पांडित्येचकवित्वेचवागीशःसमतामव्रजेत्॥ अस्यपांडित्यवैद॑ग्ध्यविचित्रपदकल्पनैः॥ देवाअपिविलज्जंतेकिंपुनर्मानुषादयः॥ यदिस्त्रीतत्समानारीमत्समःपुरुषोस्तिचेत्॥ अनिरुद्धसरस्वज्ञानमात्रेणसाधकः॥ अनिरुद्धसरस्वत्यासमोमंत्रोस्तिचैतदा॥ अस्याजपात्परंजप्यं ज्ञानमस्यात्मचिंतनं॥ योगसंधारणासम्यक्ध्यानमस्यानसंशयः॥ महापदिमहापापेमहाकष्टनिवारणे॥ महाभयमहोत्पातेमहाशोकमहोत्सवे॥ महामोहेमहासौख्ये महादारिद्र्यसंकटे॥ महाबंधेमहारोगेमहादुःखेमहारणे॥ दुराध्वनिदुरावासेदुर्भिक्षेदुर्निमित्तके॥ समस्तक्लेशसंहारेस्मरणादेवनाशयेत्॥ अस्याज्ञानमहाज्ञानं ध्यानमस्यामहद्धनं॥ तस्मादस्यासमाविद्यानास्तितंत्रेनसंशयः॥ श्मशानेत्रायनेकेरकुलस्त्रीभिर्विहरमान्॥ कुलामृतनिषेवीचकालीतत्वार्थकोविदः॥ ब्रह्मादिभुवनेतस्यसमोनास्तिनरोपरः॥ सएवसुकृतीलोकेस एवकुलभूषणः॥ धन्यान्यजननीतस्ययेनदेविसमर्चिता॥ धनेनधननाथश्चतेजसाभास्करोपमः॥ बलेनपवनोदेविययेनदेवीसमर्चिता॥ वक्त्रेसरस्वतीतस्यलक्ष्मीस्तस्यसदागृहे॥ तीर्थानिदेहेवांसंतियेनदेविसमर्चिता॥ धनेनधन॥ गानेनतुंबरुःसाक्षाद्दानेनवासवोयमाः॥ स्नात्रेयसमोज्ञानीयेनदेवीसमर्चिता॥ वन्हीरिवारिपाहंतागंगेवमलनाशकः॥ क्षुब्धोम्बुधिःसमःसाक्षादिंदुरिवसुखप्रदः॥ पितृदेवसमःशास्ताकालएवदुरासदः॥ वारीशारवगंभीरोनिर्भयतेरवैदुर्धरः॥ बृहस्पतिसमोवक्ताधरणीसदृशःक्षमी॥ कंदर्पसदृशःस्त्रीषुयेनदेवीसमर्चिता॥ अहोभाग्यमहोलोकेकुलज्ञानपरायणः॥ तेषांमध्येन्वयःकोपिकालीसाधनतत्परः॥ स्वजसीलंपरस्चैवपुमांसंपरमंतथा॥ मातृस्त्रीवधकांश्चकालेत्रधानंपरमेश्वरी॥ कालीज्ञानीनमासाध्यनतस्यस्यासिकदाचन॥ नहिकालीसमापूज्यानहिकालीसमंफलं॥ नहिकालीसमंज्ञानंनहिकालीसमंतपः॥ येगुणाःपरमेशस्यपंचवक्त्रस्यविधानतः॥ तेगुणाःसं

रहस्य

रवि

वंद्येकालीतत्वस्यनान्यथा॥कालिकातस्त्र्यदानीलतासाधनतत्पराः॥देवजन्मानुषोभूत्वालभेन्मुक्तिनतु
र्विधां॥इतितेकथितंसर्वंकालिकातत्वमुत्तमं॥अनेनसम्यगास्थायसर्वकर्मफलंभवेत्॥इतिश्रीपूजा
विद्यामाहात्म्यंनामःसप्तमः॥ ॥न्यासंविनाभवेन्मूकःसुप्तस्यादासनंविना॥
पल्लवेनविनामंत्रोनग्नःसंपरिकीर्तितः॥अन्यत्र॥पल्लवोवासनाप्रोक्तःशिरःप्रणवः[redacted]उच्यते॥शि
रोहीनोमतःप्रोक्तोयथामंत्रोगुरुंविना॥एतदुष्टायदत्तोयानिर्वीर्यंश्चाधिकासिरः॥अंतरन्येनबी
जेनव्यासःकीलकउच्यते॥यस्यआप्यंश्रणोत्यन्यःसमंत्रःशून्यउच्यते॥ऋषिर्देवतछंदोभिःपरि
त्यक्तोभुजंगमः॥इतिदूषणानि॥अथकुलीनानांमाचारांतरं॥ ॥तदुक्तंकुलकौलिकतंत्रे॥शृणु
देविप्रवक्ष्यामि[redacted]कुलीनाचरणंतथा॥पानेभ्रांतिर्भवेद्यस्यघृणास्यान्मैथुनेतथा॥शुभेवाशुभ
तांभ्रांतिःपापाद्वांकार्ये[redacted]मैथुने॥सभ्रष्टःपूजयेद्देवींचंडोमंत्रकथंजपेत्॥रोगीदुःखीभवेद्देवीरौ
रवंनरकंव्रजेत्॥पंचमात्परंनास्तीशाक्तानांसुखमोक्षयोः॥भगरूपायदेवीरेतःश्रीनासदान
घेरेतसातर्पणंतस्यामध्येमांसैःसहप्रिये॥केवलैःपंचमैर्देवीसिद्धोभवतिसाधकः॥ध्यात्वाकुंड
लिनींदेवींरमन्रेतोविमुंचयेत्॥अमंत्रान्वयदानारीबालायत्नात्तुलभ्यते॥आत्मदेहस्वरूपेण
तत्कर्णेमंत्रमुच्चरेत्॥ततःसाशक्तिरूपास्याद्भुक्तिमुक्तिप्रदायिनी॥रंभासत्स्वर्गवा॥मुख्यानारीया
गगनेभुवि॥पातालेवास्थितायाचतस्यानाथस्तुकौलिकः॥तत्राधिपर्यायानार्यस्तासांशृणु
ष्वविधिंप्रिये॥गुरुरेवशिवःसाक्षात्तत्पत्नीतत्स्वरूपिणी॥मनसाकर्मणावाचारमणंतत्रवर्जयेत्॥
तस्यापदपदेभक्तोमुक्तिमार्गेतुपरांभजेत्॥गुरुस्नुषास्वपुत्रीचेत्तथाचमंत्रपुत्रिका॥एतस्यात्रमणंव
र्जेत्ब्रह्मरंघ्रमानसेनच॥कौलिकस्यचपत्नीचसासाक्षात्परमेश्वरीशिवे॥तस्यास्मरणमात्रेणकौलिको

नारकीभवेत्॥मातापितोगुरुर्वा पूज्याअन्यायाविहिताक्रियः॥दूतीयागेचकर्तव्योविचारांमंत्रवि
त्तमैः॥अन्यस्थानविचारेणदेवीशापःप्रजायते॥शिवहीनाचयाशक्तिदुरात्तंपरिवर्जयेत्॥अभिषेका
द्भवेच्छुद्धिर्मंत्रस्योच्चारणाद्भुतं॥पंचमेनतुदेवेशि सर्वैःपापैःप्रमुच्यते॥केवलेनाद्ययोगेनसाधको
भैरवोभवेत्॥द्वितीयेनमहेशानीपूजकोब्रह्मरूपभाक्॥केवलेनतृतीयेनमहाभैरवतांव्रजेत्॥चतुर्थे
नसुतत्वेनभुविपूज्यैकनायकः॥पंचमममतांयातिममतुल्यःपरेश्वरी॥पंचमेनभवेद्योगीसर्वसिद्धिप्र
पणः॥इतितत्कथितंदेवीसुगोप्यमतियत्नतः॥नदेयंपशुवेदीषुकुलीनेदापयात्स्व॥कुलार्णवे॥कुला
चारगुरुंगत्वाभक्त्यापापविशुद्धये॥यात्वैयरमतदानंतदभावेजलंपिबेत्॥कुलाचारेणयस्तत्वादत्तं
पात्रंतुभक्तितः॥तांनमस्कृत्यगृण्हीयादन्यथानरकंव्रजेत्॥अन्यत्रापि॥स्थानकालंगमयेत्पूतक्री
डाद्विनासुधीः॥गमयेद्देवतापूजाजपयागस्तवादिना॥गुरोःकृपालयकथास्तोत्रागमविलोकनैः॥गमये
दनिशंकालंनवदेत्सरदूषणं॥प्रत्यक्षेवापरोक्षेवाप्रत्यहंप्रणमेद्गुरुं॥गुरोरग्रेपृथक्पूजामद्वैतंचपरि
त्यजेत्॥दीक्षाव्याख्याप्रभुत्वंचगुरोरग्रेनकारयेत्॥गुरोःशय्यासनंपीठंपादुकोपानहौतथा॥स्नानो
दकंतथाछायांलंघयेन्नकदाचन॥श्रीगुरुंकुलशास्त्राणिपूजास्थानानियानिच॥भक्त्याश्रीपूर्वकंदेवि
प्रणम्यभुविकीर्तयेत्॥गुरुंनाम्नानभाषेतजपकालादृतेप्रिये॥श्रीनाथस्वामीतिविचारसाधकोवदेत्॥उम्मा
दकोत्सवंनागीर्यान्नवदिनैः॥तस्मान्मन्येतसततंपितुरप्यधिकंगुरुं॥कुलाचारगुरुंदेवंमनसा
पिननिंदयेत्॥कुलस्त्रीवीरनिंदाचवर्जयेन्मतिमान्सदा॥अंतःशाक्ताबहिःशैवाःसभायांवैष्णवामताः॥
नानारूपधराकौलाविचरंतिमहीतले॥लिंगागमे॥गुरुणालोकितःशिष्योउत्तिष्ठेदासनंत्यजेत्॥गुरुणा
सदसद्वापियदुक्तंतन्नलंघयेत्॥रभसंमैथुनंमिथ्यायोवदेद्गुरुमंदिरे॥सयातिनरकंघोरंभैरवेनोदितंभाषितं॥

संक्रांतिनवमीपूर्णाचाष्टमीच्चचतुर्दशी॥ एकादशीव्यतीपातेकर्मलोपंनकारयेत्॥ तत्वहीनंकृतंकर्मज
पकर्मचनिष्फलं॥ तांभवीकुप्यतेतस्मैब्रह्मरूपापदेपदे॥ भावचूडामणौ॥ एकाकीनिर्जनेदेशेश्मशानेनि
र्जनेवने॥ शून्यागारेनदीतीरेनिःसंगोविहरेन्मुदा॥ वीराणांजपकालस्तुसर्वकालःप्रशस्यते॥ सर्वदेशेसर्व
पीठेकर्तव्यंनात्रसंशयः॥ अन्यदुक्तंतत्रैव॥ स्वकुलोत्तेपुरस्कुर्यात्कार्यंरात्रौनचान्यथा॥ वेदहीनोद्विजोदे
वियथानश्रुतिसंस्क्रिया॥ विष्णुभक्तिंविनादेविभक्तिर्नत्रभवेद्यथा॥ शाक्तंज्ञानंविनामुक्तिस्तथाहास्यायक
ल्पते॥ गुरुंविनातथातंत्रेनाधिकारःकथंचन॥ पतिहीनायथानारीसर्वकर्मविवर्जिता॥ कुलंविनातथादेवि
वीरोवाममसाधकः॥ नाधिकारीतिकौलेयतस्मात्यत्नपरोभवेत्॥ अविनीतंकुलंयस्यसकथंममपूजकः॥ त
स्मायत्नात्तयाकार्यंयथास्याद्विनयान्वितं॥ तंत्रचूडामणौ॥ विष्णुभक्तोयदादेविकुलदीक्षापरोभवेत्॥ पुरश्च
रणंतस्यनात्रास्तिमनसंशयः॥ कुलदेवंद्विजंस्त्वावैष्णवंदेशिकंयदि॥ करोतिकुलशिष्यासोन्यथोभ
वतिनिश्चितं॥ हविरारोपमात्रेणवह्निर्दीप्तोयथाभवेत्॥ कुलदेवमुखाद्धस्ततथादीक्षाभवाम्यहे॥ दी
क्षणात्पूजनाभ्यासात्तथादस्यवलोकनात्॥ यत्किंचित्दानमात्रेणपशूनांनिर्जितासुत॥ साधकस्य
महाशापंदत्वातेस्यहराम्यहं॥ पशोर्विध्यांसमादायपदिपूजापरोभवेत्॥ तस्यवक्त्रंसमालोक्यकुलचक्रं
विलोकयेत्॥ पश्यपदिध्यंयत्किंचित्क्रियतेकुलसाधकैः॥ तत्तत्कर्ममहादेविअभिचारायकल्पते॥ यदिदे
वात्पशोर्विद्यालभ्यतेकुलजेनरैः॥ द्विजस्यकौलिकींप्रार्थ्यपुनर्विद्यामुपालभेत्॥ अज्ञानाद्यत्कृतंकर्मना
लोक्यकुलकौलिकी॥ क्षमस्वपापमातस्त्वहरदीक्षापंकुरु॥ एवंप्रार्थ्यपुनर्दीक्षांकुर्यात्साधकसत्तमः॥ अ
न्यदुक्तंतत्रैव॥ मनसावचसादेविकुलीकुलगुरुंयदि॥ निंदांकरोतिचाप्योमेतस्यापरिवर्जायते॥ तत्त
स्यारुषप्रसंगोपितत्त्वासुत्तकदर्शनं॥ पशोरग्रेनकर्तव्यंप्राणांतोपकदाचन॥ कुलाग्रस्पर्शमुखंदृष्ट्वास्मर्तव्याःकु

यामा

खनायकः॥ पशुना सह आलापः सहवासः सहासनं॥ संसर्गं नैव मे चात्र कुलीनेन महात्मना॥ पा
तकं न तु चैतस्य स्वयं ती पुण्यराशयः॥ प्रभवंती नतेर्थानि न गंगा नन्य काशिका॥ महाविद्याजपो रक्षेनैवाप
पातकानि च॥ नद्यं पति नस्य संसर्गः स्वयं यां न कदाचन॥ अज्ञानात्पशुसंसर्गो यदि दैवात्प्रजायते॥ तदा
द्वादशवर्षाख्यं व्रतार्थं यत्नेन माचरेत्॥ कुलीनायाः समीपस्थः कुलसेवापरायणः॥ उच्छिष्टभोजी तन्मा
मंत्रजापी तस्य तेरपि॥ तदत्ते तां समभ्यर्च्य यत्नेश्वपरितो घ्रर्यं शुचिर्भूत्वा पुनर्विद्यां गृहीत्वा शुद्धिमाप्नु
यात्॥ अतान्यक्तो यदि भवेत् सुवर्णकुलतोप्यहन्॥ रथात्कुलाय पापानां स्वयोर्थकुलसाधकः॥ ज्ञानात्संसर्गमा
साद्य शुद्धिं प्राप्नोति नैव च॥ पंचमे लोभकश्यासौ योनिमालंब्य साधकः॥ नानाकैलनासमायुक्तो नरकान्प्रति
पद्यते॥ न चैवं दीक्षयेच्छा मनत्वास्य दर्शनं चरेत्॥ ममनुरागस्नेकथं वात्र प्रयत्नेन विवर्जयेत्॥ कर्मणा मनसा वाचा
पशुशास्त्रप्रपूजनं॥ प्रकुर्वीत महापापाः सर्वो विकुलपांसुना॥ न जनुकेकोश्लोकोवात्र शार्करायां तणोषवा॥ सर्व
त्रचिंतो तत्ताच्चाहं न पशोर्मंत्रविग्रहं॥ चेतनाधिष्ठितं सर्वं नस्तु स्वं दुःखं प्रकल्पितं॥ तत्रैक्यं चेतनाभावान्नि पशोर्मना
श्चिताहशः॥ प्रसन्नाते नगोस्यात्कुलीनैः शिथिहितवे॥ अन्यदुक्तं तत्रैव॥ दीक्षायां मूलपूजायां शिष्यस्य यदि वा
गुरोः॥ लज्जापरं तत्र निद्रा विघ्नापत्तत्र नेक्षिता॥ अधस्तात्दृष्टिपातेन तस्य विघ्नाय धामुखी॥ निमीलनाच्च
ताविद्यारोदनान्मारयेत्ध्रुवं॥ पार्श्वविलोकनेनैव व्याधिदारिद्र्यौ उत॥ चतुर्दिग्वलोकेन उच्चाटनगता
भवेत्॥ एतादृशं कुलं देवि यदि कुर्यात्कथंचन॥ तदा कुलगुरुं प्रार्थ्य कारयेद्दक्षिणं ततः॥ उपदेशाय देवि
तदा पुत्री तु कन्यका॥ पूजार्हा च तदा देवी तदा माता न संशयः॥ सर्वथा पितृपुत्रीभ्यां मूलयोगं न दृश्यते॥
तत्कृते पाकुशान्तौ उभौ नरकगामिनौ॥ तुंबके चान्यशास्त्रे पशुगामिन्य भैरव॥ न कदाचिन्मेनवलोक्यं नवा
कंचकथंचन॥ एवं कृते गुरोः शिष्य ममन्त्रणापो भविष्यति॥ शिवागमे॥ ज्ञात्वा पशुं स्पृष्ट्वा पश्येत् वेसा नयस्त्वेकेस्पको

भवेत्॥घोरंचनरकंयातिकुलमार्गोस्ततेध्रुवं॥तस्माद्दिव्याचार्ययत्नेनरात्रावुक्षिष्टंपठेत्सुधीः॥आनंदं
कारयेद्वीरःस्तवंनिर्भ्रांततःपठेत्॥शक्तिःशिवःशिवःशक्तिःशक्तिर्ब्रह्मजनार्दनः॥शक्तिरिंद्रोरविःशक्ति
शक्तिश्चंद्रोग्रहाध्रुवं॥शक्तिरूपंजगत्सर्वंयोनजानातिनारकी॥वीरतंत्रेपि॥स्नानादिमानसंशौचंमानसः
प्रवरोजपः॥पूजनंमानसंदिव्यंमानसंतर्पणादिकं॥सर्वएवशुभःकालोनाशुभोविद्यतेक्वचित्॥नवि
शेषोदिवारात्रौनसंध्यायांमहानिशि॥सर्वदापूजयेद्देवीमस्मात्कौलिकेजनः॥महा[illegible]निशयमुच्चैर्द
शेब्दालिमंत्रेणराधयेत्॥एतेनदिवसेपंचतत्वेनपूजनमितिसूचितं॥मत्स्यसूक्ततंत्रे॥रात्रावेवमहत्पूजा
कर्तव्यावीरवंदिते॥नदिनेसर्वथाकार्याशासनान्ममसुव्रते॥हविष्याशीदिवाभक्षंपुरश्चारंतुयोजयेत्॥
तत्रमात्रादिवापूजांपशुवद्वीरवंदिते॥इतिमत्स्यतंत्रवचनं॥तत्तु॥पुरश्चरणविषयेवाध्यमिति॥तत्रमंत्र
श्रमात्तवद्युस्यवचनात्॥सामान्याधिकारत्वेक्रमः॥कालीतंत्रादस्यवचनाच्च॥तत्तुजपेनकालनियम
श्च्यादिपुरेवालिखितमिति॥एवंच्छिन्नमस्तातंत्रेनदोषः॥सिद्धमंत्रस्यानाशौचंनियमोपि च॥नक्त
स्यनादिवारात्रौनचसंध्यावसानकं॥सदैवपूजयेन्मंत्रीमैथुनेनतुविशेषतः॥इति॥अन्यच्च॥नप
श्येत्पतितांनग्नांउन्मत्तांप्रकटस्तनीं॥दिवसेनरमेन्नारींतद्योनिंनैवदर्शयेत्॥कुलार्णववचनंश्रीवि
द्याविषये॥बाहुल्यंतत्प्रकरणत्वात्पुरश्चरणत्वेइति॥अथरुद्रयामलेभैरवीप्रकरणे॥पशोःसंभाषणा
द्देवीमंत्रसिद्धिर्नजायते॥पशुस्तुद्विविधोदेविअदीक्षितोभवेत्पशुः॥दीक्षितःकुलजंवस्तुनिंदकोद्वि
वियोपशुः॥गोलकेनसहालापात्स्पर्शात्संभाषसंस्कृतात्॥नसिध्यंतिमहेशानि[illegible]स्यसत्यंवदाम्य
दी हं॥किंकल्पितानसिध्यंतिजोसासिध्यंतिनैकधा॥तस्मात्सर्वप्रयत्नेनसिद्धिःस्यात्केवलाजपात्॥वी
रहस्यपानंवीरजायानिषेवणंमहापातकमित्याहुःकौलिकानांकुलेश्वरी॥अर्घ्यादानमत्ताद्यापि

श्यामा लोल्यादीपिच्चयोनरः॥ लिंगयोनिरतोमंत्री रौरवं नरकंव्रजेत्॥ इतिश्री पुरुषार्थसाधनाचारनियमो
नामष्टमः॥ ८॥ ॥अथकुंडगोलादिग्रहणविधिः॥ तदुक्तं तंत्रांतरे॥ अनीयप्रम
दांमत्तांदीक्षितां यौवनोन्नतां॥ स्वकांतांपरकांतांवा घृणालज्जाविवर्जितां॥ प्राङ्मुखेनोपविष्टांच नि
शायामर्धरात्रके॥ हेतुयुक्तंचतांकृत्वा पट्टंदत्वान्यासान्विधायच॥ ॥मौलौकुंतलकर्षणं नयनयोरंचुंब
नंगंडयोर्दंतेनाधरपीडनं हृदिमुहुर्मुस्पाचनाभोभगे॥ कक्षेकंठकपोलमंडलकुचश्रोणीषुदेयानखाः
सीमंतोल्लिखनंनखैरुरसिजंगृण्हीतगाढंततः॥ कुर्वीतांप्रिडरूमनोभवगृहे मातंगलीलापितंजंघायु
ग्मपदोरुगुल्फहननं चान्योन्यतःकामिनोः॥ आंह्रींईंक्लींआमुकींद्रावयस्वाहेतिन्यसेत्॥ एंह्रींनपले
ल चपौंक्लिन्नेतोमुंचेयथावायुमायांचपलक्लिन्नेरेतोमुंचठहृयंवलंक्लीं स्त्रीं क्लींचदेवी द्राविणीबीजमु
त्तमं॥ इतिमंत्रत्रयंयोन्याकोणत्रयमाषिन्यसेत्॥ तस्यायोनौन्यस्यविपांमैथुनंकारयेत्ततः॥ शुभमं
त्रौषधेनैवयोनौप्रमथनंचरेत्॥ मथ्यमानेपुरस्तस्या जायतेतत्वमुत्तमं॥ गृण्हीयात्तत्प्रयत्नेनद्रव्यंकुं
डोद्भवंशुभं॥ निःशंकमादितंद्रव्यंगृहीत्वातेनपूजयेत्॥ सान्निध्याज्जायतेदेवी सर्वकामसुपालभेत्॥ कुं
डोद्भवामृतंद्रव्यंकथितंदुर्लभंमया॥ पंचमीयामलेपि॥ चर्व्यचोष्यंनिवेद्याथवस्त्रालंकरणादिकं॥ पूजये
द्रसतैःशुभैस्तस्यामदनमंदिरे॥ भावयेत्काममोचनतासुतत्वंन्यचोत्सृजेत्॥ शुभमंत्रौषधेनैवमंथयेन्मदनाल
ये॥ मथ्यमानेपुरस्तस्या जायतेतत्वमुत्तमं॥ गृण्हीयात्तत्प्रयत्नेनद्रव्यंकुंडोद्भवंशुभं॥ मंथनंगजहस्तमुद्राभिः
अथशुभमंत्रौषधंयथा॥ तदुक्तंकुलोड्डीशे॥ मायागणपदंशुक्रस्तंभकारिणिद्वयं॥ अनेनार्कोपयोगेन
जातीमूलंसमानयेत्॥ एतत्कृत्वासाधकेंद्रःशुक्रस्तंभनमाचरेत्॥ इतिगोलविधिः॥ शक्तियामले॥ गोलोद्भ
वंतथादेवि गृह्णीयात्तेरमतेत्तयत्॥ कुलजांदीक्षितांमत्तांपतिहीनांकुलक्षणां॥ शक्तियोगंपांस्वरूपांचअनपत्यां

समाचरेत्॥ सुंदरीं शोभनांसीणांपीनोन्नतपयोधरां॥ द्विरष्टवर्षदेशीयांसदाकामभिलाषिणीं॥ पूर्वोक्त
प्रयोगेनकृत्वान्यासादिकंततः॥ तत्वंप्रगृह्यप्रयत्नेनपूजार्थंसाधकोत्तमः॥ इदंगोलोद्भवंद्रव्यंदेवतापुष्टिकारकं
अनेनपूजयेद्योहि सर्वकाममुपालभेत्॥ अथस्वयंभूत्पत्तिः॥ तदुक्तंतत्रैव॥ स्वयंभुवंप्रवक्ष्यामिपूजार्थंसाध
कस्यच॥ आनीयप्रमदांदिव्यांप्रमत्तांयौवनोन्नतां॥ दीक्षितांमूलमंत्रेणसुनासांचारुहासिनीं॥ सर्वदानंद
हृदयांघृणालज्जाविवर्जितां॥ गुरुभक्तिंसुवेशांचदेवतापूजनेरतां॥ पूर्ववन्यासवर्णंतुकारयेद्देवसुंदरी॥
तस्यास्तुमदनागारेपूजयेत्परमेश्वरीं॥ स्वयमस्ताभितोभूत्वासाधकःपंचमंजयेत्॥ स्वेच्छातःऋतुमती
शक्तिःसाक्षाद्देवीसुरेश्वरी॥ तस्याःपुष्पंस्वयंयत्तद्दक्षिणीयंप्रयत्नतः॥ वस्त्रालंकारपुष्पेणशक्तिंचपूज
येत्सदा॥ यथाकालेयथापुष्पंस्वयंयद्गलितंभवेत्॥ गृहीत्वातत्प्रयत्नेनस्वयंभूकुसुमंचरेत्॥ स्वयंभूकु
सुमंदिव्यंत्रैलोक्येचातिदुर्लभं॥ प्राप्यानिसाधकश्रेष्ठोह्यसाध्यंसाधयेद्बुधः॥ स्वयंभूपुष्पयोगेनसाक्षात्ते
नसमर्चयेत्॥ विषांसप्रावतीजप्त्वाक्षिप्रमाकर्षणादिके॥ देवताश्चमहानागाराक्षसादानवाश्चये॥ राजा
नश्चस्त्रियःसर्वानित्यंवश्याभवंतिच॥ मुंडमालायामपि॥ स्वयंभूकुसुमंदेवीविविधंभूरिजायते॥ आ
षोडशाद्दनुदायाउत्तमासर्वसिद्धिदा॥ बलात्कारेणऊढायामध्यमायागवर्जिनी॥ रजोयोगवशाद्या
अधमाफलदायिनी॥ अथैतन्माहात्म्यं॥ तंत्रचूडामणौ॥ शृणुवत्सकुलद्रव्यमाहात्म्यंपरमंशुभं॥ यत्रा
प्यकुलत्वेनलभ्यतेवांछितंमहत्॥ आमावास्यातिथौदेवीसुषुम्नामध्यवर्त्तिनी॥ अमृतंवर्त्ततेसानुत्रिदि
नेपृथिवीतले॥ तस्यांतिथौकुलंवीक्ष्ययदिविद्यांसमुच्चरेत्॥ सर्वसिद्धिर्भवेत्तत्रप्रसुच्चारणमेवहि॥ त
स्मात्सर्वप्रयत्नेनकुलंवीक्ष्यजपंकुरु॥ दृष्ट्वातदमृतंदेवगलितंपरिगृह्यच॥ साधयेत्साधनंसर्वंकुलो
चारस्यसिद्धये॥ शिवहीनायदाशक्तिःसैवादौवर्षतेहियत्॥ तदेवपरमंद्रव्यंस्वयंभूकुसुमाख्यकं॥

त्पामा स्वयंभूकुसुमंद्रव्यंत्रैलोक्येचापिदुर्लभं॥कन्यिकंधर्वरजेनलभ्यतेवानवाविभो॥यदित्तल्लभनेदेव
लाक्षारससमन्वितं॥कस्तूरीकुंकुमात्क्तंचवटीकृत्वातुगोपयेत्॥यंत्रराजंसमालिख्यपूजयेद्यस्तुसाधकः।
एतेनास्त्रतयोगेनमहतींसिद्धिमालभेत्॥सुक्षादिदोषदुष्टायेमंत्राविद्याश्चकीर्तिताः॥प्रबुद्धास्तत्प्रयोगेन
यावत्सापुनरागता॥ततःप्रयोगंविद्यानांमंत्रादीनांचकारयेत्॥एवंप्रबुद्धाभवन्तिनैवतात्रकुकर्ण्यन॥
एतत्त्रयाणांमध्येतुस्वयंभूकुसुमंमहत्॥श्रीक्रमेपि॥जप्त्वातुकालिकांविद्यांसर्वकाममुपालभेत्॥स्वयंभू
कुसुमंचैवकुंडगोलोद्भवंतथा॥सर्वंयथोक्तमुत्साद्यसाधकःशोधनंचरेत्॥ओंहूंफट्संसंस्वाहा।ओंह्रींश्रीं
श्रीरतिप्रियेओंह्रींश्रींफट्स्वाहा नैवशोधनंकारयेत्प्रिये॥ओंअमृतेअमृतोद्भवेचामृतवर्षिणीप्रिये॥
देवीपदंशुक्रशब्दंप्रभोचयपदंपुनः॥अमृतंश्रावयद्वंद्वंममनंकुरुयुग्मकं॥स्वाहापदंततोदेवीशुक्रशुद्धि
भवेत्प्रिये॥कस्तूरीकुंकुमंतत्रचंदनागरुकादिकं॥नानासुगंधिद्रव्याणिएकीकृत्वातुसाधकः॥तेनचक्रं
समालिख्यचाष्टकेनसुरेश्वरि॥एतेनास्त्रतयोगेनपूजयेत्परमेश्वरी॥शुद्धैरक्षततंदुलैःस्वयंभूकुसुमान्वि
तैः॥कुंडगोलोद्भवैर्द्रव्यैर्योनौदेवींप्रपूजयेत्॥स्वयंभूकुसुमैःपूजांप्रत्यहंयःसमाचरेत्॥तस्यप्रभुमतीसि
द्धिरर्थानार्दिवजायते॥यंयंवांछतिकामंचतंतंसापिप्रयच्छति॥इतिस्वयंभूः॥अथदूतीयजनविधिः॥तदुक्तं
ग उत्तरतंत्रे॥याममात्रेगतेरात्रौकुलगेहेततःपुमान्॥तांबूलपूरितमुखोधूपामोदसुगंधितः॥रक्तचंदनलि
प्तांगोरक्तमाल्यानुलेपनः॥रक्तवस्त्रपरीधानोलाक्षारूपागृहेस्थिता॥रक्तमाल्येनसंवीतारक्तपुष्पविभू
षिता॥पंचकारणसंकेतैःपूजयेत्कुलनायिकां॥कुलनायिकायथा॥तदुक्तंतंत्रेव॥नटीकापालिकीवेश्या
पुल्कसीनापितांगना॥रजकीरंजकीचैववैरंध्रीत्वसुवासिनी॥स्वरकाघटकाचैवतथागोपालकन्यका॥
विशेषवैदग्ध्ययुताःसर्वाएवकुलांगनाः॥गुरुभक्तादेवभक्ताघृणालज्जाविवर्जिताः॥संगोपनपराःश्राय

स्वरूप्यःसर्वसिद्धिदा॥एवंयथोदितांशक्तिंप्रसूनतूलिकोपरि॥संस्थाप्यपूजामारभेत्॥तदुक्तंतत्रैव॥
एतासुकान्वीदानीयतुलीकान्यस्यपूजयेत्॥अद्वैताचारसंपन्नांगुरुभक्तांदृढव्रतां॥सदानुष्ठाननिरतां
सात्विकींभक्तिसंयुतां॥ईर्ष्याकालुष्यरहितांसमयांभक्तवत्सलां॥चातुर्यौदार्यदाक्षिण्यकारुण्यादिगु
णान्वितां॥रूपयौवनसंपन्नांशीलसौभाग्यशालिनीं॥सदापरिगृहीतांवायद्वासंकेतमागतां॥अथ
वातत्क्षणायातांमदनानलतापितां॥विलिप्तांरक्तगंधेनरक्तांबरविभूषितां॥सुगंधिरक्तकुसुमांस
र्वाभरणभूषितां॥सुधूपधूपितांतन्विंदूतीकर्मणियोजयेत्॥एवंभूतांयजेत्तांतुप्रसूनतूलिकोपरि॥
वर्ज्यायथा॥व्यंगांगीविकृतांगीवासविकल्पकमानसां॥वयस्यसीयापरतांक्रूरामसंतकोपिनीं॥अ
भक्तामलसादीनांवर्जयेत्साधकोत्तमः॥समानीयकुलेसम्यग्दृष्टितमनंतरं॥स्नातांशुभ्रदुकूलांदि
अनुलेपनसुशोभिता॥अलंकृतांगतश्रांतांस्वागतंचासनंतथा॥निवेश्यतूलिकामध्येप्रसूनेनसुगं
धिना॥चंदनागरुकर्पूरकस्तूरीकुंकुमादिभिः॥समाकीर्णेस्वपर्यंकेपूजयेत्कुलनायकां॥अंगन्यास
करन्यासौप्राणायामस्ततःपरं॥विधायमातृकान्यासंकुलांगोपरिविन्यसेत्॥ततःपूर्वोक्तविधिनाघ
टार्घ्यस्थापनादिकं॥विधायपर्यंकमध्येतुपूजयेत्कुलनायकां॥तदुक्तंतत्रैव॥पूजयेदपिपर्यंकेम
ध्येमंडूकमग्रतः॥कालाग्निरुद्रमाधारशक्तिंकूर्ममनंतकं॥वराहंपृथिवींकंदंमृणालंकेसराण्यपि॥
पद्मंचकर्णिकांचैवमंडलंत्र्यंसमर्चयेत्॥धर्मवैराग्यमैश्वर्यंज्ञानमज्ञानमेवच॥अनैश्वर्यमवैराग्य
मधर्ममपिपूजयेत्॥ज्ञानजीवात्मपरमात्मनश्चापिप्रपूजयेत्॥गंधपुष्पाक्षतादीनिदत्वातत्रैवधूप
येत्॥तस्योपरिकुलंन्यस्यपूजानुष्ठानमेवच॥पूजयेच्चततस्तस्यांपंचकामान्समाहितः॥ह्रींचैव
कामराजंचक्लींकंदर्पमैंमन्मथं॥ब्लूंमीनकेतनंचैवस्त्रींचैवहिमनोभवं॥ओंकारादिनमोंतंकुसुमैर्गं

धसंयुतैः॥अर्चयित्वा चतुर्दिक्षु पूजयेत्कुलनायिकां॥बटुकं भैरवं चैव दुर्गां च क्षेत्रपालकं॥तंत्रां
तरे च॥वाग्भवं कामराजं च स्त्रीबीजं कामराजकं॥हसखैं मंतेन च दत्वा आधारशक्तिमुच्चरेत्॥श्रीचक्रं
ततो दत्वा पूजया भिवंदेन्नमः॥अनेन मनुना तस्या ललाटे सुमनोहरं॥त्रिकोणं तत्र संलिख्य सिंदूराघैर्व
राननं॥उत्तरतंत्रे च॥तस्या भूमिं त्रिकोणं च यंत्रमालिख्य साधकः॥महाप्रेतासनं मध्ये महाकालं च पूजयेत्॥
मोलीगणेशं केशाग्रे कुलाध्यक्षं ललाटके॥दुर्गां भ्रुवोस्तथा लक्ष्मीं रसनायां सरस्वतीं॥स्तनद्वये च संत
मदनं चैव पूजयेत्॥मुखे सुधाकरं पश्चात् ग्लूं बीजानंतरोदितं॥दक्षिणांसं समाश्रित्य आशिरश्चरणावधि॥
यजेत्कामकलास्तस्याः साधको गेषु सर्वशः॥श्रद्धा प्रीतिरतिश्चैव धृतिः कीर्तिर्मनोभवा॥विमला मोदिनी घो
रा मदनोत्पादिनी तथा॥मादिनी दीपिनी चैव शोधिनी चैव वश्यंकरी॥रंजिनी चैव मदनाकलास्वरविराजिता॥
तत्रश्चंद्रकलाः पूज्या आशिरश्चरणावधिः॥पूषा वशा च सुमना रतिः प्रीतिर्धृतिस्तथा॥ऋधिः सौम्या मरीचिश्च
तथा वै चांशुमालिनी॥मदिरा चांशिनी छाया तथा संपूर्णमंडला॥तुष्टिश्च अमृता चैव पूज्याश्चंद्रकलादमाः॥
स्वरैरेव प्रपूज्या हि सर्वकार्यार्थसिद्धये॥ललितां च्याप्तदीपिकायां तु॥भगे तदीये विधंते नाउपरस्तत्रः प्रधा
निका॥एका तु नाडिका चांद्री सौरा चान्या च नाडिका॥आग्नेयी चापरा ज्ञेया पूजयेत्तास्तु साधकः॥अंबुस्रवति
चांद्री सा पुष्पं स्रवति भानवी॥बीजं स्रवति चाग्नेयी तासु नामभिरर्चयेत्॥वाग्भवाद्येन मायुक्तैः पूजयेत्तु प्रसन्न
धीः॥उत्तरतंत्रे च॥पूजयेन्मदनागारे स्त्रक्गंधेनार्चितेति॥भगमालामनुं चान्यं त्रितारानंतरं यजेत्॥ऐं ह्रीं श्री
ऐं समुद्धृत्य क्लूं स्लूं क्लीं न्नं ततः परं॥सर्वाणीति भगानीति वशमानय मे तथा॥स्त्रीं ह्रीं ब्लूं क्लीं क्लीं च क्लिन्ने भ
गमालिन्यै नमः स्वाहा॥पूजयित्वाथ तच्चक्रं गंधैः पुष्पैस्तथाक्षतैः॥धूपैर्दीपैश्च नैवेद्यैर्विविधैः कुलसाध
कः॥विधाय बंदितां तां च तदुच्छिष्टं स्वयं हरेत्॥अर्घ्यपात्रं गंधपुष्पाद्यैः स्वशिरे तदनंतरं॥मूलमंत्रं तथा॥ तैः

ओं ॥ मूलमंत्रं ततः ओं ह्रीं नमः शिवाय तत्परं ॥ यजेत्तत्पुरुषाघोरसद्योजातेश्वरानपि ॥ निवृत्तिश्च प्रति
ष्ठा च विद्या च तदनंतरं ॥ शांतिश्च शांत्यतीता च षडंगं तदनंतरं ॥ स भगस्य विद्यामुत्थार्य त्रिकोणं चैव पूजयेत् ॥
अन्यत्रापि ॥ इहाप्यावाहनं नास्ति जीवन्यासोपि नैव च ॥ अथैवं विधिना षोडश्योपचारैरिष्टदेवतां पूजये
त् ॥ तदुक्तमुत्तरतंत्रे ॥ अवधूतेश्वरीं कुब्जां कामाख्यां सभयामपि ॥ वज्रेश्वरीं कालिकां च तथा दिगंबरवा
सिनीं ॥ महाचंडेश्वरीं तारां पूजयेत्तत्र साधकः ॥ तदनु शांततोलध्वारत्वातां बलमुत्तमं ॥ शिवं तत्र निक्षि
प्य गजतुंडाख्यमुद्रया ॥ गजतुंडमुद्रा यथा ज्ञानार्णवे ॥ अंगुष्ठानामिके चैव योन्याकारेण योजयेत् ॥ गज
तुंडाख्यमुद्रेयं मनसोभीष्टदायिनी ॥ प्रकारांतरं ॥ वाममुष्टिं तु मध्यस्थामंगुलीं दंडवत्कुरु ॥ गजतुंडा तु
एषा वै मुद्रा सर्वार्थसिद्धिदा ॥ अत्राप्यारंभेत्यागं च ॥ धर्माधर्म हविर्दीप्त इत्यादि मंत्रं स्वयमुसंक्ययनांतर
दर्शनाच्च यथा ॥ धर्माधर्मेति त्यावद्यजपेदष्टसहस्रकं ॥ शांतं चांते प्रकाशाख्यमनुना तत्समुत्सृजेत् ॥
शिवशक्तिसमायोगो यत्र यत्र प्रजायते ॥ तत्र तत्र ह्यंगमाह्यं धर्माधर्मादिकं मनुमिति ॥ ततोष्टोत्तरसह
स्रमष्टोत्तरशतं वा स्वस्थो जपेत् ॥ तदुक्तं उत्तरतंत्रे ॥ प्रजपेच्छोभरहितश्चाष्टोत्तरसहस्रकं ॥ शतमष्टोत्त
रं वापि अस्पृश्य स्थिरमानसः ॥ जपांते तत्जपं देव्यै समर्प्य तदनंतरं ॥ सुषुम्न मनो भवमुखे पूजयेत्सवि
त्रात् ॥ गलच्चंद्रद्रवं तस्माद्गृहीत्वा कुंडगोलजं ॥ अर्घ्यस्थापनयंत्रे कंचंदनादिषु योजयेत् ॥ इति दू
तियागः ॥ अथ सिद्धमंत्र येर्द्दिव्यवीरयोर्ज्ञानार्णवे विचारो यथा ॥ शिवशक्तिसमायोगो योगस्त्वनं सं
शयः ॥ सीत्कारो मंत्ररूपं च वचनं स्तवनं भवेत् ॥ आलिंगनं तु कस्तूरी चुंबनं कर्पूरं भवेत् ॥ नखदंत
क्षतान्यत्र पुष्पाणि विविधानि च ॥ मंथनं तर्पणं विद्धि वीर्यपातो विसर्जनं मिति ॥ कुलार्णवेपि ॥
आलिंगनं चुंबनं च स्तनयोर्मर्दनं तथा ॥ दर्शनं स्पर्शनं योनेर्विकारो लिंगघर्षणं ॥ प्रवेशस्थानं कं

तवपुष्पाणिपूजने॥ रुद्रयामले॥ संयोगाज्जायते सौख्यं परमानंदलक्षणं॥ कुलामृतं प्रयत्नेन त
र्पयेत्परमां परां॥ सान्निध्यं तत्क्षणाद्याति श्री तासिद्धिं प्रयच्छति॥ समस्तदेवतानांच तर्पणंचसदाम
तैः॥ गुरूणांसाधकानांच सर्वेषां तर्पणं भवेत्॥ तेनामृतेन दिव्येन सर्वे तुष्टा भवंतिच॥ यत्कामं कुरुते
मंत्री तत्क्षणादेव सिध्यति॥ समयाचारे च॥ कुलामृतं समादाय ततोर्घ्ये निक्षिपेद्बुधः॥ इति नवम
परिच्छेदः॥ ९॥ ॥ अथ विशेषसाधनं॥ अगस्ती संहितायां दीपदाने॥ अर्था
दिसाधने दीपं दक्षिणायामनोहरं॥ भार्गवेन कृतं दीपं भर्गस्याज्ञां पुरस्कृता॥ नानारोगार्ति हरणं नाना
क्लेशविनाशनं॥ महाशत्रुभयप्राप्ते प्राप्ते प्राणस्य संकटे॥ दद्याद्दीपं प्रयत्नेन कालिका कल्पभूरुहे॥ मूलं
जप्त्वाहविष्येन दिवसंचानुनार्घकं॥ रात्रौ च प्रहरे तीते ततो दीपं प्रकल्पयेत्॥ न्यासादिकं ततः कुर्यात्सौ
दाकक्वचसंयुतं॥ प्रथमं चाद्वितीयं च नैवेद्यं परिकल्पयेत्॥ स्वयं गृह्णीत तद्वासादीपं प्रज्वालनादि
रात्॥ कुमारीं पूजयेत्पश्चाद्यंत्रं कुर्यादृशं भवेत्॥ षट्कोणद्वयमध्यस्थं त्रिकोणं चतुरस्रकं॥ चतुर्द्वा
रसमायुक्तं तत्कोणं कुलिशान्वितं॥ तन्मध्ये पूजयेद्देवीं महाकालसमन्वितां॥ दीपं तस्योपरिन्यस्य
संकल्प्य कामनान्वितं॥ गोघृतेन पलाष्टेन दीपपात्री द्विवामुखं॥ इति॥ ॥ अथ सामान्यसाधनं॥
तदुक्तं कालिकातंत्रे॥ तथोच्यते दक्षिणायाः सामान्यं साधनं प्रिये॥ कृतेन येन विधिवत्पलायंते म
हापदः॥ शिवाबलिश्च दातव्यः सर्वसिद्धिप्रदायकः॥ महोत्पाते महादोषे महारोगे महाज्वरे॥ महाप
दि महायुद्धे महाविग्रहसंकटे॥ महादारिद्र्यशमने महादुःस्वप्नदर्शने॥ महाभ्रांतो महारण्ये महा[illegible]स्व
स्त्ययने तथा॥ घोराभिचारशमने घोरोपद्रवनाशने॥ कृत्युप्रादिशमने कृत्यशत्रुनिवारणे॥ राजोदि
भयशांत्यर्थं राजक्रोधोपशांतये॥ न ददाति बलिं यस्तु शिवायाः शिवतात्मये॥ स पापिष्ठो नलज्जेत

कुलदेव्याः प्रपूजने॥ अभावे कुलजां वापि॥ कुलद्रव्यं परिपूजयेत्॥ कुलद्रव्येषु प्रसन्नेषु कालिका सन्निधा
भवेत्॥ अहो धन्यवतां लोके जानाति कुलदर्शनं॥ तेषां मध्ये चयः कोपि कुलदेवीं समर्चयेत्॥ कुलाचारविही
नो यः पूजयेत् कालिकां तरः॥ स स्वर्गमोक्षभोगी च न स्यात् सत्यं न संशयः॥ आयुरारोग्यमैश्वर्यं बलं पुष्टिर्म
हद्यशः॥ कविता भुक्तिमुक्तिं च कालिकापादपूजनात्॥ कुलचूडामणौ॥ कुलवारे कुलाष्टम्यां चतुर्दश्यां वि
शेषतः॥ योगिनीपूजनं तत्र प्रधानं कुलपूजनं॥ यथा विष्णुतिथौ विष्णुः पूजितो वांछितप्रदः॥ तथा कुल
तिथौ शक्तिः पूजिता वरदायिनी॥ अथ कुलवारादिनियमो लिख्यते॥ तदुक्तं यामले॥ रविश्चन्द्रो गुरुः सौरि
श्चत्वारश्चाकुला मताः॥ भौमशुक्रौ कुलाख्यौ तु बुधवारः कुलाकुलः॥ द्वितीया दशमी षष्ठी कुलाकुल
मुदाहृताः॥ विषमाश्चाकुलाः सर्वाः शेषाश्च तिथयः कुलाः॥ वारुणकार्द्राभिजिन्मूलं कुलाकुलमु
दाहृतं॥ कुलानि समसंख्यानि शेषभान्यकुलानि च॥ तिथिवारे च नक्षत्रे ऽकुलस्थे ज्ञायते यतः॥ कु
लाख्ये जायते नित्यं साम्यं चैव कुलाकुले॥ कुलवारादिकं ज्ञात्वा साधकः कर्म कारयेदिति च॥ ॥अथ
ब्रह्मयामले कालीदीपविधानं॥ कालिकाया महाविद्या कौलेयैश्वर राधिता॥ दीपं दत्वा फलं ज्ञात्वा बीजं च
प्रथमात्रतः॥ सिन्दूरेण कृतं यंत्रं मूले नावेष्टितं तथा॥ तस्योपरि घटं दीपं दीपाग्रे दीपिनीं जपेत्॥ वेदाद्यं कमला
कामवाग्भवं भुवनेश्वरी॥ एषा तु दीपिनी विद्या कालिकारूपकारिणी॥ सौवर्णे राजते ताम्रे कांस्ये लोहजे
मृन्मये॥ यथालाभं तथा कुर्यान्निशीथे मुक्तकुन्तलः॥ श्वेतं पीतं तथा रक्तं पाटलं कर्बुरान्वितं॥ वर्त्तिं कुर्या
त्समां सौम्ये क्रूरे विषमवर्त्तिकाः॥ सौम्ये गावो महिष्याश्च घृतं वा नवनीतकं॥ अजैडकयोः क्रूरे तु कवचं
सप्तधा पठेत्॥ संकल्पं च ततः कुर्यात् कुलाचारपतयालघु॥ अन्यकुलचूडामण्युक्तप्रकारेण स्वयं गंधर्वरू
पवान्॥ भूत्वा स्वशक्त्या निःस्वस्यादीपं प्रज्वालयेत्॥ महानीलक्रमेणैव कालिकासिद्धिदायिनी॥ इति यम

श्यामा

मयीकालीतंत्रेउक्तं॥तथा॥कलौवीरेणकुलचूडामण्युक्तप्रकारेणस्वयंगंधर्वरूपवान्॥कलौवी
रेणकुलचूडामण्युक्तमार्गएवाश्रयणीयः॥तस्यैवदीपदानेदेवीप्रसीदति॥नतुपश्वोःपश्वाचारेनारी
रजोभिश्रितावर्तिः॥सूत्रंगुरुमुखादेवावगंतव्यंमालासनादिषुच॥ ॥अथशिवाबलिप्रकारः॥
तदुक्तंकुलचूडामणौ॥बिल्वमूलेप्रांतरेवाश्मशानेवापिसाधकः॥मांसप्रधानंनैवेद्यंसंध्याकालेनि
वेदयेत्॥कालीकालीतिवक्तव्यंतत्रोमाशिवरूपिणी॥पशुरूपासमायातिपरिवारगणैःसह॥भुक्त्वा
रौतियदैशान्यांमुखभुक्तुल्यसुस्वरं॥तदेवमंगलंतस्यनान्यथाकुलभूषण॥अवश्यमन्नदानेननिवर्तते
षयेच्छिवां॥निसंश्राद्धंयथासंध्यावंदनंपितृतर्पणं॥तथैवकुलसंध्यानांनित्यंजंबुकपूजनं॥पशुरूपांशि
वांदेवीयोनार्चयतिनिर्जने॥एकयाभुज्यतेयत्रशिवयादेवभैरव॥तत्रैवसर्वेन्नकोनांप्रीतिःप
रमदुर्लभा॥पशुशक्तिर्नरःशक्तिःपक्षिशक्तिस्तुभैरव॥पूजितानिर्गुणंकर्मसगुणंसाधयेद्यतः॥
तेनसर्वप्रयत्नेनकर्तव्यंपूजनंमहत्॥राजादिभयमापन्नेदेव्यांतत्रभयादिकं॥शुभाशुभानिकर्मा
णिविचिंत्यबलिमाहरेत्॥गृण्हदेवीमहाभागशिवेकालाग्निरूपिणी॥शुभाशुभफलंव्यक्तंब्रूहि
गृण्हफलंतव॥एवमुच्चार्यदातव्योबलिःकुंजरप्रियः॥यदिनाभुज्यतेवत्सतदानैवशुभंभवेत्॥
शुभंयदिभवेत्तत्रभुज्यतेतदशेषतः॥एवंज्ञात्वामहादेवत्रांतिस्वस्त्ययनंचरेत्॥अपरंचतत्रैव॥कुलाचा
रदक्षिणास्वयकथितंतवसुव्रत॥नकस्मैचित्प्रवक्तव्यंयदीच्छेच्छुभमात्मनः॥निर्जनेचैवकर्तव्यंनचैवंज
नसन्निधौ॥नपितुःसन्निधानेवानमातुःसुतसन्निधौ॥किंवापक्षिपतंगादिदर्शनंनैवकारयेत्॥पाताल
मंडलेवापिगव्हरेवासुयंत्रिते॥अथवामंडपेवापिकर्तव्यंनचसन्निधौ॥कुलपुष्पंकुलद्रव्यंकुलपूजांकु
लेजपं॥गुरुंकुलेपितंचैवकुलमालांकुलांगनं॥कुलचक्रंकुलध्यानंसर्वथानप्रकाशयेत्॥प्रकाशनात्सि

सिद्धिहानिः स्यात्प्रकाशाद्धनादिकं ॥ प्रकाशनान्मंत्रहानिः स्यात्प्रकाशाद्देवहिंसनं ॥ प्रकाशनान्मृत्युभवः
स्यान्न प्रकाश्यं कदाचन ॥ पूजाकाले च देवेशि यदि कोऽप्यत्र गच्छति ॥ दर्शयेद्भैरवीमुद्रां विस्मृत्यासं तथा
स्तवं ॥ प्रकाशनाद्घोरगुप्तिः स्यात्तत्प्रकाशाल्लक्षणं ॥ गोपनाद्धार्दिव्यक्तिः स्यान्न गुप्तिः सा विधीयते ॥ क
दाचिदंगहानिस्तु नैव व्यक्तिः कदाचन ॥ एवं पूजा न कर्त्तव्या नैव व्यक्तिः कदाचन ॥ कुलद्रव्यं समालोक्य
मत्स्यमांसं वरस्त्रियं ॥ दृष्ट्वा च भैरवीं देवीं प्रणम्य विमृषन्मनु ॥ घोरविघ्नविनाशाय कुलाचारसमाश्रय ॥ न
मामि वरदे देवि मुंडमालाविभूषिते ॥ रक्तधारासमाकीर्णभूतले त्वां नमाम्यहं ॥ सर्वविघ्नहरे देवि नमस्ते ह
रवल्लभे ॥ एतेषां दर्शनं चैवं यदि नैवं प्रकुर्वते ॥ शक्तिमंत्रं पुरस्कृत्य तस्य सिद्धिर्न जायते ॥ एतेषां मारणो
च्चाटहिंसनं वा भवादिभिः ॥ क्रियते यदि पापात्मा भक्तः स कथं भवेत् ॥ प्रधानान्त्रासमुद्दिष्टाः एताः कु
लजनस्त्रियः ॥ डाकिन्यश्च तथा सर्वा मद्दूताः शृणु भैरव ॥ लब्धसिद्धिसमायोगा डाकिनी हिंसनं यदि ॥
अथवा दानवानां च भक्तानां विशेषतः ॥ बहुकानां भैरवाणां तस्य सिद्धिर्न जायते ॥ अथ भावत्रयं ॥ तदु
क्तं भावचूडामणौ ॥ भैरव उवाच ॥ भावसंकेतमेवैतत्कथयस्व सुरेश्वरि ॥ शोचितं तु महादेवि कथयस्वा
नुकंपया ॥ रहस्यानां हि मंत्राणां यदि भावो न विद्यते ॥ सिद्धिर्न जायते देवि सत्यं सत्यं हि शैलजे ॥ दे
व्युवाच ॥ भावं तु त्रिविधं देव दिव्यवीरपशुक्रमात् ॥ गुरवश्च त्रिविधाचारास्तथैव मंत्रदेवताः ॥ आद्यः
श्रेयान् द्वितीयश्च मध्यमो निंदितोऽपरः ॥ बहुजापात्तथा होमात्कायक्लेशादिविस्तरैः ॥ न भावेन वि
नादेव तंत्रमंत्राः फलप्रदाः ॥ किं ततो पूज्यते विद्या किं न वा जप्यते न सा ॥ फलाभावश्च देवेश भावाभा
वात्प्रजायते ॥ एतद्रहस्यकथने शंकते मम मानसं ॥ त्रिलोकी मत्सरी प्रायः सर्वत्र यत्समागमः ॥ नो
विद्मो निर्जनं देव कथं तत्कथयाम्यहं ॥ भैरव उवाच ॥ तत्प्रसादान्महादेवि विविधास्त्वं प्रबोधिनी ॥

ा सर्वमायाप्रपंचानां दीक्षा दक्षा महेश्वरी॥ विप्लवते द्विसर्वेषां भूतानां स्वापकारणं॥ करोमि कथयत्वं
मांयदि पुत्रत्वमागतः॥ देव्युवाच॥ प्रथमं दिव्यभावं तु कथ्यते शृणु सादरं॥ यद्वर्ण देवता यत्र तत्तेजः पुंज
पूरितं॥ तेजोमयं जगत्सर्वं विभाव्य मूलिकल्पनं॥ तत्तन्मंत्रमयैर्दिव्यैः स्वनः स्वनैर्वा पुनः॥ स्वेन स्वेन स्व
देहस्वरूपेनेति॥ आत्मानं तन्मयं कृत्वा सर्वभावं तथैव च॥ तत्सर्वं योषिति ध्यात्वा चिंतयेद्यतमानसः॥
अशेषगुणसंपन्ना नानाजातिसमुद्भवा॥ नानादेशोद्भवा वापि गुणलावण्यसंयुता॥ द्वितीयवत्सराद्
र्ध्वं यावत्स्याद्दष्टमाब्दकं॥ तावत्कुमारी विज्ञेया मंत्रयंत्रफलप्रदा॥ कुमारीपूजनाच्चैव कुमारीभोजनाद्
पि॥ एकद्वित्र्यादिबीजानां फलदात्री न संशयः॥ एककुमारीभोजनादेकबीजसाधनफलं एवं द्वित्र्या
दिताभ्यः पुष्पं फलं वापि चान्यनुलेपादिकं तथा॥ बलिप्रियं च नैवेद्यं दत्वा तद्भावपूरितः॥ दत्वा तदंगआ
त्मानं बालभाव विचेष्टितं॥ ताभिः प्रियकथालापक्रीडा कौतूहलादिकं॥ यथा तथा तत्प्रियकृत्कृत्वा सिद्धी
श्वरो भवेत्॥ तस्मात्षोडशपर्यंतं युवतीति प्रचक्षते॥ तत्र भावप्रकाशश्चेत्स भावः परमो मतः॥ रक्षितव्या
प्रयत्नेन अक्षता स्तानकारयेत्॥ अक्षता रक्षितव्यस्तु अन्यथा न कारयेदित्यर्थः॥ यदि कुर्यात्तदा दोषमा
ह। नविष्णुरिति॥ न विष्णुना हरिः शंभुर्नरेंद्रो नापि षाउन्ना॥ न च मृत्युंजयो वापि नाभ्यासो नैव भावना॥
तस्य मृत्युंजयस्त्वत्र भवंति न देवताः॥ शास्त्रेन मूलयोगेन नागदृष्टिविषेन वा॥ चौरेणाप्तिज्वरेणापि महा
व्याधिवशादपि॥ म्रियते तेन पापेन सत्यं सुव्रत निश्चितं॥ भैरव उवाच॥ चतुर्थाश्रमिनां देवि मोक्षदात्वं सदा क
थं॥ कुलभाव विनोपित्वा संशयं मम मद्रय॥ देव्युवाच॥ मोक्षद्वारं तु बहुधा यच्च स्त्रिकुलभैरव॥ केवलं कुल
योगेन प्रसीदामि नचान्यथा॥ चतुर्थाश्रमिणां देव अवधूताश्रमो महान्॥ तत्राहं कुलयोगेन प्रसन्ना मोक्षदा
यिनी॥ यदि ता स्यात्तथा वत्स शृणु तत्कथयामि ते॥ ज्ञानभावे समुत्पन्ने संप्राप्य द्वानं कामिनीं॥ तदा योगी विमुक्तः

स्यात्तां संगस्य कुलांतरे ॥ आधारे इति ॥ कुंडलीशक्तिविचारे तथा योगं समभ्यसेत् ॥ निर्द्वंद्वो निरहंकारो शुद्ध
नाडीगणेन्नति ॥ महासने समासीनः स्वगसंयमने रतः ॥ कुंभयित्वा अधोवायुं कुंडलीमुखवर्त्मनि ॥ योजयि
त्वा ततो जीवं नीत्वा नादाय सानकं ॥ गमागमं कारयित्वा सिद्धो भवति नान्यथा ॥ पीयते स्वाद्यते यद्यत्तत्सर्वं
कुंडलीमुखे ॥ कृत्वा सिद्धिमवाप्नोति न च बंधेन बध्यते ॥ भोज्यान्यर्यान्न च स्वात्मदेवतायाः कृते पुनः ॥ भो मातर्दे
हि भोज्यां कुंडलीं तर्पयाम्यहं ॥ अवधूताश्रमे स्थित्वा भैरवानंदतत्परः ॥ भैरवोऽहं न चान्योऽस्मि न देवो मस
रः कश्चित् ॥ शिवोऽहं भैरवानंदो मत्तोऽहं कुलनायकः ॥ रक्तचंदनदिग्धांगो रक्तकौपीनभूषितः ॥ रक्तमा
ल्यांबरधरो देहे तु युक्ते सदा भवेत् ॥ एवं भोग्यांश्चरन् भोगी स्मृभैरवाचारतत्परः ॥ क्षीयते न च पापेन बध्यते न
च जंतुना ॥ तत्र निंदा परा येच तेन च श्यंति क्षणात्म भो ॥ तस्मात् यत्नात् पूजितव्यो न तिरस्कार्य एव हि ॥ यत्रैषा
वर्त्तते तस्य तत्कार्यं प्रियमप्रियं ॥ तेनापि देवदेवस्य विनोपचारविस्तरं ॥ पूजयंति महादेवीं कुलांगहीश
मात्रतः ॥ पुष्पगंधं च तांबूलं नैवेद्यं यत्र यद्भवेत् ॥ मनसा तत्समुत्सृज्य पवाद्यते कुलवारिणा ॥ तदात्मा
नं समभाव्योऽज्य देवीरूपकुलेश्वरः ॥ आनंदरूपवान् शुद्धः सर्वेषां प्रियकारकः ॥ शुष्कदुर्गंधमत्स्यादि सा
ज्यं दव्यवलो प्रिय ॥ नानासुगंधसंयुक्तैर्मांसाद्यैर्भोजनं चरेत् ॥ सुगंधामलतैलाद्यैर्नानाद्यंगरागविस्तरैः ॥
स्नानं कार्यं वारि शुभ्रं स्वच्छवासोभिधारयेत् ॥ सुगंधिपुष्पमालाभिर्मुक्तालंकारभूषणैः ॥ स्निग्धं सुम
धुरं स्वल्पं भुक्त्वा रूपं मनोहरं ॥ कृत्वा समंगलं देहं मृदु भाषण तत्परः ॥ नाम्ना मधुमती तत्र जायते नात्र संशयः ॥
मधुमत्याः फलं किं तु लिखितं फलपातने ॥ कुलं उभाउ संभेदस्तेन जीवेत्स निर्जरः ॥ एष ते कथितो देव
दिव्यभावः शुभावहः ॥ न देयाय स्यकस्यापि यत्नाद्गोप्यः प्रयत्नतः ॥ इति दिव्यभावः ॥ ॥ अथ वीरभावः ॥
वीरभावो महादेव कथ्यते शृणु भैरव ॥ निर्द्वंद्वमानसो भूत्वा सदा कामकलातनुः ॥ कामकलारूपमात्मा

नं भावयेदिह सर्व्वः ॥ इदं वीर कुलं देवदेवं मनोहरं ॥ यद्देशे विद्यते वीरस्तत्कुलं वापि भैरव ॥ न च मा रहस्य
री भयं तस्य न च राजभयादिकं ॥ सुमंगलं सदा तत्र धन पुत्र विवर्द्धनं ॥ लक्ष्मीस्तत्र महादेव सर्वदा सुस्थि
रा भवेत् ॥ योगिनीभिर्न्न कुत्रस्तु तस्य यापैर्नयुज्यते ॥ यत्र तत्र कुले वा रे श्मशाने साधने कृते ॥ पूजाफलं भ
वेत्तत्र सत्तवासरं संभितं ॥ चतुर्द्दश्यां गते तत्र यस्य पूजाफलं लभेत् ॥ तत्र कुजश्चतुर्द्दश्यामिति ॥ नोगतेना
र्चितेस्थाने पशुरेव न संशयः ॥ नान्योस्मादधिकोदेवेद्दति र्चिंतापरायणः ॥ भुक्त्वा तु मांसकद्रव्यं भवेत्कुल
परायणः ॥ साधके क्षोभमापन्ने ममक्षोभः प्रजायते ॥ तस्मात्प्रलाङ्गोगयुक्तो भवेदीश्वरः सुधीः ॥ भोगेन
मोक्षमाप्नोति भोगेन कुलसाधनं ॥ यद्यदिद्रति निद्राति यत्करोति यस्र्चति ॥ तत्सर्वं कुलरूपं च ध्यात्वा तु हरे वि
सुधीः ॥ एकाकी विजने देशे श्मशाने पर्वते वने ॥ शून्यगेहे तीर्थे निःसंगो विचरेत्सुदा ॥ वीराणां जपकालस्तु
सर्वकालः प्रशस्यते ॥ सर्वदेशे सर्वपीठे कर्त्तव्यं नात्र संशयः ॥ यदि विप्रो भवेक्ष्रस्सः कुलद्रव्यपरायणः ॥
तदानेन विधानेन कर्त्तव्यं कुलतोषणं ॥ अपराजु ष्यमध्ये तु कुलस्थानं मनोहरं ॥ सर्वदेवमुखं तत्तु महाका
मकलात्मकं ॥ हयारिकुसुमे देवः स्वयमस्ति सदाशिवः ॥ तन्मूले लघु मादाय पुष्यमध्ये तु चंदनं ॥ रक्तं कुं
कुमरागं वा दत्वा तत्र शिवात्मकं ॥ योजयेच्छिवशक्तिभ्यां तु ऐक्यं संभावयन्धिया ॥ क्षणं विचिंत्य तत्रैव सचिंतय त्रे
परमेश्वरीं ॥ यत्रापराजितापुष्पं जपापुष्पं च भैरव ॥ करवीररक्तपुष्पं द्रोणपुष्पं च तत्तुवि ॥ तत्र देवीव
सांनिध्यं तस्यं त्रे पूजनं मम ॥ स्वेत्वैकजपापुष्पे पद्ववरूफ शतं लभेत् ॥ ब्रह्महत्यादिकं सर्वं क्षणान्नश्यति नि
श्चितं ॥ अपराजाख्यमाहात्म्यं बहुनास्ति महेश्वर ॥ वीरसाधनकार्यं तु कर्त्तव्यं वीरपूर्वकैः ॥ दिव्यैरपि च कर्त्त
व्यं पशुभिर्न्न च पामरैः ॥ वरे पामरकार्यं तन्न पशोरीति निश्चितं ॥ यत्तत्तु पुरा प्रोक्तं सकेतं मंत्रसाधनं ॥ अंज
ने [illegible] रिश्च कुर्याद्दीरो महाबलः ॥ स्त्रियैव वीरेन भेदोस्ती याभेदः स्यच कथ्यान्ते ॥ [illegible] तो वि [illegible] नीता मधुरः क

न्नावण्यसंयुतः॥ दिव्यस्तुदेववत्साभोवीरश्चाभ्रतमानसः॥ विभूतिभूषणोवाथचंदनैर्वाविलेपितः॥
आकारगोपनोवापिव्यक्तोवाकुलभैरव॥ रक्तचंदनलिप्तांगोभैरवोवाप्यवैरमवः॥ असंस्कृतकेशजालः
क्वचिन्नष्टः संस्कृतोवाकुलेश्वर॥ क्वचिच्छिष्टः क्वचिद्भ्रष्टः पिशाचवत्॥ अपमानेचपूजायांहृष्टपुष्टः सदाभवेत्॥
देवनिंदापरोवापितत्पूजादिपरोपिवा॥ पूजाभयरहितःकुलाचाररतेस्थितः॥ निजभावसमायुक्तो
देवद्विहरक्षितो॥ स्वकुलांतेपुरश्चर्याकार्यारात्रौनचान्यथा॥ विष्णुभक्तिंविनादेवभक्तिर्नचभवेद्यथा॥
शाक्तंज्ञानंविनामुक्तिर्यथाहास्यायकल्पते॥ पतिहीनायथानारीसर्वकर्मविवर्जिता॥ कुलंविनातथादेवो
वीरोवाममसाधकः॥ नाधिकारीतिकौलेयतस्माद्भावपरोभवेत्॥ अविनीतंकुलंयस्यसकथंममसाधकः
तस्माद्यत्नात्तथाकार्यंयथास्याद्विनयान्वितं॥ भावाभावात्कुलेशास्त्रेनाधिकारःकथंचन॥ तेनभावावि
शुभस्तुसाधकःकौलिकोभवेत्॥ इतिवीरभावः॥ ॥अथपशुभावः॥ देव्युवाच॥ पशुभावंप्रवक्ष्यामि
शृणुष्वसुसमाहितः॥ यथाविधिपशुर्येर्योगृहीवाधर्मतत्परः॥ प्रथमंपूर्वसेवार्थेयत्नतःशुद्धिमाप्नुयात्॥
नमत्स्यभोजनंकुर्यान्नस्त्रियंमनसास्मरेत्॥ नपरद्रव्यलोभस्यान्नभोगंमानसंचरेत्॥ सिंधुतीरेपर्वतेवाका
ननेवासुरालये॥ बिल्वमूलेविविक्तेचपुण्यक्षेत्रेसुशोभने॥ नशूद्रस्पर्शनंकुर्यात्कौटिल्यंदूरतस्त्यजेत्॥ दे
वताश्चस्वभावेनध्यातव्यासुसमाहितैः॥ त्रिसंध्यंजपपूज्यास्यात्त्रिसंध्यंजपमाचरेत्॥ रात्रौमालांनयं
त्रंचस्पृशेन्नैवकरांचन॥ नमंत्रंमुच्चरेद्रूत्वामौनीस्यात्सर्वकर्मसु॥ सर्वकालेदिवायत्रैश्चवनगच्छेत्सा
धकोत्तमः॥ पुष्पगंधंजलंचैवस्वयमानीयपूजयेत्॥ मैथुनंतत्कथालापंतद्गोष्ठिंपरिवर्जयेत्॥ कु
कालेरविनागच्छेन्नतुस्वस्त्रियमास्पृशेत्॥ पुराणश्रवणेश्रद्धाकेवेदार्थतत्परः॥ रात्रौनभोजयेद्विदु
न्तंताम्बूलंपरमेश्वर॥ गुरुणायत्पदादिष्टंतत्सर्वंसर्वतश्चरेत्॥ अपितत्कुसुमंचैववेदंतुद्रव्यंचभैरव॥

मा

स्पृष्ट्वा स्त्रियं त्रिरात्रेण पंचगव्येन शुध्यति ॥ रजस्वलां न गृण्हीयाद्देवीभक्तिपरायणः ॥ विमुक्तं तोक्तपूजादि रहस्य

दस्तु ब्राह्मणो भवेच्च ॥ निःसंभाष्य गवां ग्रासं दत्वा शुद्धो भवेच्च ॥ तीर्थस्नानं पीठदेशागमनं धर्मतत्परः ॥ पशुसंगादि

विघातश्च पूर्वेण सह भैरव ॥ अस्याधिकारः पूजायां गुरुत्वेन कथंचन ॥ पूर्वस्य नाधिकारोऽस्ति पूजादि

शगत्वागते ॥ पूर्वस्तु सर्वकौलैर्यत्नाद्बहिष्कार्यः सुरेश्वरः ॥ पूर्वदर्शनमात्रेण कुलदर्शनमाचरेत् ॥ अल

स्य सांसारिकं पापं यत्र सत्यं न तु प्रभो ॥ पूर्वदर्शनमात्रं तु नहि सत्यं वरानने ॥ ममात्मा सततं देवेशि क्लिश्यतो

यत्पापिप्रभो ॥ तथापि तत्कृते देवि का जायते तत्पदे पदे ॥ वरं कुलपरित्यागं नैवं स्वकुलहिंसनं ॥ न कुर्यात्स

शुसंगं तु मम आगस्य कारकं ॥ कुलशास्त्रे त्वयं पापो गर्हितः कुलनायक ॥ स्वकुले महती निंदा परयोग

महेश्वरः ॥ तस्मादपि महत्पापं पशुसंगात्प्रजायते ॥ सर्वथा नैव भावो हि नज्ञानाच्चैव कथंचन ॥ देववीर

न संदेहः साम्यमित्यभिधीयते ॥ भावस्तु मानसो धर्मः शाश्वतः स हि कथं भवेत् ॥ तस्माद्भावो न कर्तव्यो

दिव्यानां समुदात्मने ॥ यथेक्षुगुडमाधुर्यं न परे ज्ञायते विभो ॥ उपाधिभेदभावेन भावो तद्भेदो न दृश्यते ॥ इ

ति पशुभावः ॥ ॥ समाप्तमिदं भावत्रयं प्रकरणं ॥ अथ समयाचारः ॥ तदुक्तं ॥ कुलचूडामणौ ॥ शृणु

पुत्र रहस्यं मे समयाचारसंभवं ॥ येन हीना न सिध्यंति जन्मकोटिसहस्रशः ॥ मान्यः कुलशास्त्राणि

कुलचर्यानुचारिणा ॥ उदासीनश्च सर्वत्र वै समवाचारतत्परः ॥ परनिंदासहिष्णुः स्यात्परोपकाररतः सदा ॥

पर्वते विपिने वापि निर्जने शून्यमंडपे ॥ चतुष्पथैकलाशून्ये यस्य देवालये भवेत् ॥ स्वगृहे ध्यात्वा मनुं जप्त्वा

नत्वा गच्छेद्यथासुखं ॥ गृध्रं वीक्ष्य महाकालीं नमस्कुर्यात् विलक्षितः ॥ क्षेमंकरीं तथा वीक्ष्य जंबुकीं च

मङ्गलिकां ॥ कृष्णरूपेण भूकाकोदरं समाचरेच्च ॥ दृष्ट्वा स्त्रीं महानंदे मुक्तकेशीं बलिप्रियं ॥ कुलाचार

प्रसन्नास्य नमस्ते शाकरप्रिये ॥ रम्यध्यानं च यथावंदत् श्यामाप्रसादसिष्य मे नुजमेत् ॥ प्रणम्यानेन मंत्रेण मंत्री तु

खमध्यान्नुयात्॥ घोरदंष्ट्रे करालास्ये किंकिणीरवनादिनी॥ घोरघोररवास्फाले नमस्ते चितिवासिनी॥
रक्तपुष्पैस्तथा पुष्पविलोक्या त्रिपुराम्बिका॥ अथ भैरव बटुमाषिमं मंत्रं पठन्नरः॥ बंधूकपुष्पसंकाशे
त्रिपुरे भयनाशिनी॥ भाग्योदयसमुत्पन्ने नमस्ते वरवर्णिनी॥ रक्तपुष्पं तथा वस्त्रं राजेराजपुत्रकं॥ ह
स्त्यश्वरथशस्त्राणि फलकान्वीरपौरुषान्॥ महिषीकुलनारींच दृष्ट्वा महिषमर्दिनी॥ प्रणम्य जयदुर्गे
वास्य विघ्नैर्न लिप्यते॥ जयदेवि जगद्धात्री त्रिपुराद्ये त्रिदैवते॥ भक्तेभ्यो वरदे देवि महिषघ्नी नमोस्तु ते॥
मद्यभांडं समालोक्य मत्स्यमांसं वरस्त्रियं॥ दृष्ट्वा च भैरवीं देवीं प्रणम्य विमृषन्मनुं॥ घोरविघ्नविनाशा
य कुलाचारसमर्थये॥ नमामि वरदे देवि मुंडमालाविभूषिते॥ रक्तधारासमाकीर्णवदने त्वां नमाम्यहं॥
सर्वविघ्नहरे देवि नमस्ते हरवल्लभे॥ एतेषां दर्शनाद्देवि यदि नैव प्रकुर्वते॥ शक्तिमंत्रं पुरस्कृत्य तस्यासि
द्धिर्न जायते॥ एतेषां मारणाद्वीर हिंसनं चागुरादिभिः॥ कियत्तेषां दिपायाला मद्भक्तः स कथं भवेत्॥ अथा
नः सुसमुद्भूता एते कुलजनप्रियाः॥ आकिन्यश्च तथा सर्वा मदंशाः शृणु भैरव॥ ममासिद्धिसमायो
गाडाकिनीहिंसनं यदि॥ अथवा दानवानां च मद्भक्तानां विशेषतः॥ बटुकानां भैरवाणां तस्य सिद्धिर्न जाय
ते॥ इति दशम परिच्छेदः॥१०॥ ॥अथ पुरश्चरणव्यतिरेकमंत्रसिद्धिप्रकारो लेभ्यते॥ लिख्यते
तदुक्तं कामकलातंत्रे॥ मंत्रसिद्धिलक्षणं॥ मनोरथानामक्लेशात् सिद्धे उत्तमलक्षणं॥ आरोग्यात्म रु
नां क्लेशात् सिद्धेस्तु लक्षणं परं॥ परकायप्रवेशं च पुरप्रवेशनं तथा॥ महेंद्रजालमिंद्रादिजालानां रचना
तथा॥ ऊर्ध्वोत्क्रमणमेवं हि चरान्तपुरीगतिः॥ इति मध्यम॥ ख्यातिर्वाहनभूषादिलाभस्तु चिरजीविनः
न्यानां तद्गुणानां च वशीकरणमुत्तमं॥ सर्वत्र सर्वलोकेषु चमत्कारकरं सुखी॥ रोगापहरणं देवी विषाप
हरणं तथा॥ पुत्रदारादिसंपत्त्या अधमसिद्धयः प्रोक्ता मंत्रिणां प्रथमभूमिका॥ इति अधमसिद्धिः॥

श्यामा

तदुक्तं वीरतंत्रे ॥ अथातः संप्रवक्ष्यामि गुरुसिद्धिपुरःसरं ॥ रहस्यं मन्त्रसिद्धेस्तु पुरश्चर्यादिभिर्विना ॥
गोपितं कोटिवर्णस्य षड्दानीं प्रकटीकृतं ॥ एवं ज्ञात्वा विशेषेण गोपयेत्त्वं नयेमम ॥ एतत्प्रकाशनाल्लोके
महाहानिः पदेपदे ॥ ॥ शिवशिव — — भानुपंचमांत्यस्वराढ्यं द्वितयमिदमपूर्वं बीजमुग्रप्रभायाः ॥
क्षणमपि परम मणीनां मंडलांतर्विभाव्य श्वयति दुरदृष्टं वादिवाजायते सः ॥ सजयति रिपुवर्गान्वादिवा
राजान्विवादे लघयति रमणीनां चित्तचौरश्चिरायुः ॥ कवयति कविराजैरप्यदृष्टं सुकाव्यं मधुमतिरपि
स्यात्किं पुनः सिद्धिसंघाः ॥ कुलयुवतिसुयोनौ मंत्रवर्णान्विलिख्य निखिलनिगमवर्णान्नुत्तदोषादि
ष्टान् ॥ विदितगुरुकुलांतर्बाह्यवर्णान्विधिज्ञो मनुचरित परिष्यान्साधयेषांतचेताः ॥ कुलपथमनुस
ध्यायाभितायासुभूमौ तब्जननिजनोयस्तर्पयेत्तीर्थतोयैः ॥ रुधिरतरसुपुष्पैर्गंधमाल्यानुले परचित
युवतिवेश्यास्त्वद्धियाध्यायनेसः ॥ परिचरतिसमस्तैर्न्यासपूर्वैः प्रसिद्धैस्तवपरिकरजालैर्योनिचक्रेण
पूज्य ॥ सुविमलकुलजातां श्रीघृणावर्जितां यः श्वयमपरचितांगः क्षोभरूयोगिनीनां ॥ ५ ॥ पशुरि
पुकुलचक्रं संस्थशान्मध्यशारवं सुरतरुसुरनाथः पापभ्रष्टः सुवेशा ॥ कुलपथिकुलनाथस्तद्वयं योज
यित्वा ॥ मनुपरितविमग्धं यो जयेत्तद्धरिर्यः ॥ ६ ॥ पुरिमदनरिपुः ॥ जननितयकुलानां कोविदा काम
रूपः कुमतिरहितचित्तः संलिखेत्तांत्रिधारे ॥ विगतभयविवादध्वांतजालः सुधांशुस्तव चरणतलांत
धूलिजालैर्विशालैः ॥ ७ ॥ परिकलितवपुस्तत्कर्मभिर्देवपूज्यैः परिचयति सुविज्ञो मासचर्यादि कः सः ॥
मदनमदवधूनां बीजमुग्रत्यशक्तिं तदनुकुठीनबीजं लोके धात्रीं तदंतः ॥ ८ ॥ यदि जपति मदंतर्भावमा
साद्य सद्यः सुरनगरगतैस्तैः सिद्धवर्गैः प्रपूज्याः ॥ शिवभगुमदरथ्वी चक्रिण्यः सुसिद्धरहस्यमुग्रा
सः स्वयंभूतिप्रसूतं ॥ ९ ॥ परमपदविमुधः क्षोभदास्त्वामिनीनां अधिपतिरपि वाचां श्रीपतिः सार्वभौमः ॥

भगुमदकुठिनाधःकामबीजंतदग्रेभुवनभयविनाशःक्षोभनीयोजपित्वा॥१०॥जपतियदिसहस्र
चिंस्नतेवीरसिंहः॥कुलयुवतिकुलातःसोभरुस्कोभावाते॥मदनमदयुताधःशक्तिबीजंनियोज्यपु
स्तहरिरूपीकामरूपःकुबेरः॥११॥रिपुकुलहरिणासिंलोचनाभोजबिंदुद्विपुलजानिसत्यःख
डितांतीसयताप॥शिवभगुमदमूलंलोभमूलंसमूलंभजतियदिगुरूणामर्थमत्रंविमृश्य॥१२॥
निधिपतिरपिनाथोगोप्यतिःस्कुंत्यैतापदिभेवाततदेतन्मुख्यमूर्वपातलं॥चरणवनौविवर्ज्यश्रा
णमेकंविवर्ज्यतदुपरिमगभिन्नंदूमेतद्वाक्यः॥१३॥निखिलमनुसुराणांमगपदानेकदक्षःसक
लयजनकर्मस्वमद्रुनमंत्रराजः॥अनलसुरासिघर्मेवाशिराजंसंबद्धअसमस्तुस्वरयुक्तंबीजम
न्यद्वाक्या॥१४॥द्वितयमपिविमानंक्रमीशोमहेंद्राःकोमहकमलजन्माजन्मधारासहस्रैः॥इह
भजतियएनंमंत्रराजंस्यभाग्येभजतिजतिजनन्नियुक्तस्तादपद्मोल्पभक्त्या॥१५॥स्वजातिसपनमपु
मांसमाद्वयोऽप्यकालेनरखलुवपुरनर्घ्यंतस्यकाचित्कदाचित्॥विहितगुरुमुरवाद्वाबालकाद्वा
पशौर्वालिखितमपिसबुध्वाप्राप्यकस्मात्कस्मात्॥स्मररिपुपुरपारेमोक्षचर्याध्यिपोरपरमपवि
लीनःसर्वसौभाग्यभोगी॥अनलपुरविभागेवालिकारंभबीजंतदपियदिविदध्यात्स्मृतंदंतवर्णं॥१७
नयनयुतलकारंमस्तकेभानुयुक्तंतदनुविकटदंष्ट्रासोलकारंबीजयुक्तं॥यदिजपतिसमस्तंगुह्यगु
ह्यातिगुह्यंत्रिजगतिकिमिहास्तिनास्यलभ्यंकथंचित्॥१८॥क्रमपठितमपूर्वंसर्वमेवानुबंधमनु
पमपरवाच्यंतस्यमध्यस्यरूपं॥भजतियदिचिदात्मानंरथकक्रेवलासाविजितभुवि मनुष्यःकोतु
कोमामनुष्यः॥१९॥इतितेकथितंसर्वंरहस्यंपरमाद्भुतं॥यथानुक्रमतोलोकेकिंनसाधयतियोगि
राट्॥२०॥इतिश्री।पूर्णानंदपरमहंसविरचितेश्या०स्यपुरश्चरणव्यतिरेकमंत्रसिधिप्रकारोनामैकादशः

श्यामा परिच्छेदः॥११॥ ॥अथकाम्यप्रयोगोलिख्यते॥तदुक्तंकालीतंत्रे॥अथ
काम्यविधिंवक्ष्येयेनसर्वत्रसर्वगः॥साधकःसाधयेत्सिद्धिंदेवानामपिदुर्लभां॥कुलागारंपुष्पिता
यादृष्ट्वायोजपतेनरः॥अयुतैकप्रमाणेनसाधकस्थिरमानसः॥केवलंस्थिरभावेनसत्त्वविद्यानिधिर्भवे
त्॥संस्कृताःप्राकृताःशुद्धालौकिकावैद्यकास्तथा॥वशमायातितेसर्वेसाधकानांनसंशयः॥अथ
वामुक्तकेशस्तुहविर्भुक्त्वासुसंयतः॥प्रजप्यादयुतंप्रातस्तदैवफलंलभेत्॥नग्नांवीरलतांपश्य
न्नयुतंयस्तुसाधकः॥प्रजपेत्सभवेत्सद्योविद्यायांवल्लभेत्स्वयं॥तस्यदर्शनमात्रेणवादिनःकुंठतां
गताः॥गद्यपद्यमयीवाणीसभायांतस्यजायते॥तन्नाम्नासुधियःसर्वेप्रणमंतिमुदान्विताः॥तस्य
वाक्यपरिस्पर्धाजडाभवंतिवाग्मिनः॥अथवामुक्तकेशश्चहविष्यंभक्षयेन्नरः॥प्रजप्यादयुतंतस्य
एषप्रतिनिधिस्मृतः॥धनकामस्तुयोविद्वान्महदैश्वर्यकामुकः॥बृहस्पतिसमोयस्तुभवितुंकामयेन्नरः॥
अष्टोत्तरशतंजप्त्वाकुलमार्गेण्यजन्सवित्॥मैथुनंयेस्थयास्येषसतुसर्वफलंलभेत्॥लतारतेषुजप्तव्यंम
हापापविमुक्तये॥लतायदिनसंसर्गोतदमजोंप्रयत्नतः॥ससुत्सार्यजपेन्मंत्रंधर्मकामार्थसिद्धये॥
तासांप्रहारंनिंदांचकौटिल्यमप्रियंस्तथा॥सर्वथानैवकर्त्तव्यमन्यथासिद्धिरोधकृत्॥स्त्रियोदेवा
स्त्रियःप्राणाःस्त्रियएवविभूषणं॥स्त्रीसंगिनासदाभाव्यमन्यथास्वस्त्रियामपि॥विपरीतरतासक्तो
भवितात्हृदयोपरि॥तद्भस्तारभ्यंतंपुष्पंतद्भस्ताद्भ्यंतंपयः॥तद्भस्तारभ्यंतंभोज्यंदेवताभ्योनिवेद
येत्॥महापीठक्रमलतावेष्टितःसाधकोत्तमः॥महापीठेतिस्त्रीन्पीठ॥रात्रौयस्तुजपेन्मंत्रंसैव
कोस्यलताभवेत्॥महाचीनक्रमलतावेष्टनेनचयत्फलं॥तस्यापिषोडशांशेनकलांनार्हंतितेशि
वाः॥शवासनाधिकफलंलतागेहप्रवेशनमिति॥अथापिविशेषोयथा॥तदुक्तंकुलचूडामणौ॥

रजोवस्थांसमालोक्यतन्मूलेधिष्टदेवतां॥पूजयित्वामहारात्रौदिनंचप्रजपेन्मनुं॥लक्ष्मीउत्फलंदेवल
भतेनात्रसंशयः॥वेतालपादुकासिद्धिंखड्गसिद्धिंचभैरवं॥अंजनंतिलकंगुप्तंसाधयेत्साधकोत्तमः॥प्र
जपेदिति॥उनपंचाशद्दिनपर्यंतंप्रतिदिनमष्टोत्तरसहस्रमित्यर्थः॥तदुक्तंतंत्रचूडामणौ॥यत्रजापेच
मंत्रेचसंख्यानोक्तामनीषिभिः॥तत्रैवगणनाप्रोक्तागजांतकसहस्रमिति॥गंधर्वतंत्रेपि॥पृथ्वीकृत्तु
मतीर्थीस्थ्यसहस्रंयदिनिस्पशः॥तदावादीसुसिद्धांतःहृतःक्षितितलेविशेत्॥पर्वतेहस्तमारोप्यनिर्भ
याद्गानमानमानतः॥कवितांलभतेसोपिअमरत्वंचगच्छति॥पर्यंदद्यात्तथाबिंबंखंजनंशिखरंतथा॥
चामरंरविबिंबंचतिलपुष्पंसरोवरं॥त्रिशूलंविस्यजत्वालुशतशःशुद्धभावतः॥सुखप्रसारंसुवक्त्रः
सुलोचनसुहास्यकं॥सुकेशंसुभगंगंधंसुगंधंसुखमेवच॥लभतेचयथासंख्यंशृणुपार्वतिसादरं॥
महाचीनक्रमेदेवींध्यात्वातत्रप्रपूज्यच॥तद्योद्भवपुष्पेणपूजयेद्भक्तिभावतः॥सभवेत्कुलदेवस्यकु
लद्रुमगतःकविः॥ब्रह्मतरोर्महापद्मेदेवींध्यात्वायथाविधिं॥तत्सुधारसधारेणतर्पयेन्मातृकाननं॥
सभवेत्साधकश्रेष्ठोमातृणांश्रभवेत्प्रियः॥महाचीनक्रमलतावेष्टितःसाधकोत्तमः॥रात्रौयदिजपेन्मंत्रं
सर्वैकल्पलताभवेत्॥तिथिक्रमेणसंख्याभिर्लताभिर्वेष्टितोयदि॥तदामासेनसिद्धिस्यात्सहस्रजपमानतः॥
अष्टम्यांचचतुर्दश्यांद्विगुणंपरिदृश्यते॥तदैवमहतीसिद्धिर्देवानामपिदुर्लभा॥अथभिन्नायांशिक्षितांनायि
कांसमानीयकामाख्यमुखाव्यापकान्यासांतंतस्यागात्रेविधायदेवीकोठादिपीठआरोपीठदेवींप्रपूज्य
मूलांतंदेवींप्रपूजयेत्॥तदुक्तंकुलचूडामणौ॥आनीयदेवींतद्गात्रेव्यापकंविन्यसेत्तथा॥प्रथमंसाधकः
श्रेष्ठोदेवीकोठस्यमस्तके॥पादयुगोपरीत्यर्थः॥विलिख्ययंत्रंपूर्वोक्तंप्रजपेत्कुलवर्त्मना॥क॥पीठदेवींप्र
पूज्याथपूजयेद्गंधपुष्पकैः॥महाभागाततोमूलदेवीमावरणैःसह॥लक्षैकंतत्रजप्त्वातुउड्डीयानंततोविशेत्॥

या मा तत्पीठे योगमुद्राख्यां पूजयित्वा ततो यजेत्॥ निजेष्टदेवतां तत्र जपेल्लक्षं समाहितः॥ उड्डीयानमुद्राख्यु
गमित्यर्थः॥ कामरूपे ततो गत्वा ततः कात्यायनीं यजेत्॥ कामरूपे प्रजापानमुखमित्यर्थः॥ जप्त्वा लक्षं त
तो रात्रौ कामाख्यां प्रथमं यजेत्॥ ततो जालंधरे गत्वा पूर्णेशीं प्रथमं यजेत्॥ जालंधरस्तनयुगमित्यर्थः॥ तत्रा
गैत्वौ पि लक्षमानेन जप्त्वा मंत्रं समाहितः॥ ततः पूर्णगिरौ पीठे यजेच्चण्डीं ततो जपेत्॥ पूर्णगिरौ शिरसीत्यर्थः॥ जपे
दिति मूलं देवीं सावरणां प्रपूज्य लक्षं जपेदित्यर्थः॥ कामरूपान्तरे वत्स कामाख्यां प्रथमं यजेत्॥ कामरूपा
न्तरे बिंदुचक्रांतर इत्यर्थः॥ ततः प्रांते महादेवीं यजेद्दिक्करवासिनीं॥ एवं पीठेषु जप्त्वाथ पूजयेदिष्टदेवतां॥
सप्तपीठे सप्तलक्षं जप्त्वा रात्रौ समाहितः॥ संख्यापूर्तौ पुनः पृष्ठे कात्यं देवी कुलोत्तमे॥ एवं कृते विसृष्टान्वे
त्वं नाम्नी गोत्रजन्मनी॥ तवेष्टदेवतैवाहं शृणु पुत्र वचनमुत्तमं॥ ततः प्रणम्य देवेशं शरण्यायाद्मात्मनः॥ यद्येवं
नैव सा देवी पुनः पूर्वक्रमाच्चरेत्॥ अक्षोभितकुलाचारपरिचर्यापरायणः॥ अथवा सर्वपीठेषु यजेन्म
हिषमर्दिनीं॥ ततः प्रसन्ना भवति स्वैरं कुलवरप्रिया॥ ततो जप्त्वा मूलमंत्रं सर्वसिद्धेश्वरो भवेत्॥ इति श्रीपू
र्णानंदपरमहंसविरचिते श्यामारहस्ये द्वादशः परिच्छेदः॥ १२॥ ॥ अथ ग्रंथगौ
रवभयान्महाभागादिपीठदेवीक्रमो न लिखितः॥ किंतु सर्वपीठे महिषमर्दिनीपूजाप्राप्तत्वात्क्रमो लिख्य
ते॥ तदुक्तं कुलचूडामणौ॥ भैरव उवाच॥ मातर्महिषमर्दिन्याः संकेतं कथयस्व मे॥ कुलाचारस्य संसि
द्धयै भुक्तिमुक्तिप्रसिद्धये॥ देव्युवाच॥ सदाशिवस्यापि विनाशा नामादिभूता महेश्वरि॥ गोप्या सर्वप्रयत्नेन
शृणु तां कथयामि ते॥ त्रैलोक्यबीजभूतां ते संबोधनपदं ततः॥ सृष्टिसंहारकौ वर्णौ विद्या महिषमर्दिनी॥
अस्यार्थः॥ मदनं रिपुशक्तिबीजांते विद्या महिषमर्दिनी॥ परं त्वाभिमुखेनोद्धृत्य चान्यं ललनामुखे दिव॥
ध्यायिनी ओं ह्रीं महिषमर्दिनी स्वाहा॥ अतिगुह्यतरा विद्या सदाशिवस्थितिविनाशिनी॥ सर्वदेवैः सर्वसिद्धिबीजभूता

सनातनी॥ न कस्मैचित्प्रवक्तव्या कथिता सिद्धिनाशिनी॥ अत्यंतगुरुभक्ताय शिष्याय यदि कथ्यते॥ न
शास्त्रेण दातव्यं न बीजं नच साधनं॥ साधारणी प्राणविद्या त्वत्से सा सिद्धिगोचरा॥ एतत्पूर्वस्थिता देवी गु
रुसिद्धिविनाशनी॥ विशेषतः कलियुगे महासिद्धौघदायिनी॥ गुरूणां कुलनाथानां महात्मा पद्मदायिनी॥
उग्रदुर्गे तु या प्रोक्ता सा परा सिंहवाहिनी॥ त्रैलोक्यबीजभूतां ते सा परा मर्दिनी कुलं॥ वरं वह्निप्रिया युक्ता
नदेव्या मनसान्विता॥ दत्ता चेत्स रमाख्या उं युक्ता त्वद्द्यान्विता॥ सर्वत्र कुलशास्त्रेषु महात्मा पद्मदायि
नी॥ तस्मात्सर्वप्रयत्नेन गोप्तव्येयं नवाक्षरी॥ यथास्याः पूजाक्रमः॥ प्रातः कृत्यादि स्नानांतं विधाय
द्वारदेवतां॥ पूजयेत्॥ तदुक्तं तंत्रांतरे॥ ऊर्ध्वोदुंबरके विघ्नं महालक्ष्मीं सरस्वतीं॥ ततो दक्षिणवामे
च बटुक्षेत्रेशमर्चयेत्॥ तयोः पार्श्वगते गंगायमुने पुष्पवारिभिः॥ देहल्यामर्चयेदस्त्रं प्रांतद्वारमि
ति क्रमात्॥ विघ्ननाशं भूतशुद्धिं प्राणायाममत्रयं तथा॥ अथ त्रिविधविघ्नोत्सारणासनस्थापनं भूत
शुद्धिं प्राणायामं पूर्ववत्कृत्वा ऋष्यादिन्यासं कुर्यात्॥ तदुक्तं कुलचूडामणौ॥ नारदोस्य ऋषिः प्रोक्तो
छंदो गायत्रमीरितं॥ देवता महिषघ्नीयं पूर्वबीजं परापरं॥ कीलकं महिषायेति मर्दिनीति विन्यसेत्॥
विनियोगश्चतुर्वर्गे करांगन्यासमंततः॥ अस्यायं क्रमः॥ नारद ऋषिर्गायत्री छंदः॥ श्रीमहिषमर्दिनी दे
वता॥ ह्रीं बीजं स्वाहा शक्तिः॥ महिषमर्दिनी कीलकं॥ चतुर्वर्गसिध्यर्थे जपे विनियोगः॥ इत्यभिलप्य पूर्व
वन्न्यसेत्॥ ततः करन्यासं कुर्यात् यथा॥ ओं महिषघ्नि हुं सके हुं फट् अंगुष्ठाभ्यां नमः॥ ओं महिषशत्रो श्रावि
हुं फट् तर्जनीभ्यां नमः स्वाहा॥ ओं महिषद्वेषय हुं फट् मध्यमाभ्यां वषट्॥ ओं महिषहननं हुं फट् अनामि
काभ्यां कवचा०॥ ओं महिषमर्दिनी हुं फट् कनिष्ठिकाभ्यां नेत्रत्रया०॥ तदुक्तं॥ ओं महिषघ्नि सके हुं फट्॥
अंगुष्ठयोर्न्यसेत्ततः॥ ओं महिषशत्रो श्रावि हुं फट् तर्जनीयुग्मके॥ महिषंद्वेषयद्वेषयं हुं फट् मध्यमाया

स्तथा॥ महिषं हन हन हुंफट् तथा नाभिकयोः पुनः॥ महिषमर्द्दिनी हुंफट् तथा करकमिलयोः॥ पंचां रहस्य
गमस्य मंत्रस्य विन्यसेच्च यथाक्रमं॥ इति विन्यस्य पंचांगे॥ षडंगन्यासं कृत्वा ह्वीं ह्रीं तालत्रयं दत्वा॥ द
शदिग्बंधनं कुर्यात्॥ तदुक्तं तत्रैव॥ ॐ महिषमर्द्दिके हुंफट् हृदयाय नमो हृदि॥ ॐ महिषशत्रु विदे हुंफ
ट् शिर उदाहृतं॥ महिषं द्वेषय द्वेषय हुंफट् शिखा मनुस्मृतः॥ महिषं हन हन हुंफट् कवचमितीरितं॥ ॐ म व्यापक
हिषमर्द्दिनी हुंफट् स्त्रोगन्त्य भैरव॥ ततः पूर्ववन्मातृकौ[illegible]न्यासौ कृत्वा कुलेकुसुमादिना वृत्ताष्टदलाष्ट
वर्णयुतं वृत्तचतुरस्र चतुर्द्वार कर्णिकायां बीजात्मकं यंत्रं निर्माय पूर्व्वतः सिंहासने संस्थाप्य तत्राधारश
क्त्यादि पीठदेवताः संपूज्य पूर्ववदर्घ्यस्थापनादिकं कृत्वा देवीं ध्यायेत्तदुक्तं तत्रैव॥ मातृकाव्यापकं कृ
त्वा ताम्रादौ चंदनादिना॥ वृत्ताष्टदलमालिख्य भूपुरं तद्बहिर्लिखेत्॥ पुरतः स्थापयित्वा च पूजयेत्पीठदेवताः॥
पूर्ववदर्घ्यसंस्थाप्य ध्यायेद्देवीं सनातनीं॥ ध्यानं तत्रैव॥ ध्यायेत्कालीं महादैत्ययुद्धरागमसौम्यरवीं॥ दक्षि
णे चक्र खड्गं च बाणं शूलं तथैव च॥ वामे शंखं तथा वर्म धनुस्तर्ज्जनमेव च॥ बिभ्रतीं कालिकां घोरां महिषां
गनिषेदुषीं॥ पीतांबर परीधानां पीनोन्नतपयोधरां॥ जटामुकुटशोभाढ्यां पितृभूमिसुखावहां॥ एवं ध्या
त्वा मानसोपचारैः संपूज्यावाहनादिकं कृत्वा षोडशोपचारैः देवीं संपूज्यांगमंत्रैरंगानि संपूज्य गुरु परम
गुरु परात्पर गुरु परमेष्ठि गुरुंश्च संपूज्य॥ पूर्वाद्यष्टदले ॐ दुर्गायै ॐ वर्णिन्यै ॐ आर्यायै ॐ कनकप्र
भायै॥ ॐ कृत्तिकायै ॐ अभयप्रदायै ॐ कन्यायै ॐ सुररूपायै नमः॥ इति संपूजयेत्॥ तदुक्तं तंत्रांतरे॥ आदौ
दुर्गा ततो वरवर्णिनी मार्य्यका स्मृता॥ कनकप्रभनिका चैव कृत्तिकामभयप्रदां॥ कन्यां चैव सुरूपां च यजेत्पूर्वा
दितः सुधीः॥ कुलचूडामणौ॥ ततआवरणं चैव आदावंगावृत्तिं जयेत्॥ वायव्यादीशपर्यंतं कालिकां कुगु
रुम्यसेत्॥ अशक्तो उपचाराद्यां तान् गुरूंश्च तु रायजेत्॥ कुलसारोक्तं॥ आमाप्याश्च यजेत् दुर्गां भीमायां

वरवर्णिनीं॥रूमाद्यामार्यकांत्वैवएमाद्यांकनकप्रभां॥ऐमाद्यांकृत्तिकांत्वैवओमाद्यामभयप्रदां॥औमा
द्यांचतथाकन्यांसरूपांसर्गपूर्विकां॥कुलचूडामणौ॥अरुणप्रेयजेद्देवींदुर्गांतादीर्घपूर्विका॥दीर्घेणाङ्केन
त्रपारिभाषिकं॥तेनआईउऋएऐओऔअंअः॥ईसरुभीरितिशारदाटीकाकारेणोक्तमिति॥ततोदेव्यादक्षो
र्ध्वहस्ततः॥पत्राग्रेखं॥चक्रासयेखड्गाय॥लंबाणाय॥पंशूलाय॥वामोर्ध्वतः॥शंशंखाय॥खंचर्मणे
संधनुषे॥हंतर्जन्यायनमः॥इत्युक्तेनपूजयेत्॥तदुक्तंतत्रैव॥आयुधानिपत्राग्रेबीजाद्यैर्भिःपरि
पूजयेदिति॥ततोदलबाह्येपूर्ववद्ब्रह्माद्यष्टशक्तीः॥संपूज्यचतुरस्रेपूर्वादिक्रमेणलोकपालां
तद्बहिस्तदस्त्राणिपूजयेत्तदुक्तंकुलचूडामणौ॥ब्रह्माण्याद्याबाह्यदलेलोकपालांस्तुभूगृहे॥
तदस्त्राणिचतद्बाह्येप्रयोगंचसमाचरेत्॥ततःपुनर्देवींसंपूज्ययथाशक्तिजपंकृत्वार्घ्यजलपुष्पा
भ्यांगुह्यातिगुह्यगो[illegible]त्रीतिमंत्रेणदेव्यादक्षिणकरेजपंसमर्प्यस्तुतिंकृत्वाप्रदक्षिणंकृत्वाष्टांगं
प्रणामंविधायदेवींस्वहृदिविसर्जयेत्॥तदुक्तंतत्रैव॥पुनर्देवींप्रपूज्याथजपस्तुत्यादिकंचरेत्॥
विसर्जनेविधिरयंपुरश्चर्यासुसाधकः॥तत्रैवपुरश्चरणजपनियमोयथा॥अष्टलक्षंजपेन्मंत्रंत
द्दशांशंहुनेत्ततः॥तद्दशांशंतर्पणंचतद्दशांशाभिषेचनं॥तद्दशांशंब्रह्मभोज्यमितिसिद्धोभवेन्नर
इति॥अथहोमद्रव्यनियमोयथा॥वन्हौयत्तिलहोमेननरान्वशयतीनृप॥सिद्धार्थजुहुयान्मंत्रीरोगे
मुच्येततत्क्षणात्॥पद्मैर्हुत्वाजयेच्छत्रून्दूर्वाभिःशांतिमाप्नुयात्॥पलाशकुसुमैःपुष्टिंधान्यैर्ध
नश्रीयंव्रजेत्॥काकपक्षैःकृताहोमाद्द्वेषंवितनुतेन्नृणां॥मरीच्योहोमैर्मरणंरिपूणांप्राप्नोतिसर्वथा॥
इत्याभिचारान्नकुर्यादीनध्यात्वादेवींविनाशयेत्॥कुलचूडामणौ॥प्रयोगेहोमनियमःसहस्रंचवसु
संख्यितं॥एतद्विद्यामहाविद्यानदेयायस्यकस्यचित्॥यदिभाग्यवशाल्लब्धाकुलदेवीकुलोत्तमैः॥

श्यामा दीक्षिता कुलजाभिज्ञा सिद्धिदा सैव नान्यथा ॥ अथास्याः स्तुतिः ॥ तदुक्तं कुलचूडामणौ ॥ भैरव उ० ॥
मन्विते वरचंडि चूर्णितदुराचारश्रवं डासुरैस्त्वे रंदारय भीरिदं दुरंदरं द्रोहोर्मि ममापदः ॥ तेनायें निक्षिप
स्तो निरूपम श्रीपादपद्माटवी भ्रांतानंतरसांतरे मममनोहंस स्थिरं नंदतु ॥ हित्वा चंडि हिरण्यदारण
पटुप्रोद्दामदंतांगुलिस्फारत्कं पसुमेरुसोदरशटाटोपं नृसिंहं सुरा ॥ मातस्त्वत्पसुपाद्मापेक्षण पटुश्री
पादसंसेविनं सेवंते कविवैरिणा किमपिभिः भीतिर्भवेत्सेविनः ॥ चंडि त्वद्विषयां तराक्षरपदं श्रोत्रांतरं
न्वेकृतं तत्तत्तत्वं पुरुषप्रकृत्यनुगतं ब्रह्मादिभिगीयते ॥ तस्माद्देवि समस्तदैवतसुधासारैकधामस्फु
रत् श्रीमत्पादपयोजचुंबनपरं मामद्य मा भावय ॥ मन्निंदायदि वा स्तुतिस्त्वत्कुलयथाचाराद्दृढं मास्तु
वा कीर्तिः केशवकौशिकार्चनचरी नैवास्तु मत्सन्निधि ॥ मत्तब्रह्म हरिस्मरारि कुत भुग्दैत्यारि सेवास्य
दश्रीमत्पादपयोजचिंतनविधौ चित्तं सदैवास्तु नः ॥ निर्दिष्टोस्मि यदि त्वदीयपदयुक्पूर्वापराभिभावने
निर्दिष्टस्य तदा ममापि विरलं किं वास्तु सिद्धास्पदं ॥ तस्माद्देवि कृपाभरान्वित तरं श्रीपादपद्मद्वयं मद्वि
चेष्टत्तरसं परं प्रसरतु स्वेमंकरी क्षम्यता ॥ आत्मानं परिरभ्य भूतपतिर प्युन्मादमासादितः स्मारं जीवनर
क्षणे स्वच्छतो नैवाभविष्यत्तनु ॥ दैवाद्विन्युतचंद्रचंद्र नवनप्रागल्भ्यगर्भ श्रवन्माध्वी पूर्णभवस्य देव
कमलाभेदांगना स्वादितः ॥ हाहामातरनादिमोरुजलधिव्याहारविभ्राखिल ब्रह्मानंदरसाभिषेककवि
शस्यांतोत्सवे मातृत्री ॥ युष्माकं सुरवृंदनिर्भरमनस्ता याभि भूतस्समश्रीमङ्कक्तिरसातिदुर्दिनपरी
वाहः सदा सर्पतु ॥ यत्पादः स्फुरदंशुजालजवरांचंद्रांशुकोटि स्खलत्संतध्वांतविसारिनिर्मलचित्ता
दानंदत्रयं दैवतं ॥ सर्गोस्संस्त्रजति स्थितिं वितनुते सं हि पुनर्लुपने श्रोडिन्नांजननीलनीरजमहः श्रितं
सदैवास्तु नः ॥ याशाम्बन्म द्विषषलस्फुरन्मिलकंज द्विधा ससवलङ्कांतः प्रसरंतमस्तमशिरोदसं

न्वितं॥कृत्वादुर्गाष्टमीरात्रौश्मशानेनिक्षिपेत्ततः॥तस्योपरिशवंकृत्वापूजयित्वायथाविधि॥शवासन
गतोवीरोजपेदष्टसहस्रकं॥ततोमात्रेबलिंदत्वाकाष्टमामंत्रयेत्ततः॥स्फेंस्फेंदेउमहाभागयोगिनीत्वद्यात्र
या॥ममहस्तस्थितोनाथममाज्ञांपरिपूरय॥एवमामंत्र्यवेतालयंत्रयंत्रप्रजुरुते॥तंतंचूर्णंविधायाथपुन
र्गाथानिकोशिकः॥गच्छगच्छमहाभागेपादुकेवरवर्णिनी॥मत्पदस्पर्शमात्रेणगहनंशतयोजनं॥अस्त्रोहं
समालोड्यपश्चादंगुलाकृतिं॥खड्गंकृत्वातत्रयंत्रंलिखित्वाप्रजपेन्मनुं॥तत्सहस्रंततोहत्वामहाशव
कलेवरे॥स्थापित्वाजीवरसाग्रेवत्सपुष्टंतुभावयेत्॥कुलाष्टम्यांअर्धरात्रौचिताभस्मसमाहितः॥प्रतिपूर्वं
समामंत्र्यकुनेसितदवनेरततः॥मधुरत्रयसंयुक्तंबिल्वपत्रेणसंयुतं॥पादादिमूर्धपर्यंतहोमांतेबलिमाहरे
त्॥बल्यंतेपरमामायादेवीमहिषमर्दिनी॥आयातिबलिपूर्णास्यावरहस्तामहोन्मुखी॥गृह्णवत्सेति
शोद्धवेखड्गमुत्तोल्यधारयेत्॥घोरदंष्ट्रेमहाकालीविकरालस्वरूपिणी॥क्रांद्रंऊंउरुकल्पानंविपक्षच्छ
दविस्तरं॥एवंमामंत्र्यखड्गंतुमुष्टिन्यक्षिपेन्नरः॥छित्वाछित्वापुनःपिबतागच्छत्याकृष्यतेपुनः॥अष्टम्यां
ष्टमार्जारमेकयातेनयोजयेत्॥कुजेचतुष्पथरात्रौनिखनेन्मंत्रमुत्तमं॥तत्रमोवासमारोप्ययावत्सप्तप्रजाय
ते॥तावद्भुक्त्वाहविष्यान्नंप्रतिरात्रंजपेद्द्विभिः॥अष्टोत्तरसहस्रंतुएकाकीदीपवर्जितः॥उत्पन्नंपत्रमालोक्यपि
त्वानिष्छिद्रमानयेत्॥तत्रभुक्त्वाहविष्याशीतद्दिनेतटिनीतटे॥तदानीयसुहृत्संगःक्षालयेन्मंत्रमुत्तमं॥ चौरन्ने
तस्नातोभिमुखंवत्सयदस्मिन्नत्रनिगच्छति॥तदानीययजेत्तत्रकालिकांघोरदक्षिणां॥अभिमंत्र्यसहस्रंतु
कालीमंत्रेणयत्नतः॥सिद्धांजनोभवेन्मंत्रीनात्रकार्याविचारणा॥चंदनागरुकस्तूरीमिश्रितांचाश्मघर्ष
णी॥कृत्वातिलकमादायसर्वंजयतिसाधकः॥कुलमीनंकुलांतंचकुलमध्येकुलेश्वरि॥कुलस्थानेसमानीय
दत्वादेव्यैप्रयत्नतः॥अष्टोत्तरसहस्रंतुजप्त्वाभूमितलेस्थितः॥भूमौपुत्कारमात्रेणविवरंतत्रजायते॥शतयो

जन्मदूरे वा यत्र साध्यस्थितिर्भवेत्॥ तत्रैवागमनं तस्य पूजनांतः प्रसर्पिणः॥ एवं चिरमध्ये तु गवास्त्रकु
हरेपि वा॥ कायस्थं कोन्यमासाद्य गच्छत्य विकलो नरः॥ दुर्गामंत्रं विना बत्स कालीमंत्रं तथैव च॥ सिध्ययः कु
लनाथेश जायंते नोक थंचन॥ अथ बालकसंस्कारः॥ यथा॥ मधुलाजाभ्यां नालच्छेदात्प्राक् स्वर्णश॥ ला
कयाथ्वेन दूर्वया यज्ञदारुखिखया वा मानवकस्य जिह्वामोष्ठं दक्षिणपाणिना त्रिवारं प्रमार्ज्य तत्संख्याका
रेण पिता मूलमंत्रं विलिख्य देवीं पूजयेत्॥ तदुक्तं मत्स्यसूक्ते॥ अथवा मधुलाजाभ्यां जिह्वायां बालकस्य च
नाडीच्छेदाद्यथापूर्वं लिखेत्स्वर्णशलाकया॥ मूलमंत्रं लिखेन्मंत्री यस्योश्वेन दूर्वया॥ वाक्योच्चारणतो वा
लो वाग्मी इतक विर्भवेत्॥ महोग्रताराकल्पमते तु नैमित्तिकसंस्कारांतरमेव मंत्रलिखनं कार्यं॥ तदुक्तं
महोग्रताराकल्पे॥ जन्मसंस्कारकं नाम पुत्रे जाते प्रशस्यते॥ जिह्वायां तु लिखेन्मंत्रं यज्ञदारुकुशेन वा॥ वा
रत्रयं तु संमार्ज्य दक्षिणेनैव पाणिना॥ मंत्रमुच्चार्य प्रत्येकं पंक्ति कुर्यात्सुशोभनां॥ आदौ संस्कारकर्तव्यस्त
स्तेतो विलिखेन्मनुं॥ गंधचंदनपुष्पैस्तु पूजयेत्तारिणीं शिवां॥ उत्तराभिमुखो भूत्वा स्थापयेत्पीठमुत्तमं॥ पूज
येत्तारिणीं देवीं नानाभक्ष्यैः सुशोभनैः॥ कविर्वाग्मी भवेत्पुत्रः सत्यवादी जितेंद्रियः॥ अत्र तारिणीपदमुपलक्ष
णं देवीमात्रमेव बोद्धव्यं॥ वृहन्नीलक्रमादितंत्रेषु वाक्संस्कारदर्शनात्॥ अथैकादशाहे देवतां संपूज्य मंत्रं
लिखेदिति केचित्॥ यदि पिता दूरस्थो भवति तदा पितृव्यो वा मातुलो वा तां संपूज्य मंत्रं लिखेदिति केचित्॥ तदुक्तं
महोग्रतारातंत्रे॥ पितुर्भ्राता लिखेन्मंत्रं मातुर्भ्राताथवा पुनः॥ पितैव च लिखेन्मंत्रं नान्य एवं कदाचन॥ मा
तुः क्रोडे च संस्थाप्य दर्भेणास्तीर्य यत्नतः॥ शांतिं कुर्याद्बालकस्य ब्राह्मणैः सह साधकः॥ अथ शांतिमंत्रो य
था॥ इमं मंत्रं कामयजेः कामजानां दूरे वीति॥ देवेभ्यः पुरुमानि सर्वमिदं मनि ध्रुवं॥ शिवशांतिस्तारायै केशवे
भ्यस्तारायै॥ नराय शिवयशसे इत्यनेन कुशोदकाभ्यां शांतिं कुर्यात्॥ अथ स्वकुलदीक्षाप्रयोगो लिख्यते॥

तदुक्तं कुलचूडामणौ ॥ निजकांतां समानीय सुशीलां सुयशस्विनीं ॥ कुलभक्तं गुरुं प्रार्थ्य दीक्षयेत्कुलदीक्षया ॥
परानंदरसाघूर्णलोचनां कुलजां सतीं ॥ तांबूलग्रासपूर्णास्यां गुरुरस्याभितः सुधीः ॥ निजपुत्रीवदाचर्य तद्रू
पपट्टके लिखेत् ॥ शक्तिचक्रं त्रिरावृत्त्या लिखेत्कामकलां तथा ॥ तन्मध्ये देवमंत्रेण दर्भितं नामलांछितं ॥ तत्र
देवीं समावाह्य ध्यात्वा देवीं प्रपूज्य च ॥ ततस्तसुत्निकाकर्णे ऋषिच्छंदः समन्वितं ॥ मूलमंत्रं त्रिरावृत्त्या कथितं वा
रंता मकर्णके ॥ अस्य प्रभृति पुत्रीत्वं कुलपूजार्चनेन तथा ॥ अथोपदिष्टविधिना तामरस्य समानय ॥ इत्यनुज्ञां गुरोर्ल
ब्ध्वा प्रणमेद्दंडवद्भुवि ॥ त्राहि नाथ कुलाचार पाद्मतीपदनायक ॥ त्वत्पदांभोरुहच्छायां देहि मूर्ध्नि यशोधनं ॥
गुरवे दक्षिणां दत्वा तांबूलारुणलोचना ॥ पट्टलं परमीकृत्य यथा दृष्टं समाचरेत् ॥ अंगावरणपूजादौ यदि नस्स
मतेकुले ॥ तदा मूर्ध्नि गुरुं ध्यात्वा कुलामृतरसेन तु ॥ तर्पयित्वा कुलं ध्यात्वा जपेन्मंत्रं निराकुलं ॥ इति श्यामा
रहस्ये सप्तदशः परिच्छेदः ॥१७॥ ॥ अथ फलपाकप्रकारो यथा ॥ तदुक्तं भावचूडामणौ ॥
यदि भाग्यवशाद्देवि वीरपत्नी तु लभ्यते ॥ फलपाकं ततः कृत्वा किं न सिध्यति भूतले ॥ फलपाकविधानं च स
र्वेदिव नमस्कृतं कथयामि महादेव न प्रकाश्यं कदाचन ॥ दृष्ट्वा स्पृष्ट्वा कुलं देवदेवगंधर्वकिन्नराः ॥ आयांति फ
लपाकार्थं तस्माद्यत्नाद्विचिंतयेत् ॥ विसर्जनं विधातव्यं गोपनं भावशांतिके ॥ तत्तत्कल्पविधानेन कुलं कु
र्यात्सुशिक्षितं ॥ मातः पतिव्रताधर्मो हि धर्मो न हि जगत्त्रये ॥ पतिः प्राणप्रदो नित्यं पतिरेव परा गतिः ॥ पतिरे
व परब्रह्म पतिः प्राणाधिकः प्रभुः ॥ सर्वतीर्थमयः स्वामी देवदेवमयः पतिः ॥ सर्ववेदमयश्चैव पतिरेव महागु
रुः ॥ आगत्योपविशेत्साध्वी मुखं वीक्ष्य स्थिता भवेत् ॥ पतिभावं गिते दत्त्वा दृष्ट्वा स्पृष्ट्वा पतिदर्शने ॥ उत्तरेणोत्त
रं दद्यात्स्याहरे द्रुतकर्मणी ॥ सर्वदेवमयं हित्वा पतिं परगोचरा ॥ शूकरी गर्दभी काकी शृगाली जायते ध्रुवं ॥
अहं तु पुत्रवद्देवी नात्र भीतिर्न च त्रपा ॥ तव संगे यो हि जातः पतिरूपधरः क्वचित् ॥ मूलमंत्रं जपेत्तो यं तद्रात्रे देयमीश्वरी ॥

ग तदा यदि विहीनं स्यात्तदा स्थापितरेव च ॥ इत्यादि शिक्षया कार्याः शिक्षिताः कुलयोषिताः ॥ रक्षा कार्याः सुप रहस्य
त्नेन पूर्वोक्तेनैव वर्त्मना ॥ योगिनीनां महापूजा बटुकानां च भैरवः ॥ कार्या विघ्नविनाशार्थं कुलजारक्ष्ययोगतः ।
यासां मूलतरोर्मूले मूलविद्यां तु कालिकां ॥ लिखित्वा दोषकालेन ततो विघ्नैर्न लिप्यते ॥ वीरपत्न्या मूलदेशेन
कार्यं मंत्रयोजनं ॥ विसर्जनविधौ देवि यदि दृष्टः फलपातनं ॥ यद्रूपे प्रीतिरेतस्य कुलस्य कुलवित्तमे ॥ तद्रू म
पं विग्रहं कृत्वा भैरवाबटुकादयः ॥ तत्र बीजार्पणं कृत्वा कुर्वंति फलरक्षणं ॥ लिंगैर्वा चेत् परैर्वा देवज्ञाता
फलसमुद्भवं । देवजातं नरैर्जातं यथार्थज्ञानशास्त्रतः ॥ ज्ञात्वा फलविपाकं तु पंच मासरतो भवेत् ॥ सप्त
माष्टममासाद्वा रक्षमध्यसरोवरे ॥ हस्तं दत्वा पादुकाख्यां विद्यां संहारयोगतः ॥ जपेदष्टसहस्रं वै स्व
यं त्रस्ता स निष्यति ॥ एवं कृतेऽपसततितत्फलं दैवनिर्मिते ॥ अस्वाभिकं च पतति वै परित्यागमक्रमात् ॥
एतादृश फलं ज्ञात्वा आनीयं क्षालयेत्ततः ॥ दोषभागं परित्यज्य फलं रक्ष्यं प्रणम्य च ॥ ताम्रपात्रे [illegible]
महावाल्ये फलपाकं समाचरेत् ॥ रक्षादिकं विधायैव बटुत्रयसमन्वितैः ॥ नानासुगंधिसंयुक्ते सिद्धं ज्ञात्वा
विचक्षणः ॥ संस्कृतासनमध्ये तु वाक्या विज्ञापयेत्ततः ॥ धेनुमुद्रामृतीकृत्य होमं कुर्याद्दलक्षतः ॥ रात्रावेवं
विधायैव यज्ञशेषं भुंजेत्ततः ॥ भुक्तमात्रे तु तस्मिन्वै चिरंजीवि शिक्षितो भवेत् ॥ मासा मधुमती तस्य करस्था भोग
दायिनी ॥ दिव्यभावः साधकेंद्रो मर्त्येन्द्राक्ष समो भवेत् ॥ देवानां प्रियवादित्वान्मोक्षं दद्यान्महेश्वरः ॥ साधकानां
कुलज्ञानां न दोषः फलपातने ॥ एतत्फलनिपातार्थं फलप्राशे पदे पदे ॥ विघ्नं करोति सर्वत्र निजसंस्कारकार
णात् ॥ फलरक्षोपरि तथा विघ्नसाम्यं न भुवं ॥ फलरक्षस्पृहा नित्यं कदाचिद्दैवयोगतः ॥ साधको यदि तद्रास्वन्न
ऽस्त्यात्र विकल्पनं ॥ वाचा च मनसा वापि कायाद्वा यदि बाध्यते ॥ फलरक्षस्तदा देवि नश्यति स्मरशासनात् ॥
बाध्यते कुलरक्षश्च साधकस्य हृते शुभो ॥ तावत्सकलपूजास्या यावत्तन्निष्कृतिर्भवेत् ॥ तावन्निजकुलालापो

समालंबते ॥ सादुर्गा भवदुर्गदुर्गतिदुरालंबांतरत्रासिनी हृद्येदैवतवैरिदारणपटुर्जश्याज्जयाल्हा
दिनी ॥ नस्यत्स्वेदरकेचामरा चलरणत्र्यक्षा परस्वर्वा वरस्फायाक्षुल्पशिली मुखेवाग्छल दनस्याजि
स्सतांमांबुधौ ॥ संक्षावात्त विस पिनर्त्तित शिरः साटो पटुस्टासुरस्तुघस्त्वंउ विरवंडिता खिलन्स्राकु
त्तस्सुत्पिपासो ज्वलैः ॥ किंचित्कल्प विरा मकाल कलितांतीत्रोरुसंपात्को माषन्मा हिष तिर्यगानन
शिरःश्रृंगांतरालस्थले ॥ वस्वर्णैवसुपत्रमध्यक लिनेब्राह्म्यागणी मातृभिः सेव्यंचारुवरांगनेरण
भ्रुराघूर्णायमानांस्मरेत् ॥ ऊर्ध्वाधःक्रमसव्यवामकरयोश्चैकंदरंकर्त्तकां खेटंबाणधनुस्त्रीशूल
भयस्तन्मुद्रांदधानांशिवां ॥ श्यामांनीलघनोल्लकंतलचयांप्रोन्नद्धजूटांस्नवद्धीरास्फाललसत्करा
लवदनां घोराट्टहासोद्भयं ॥ एवंयेतवदेवमूर्त्तिमनघांध्यायंतिदुर्गादिभिःत्र्यक्षादैरपिपूजितां परयु
क्तोभास्किं कुर्वते ॥ राज्यंशत्रुजयः सदर्थधिषणा काव्यामृतार्द्धानस्तंभोच्चाटनमारणादिकृति
नातेषांस्वयंजायते ॥ स्तोत्रंतेचरणारविंदयुगलध्यानावधानान्मया मंत्रोध्दारकुलोपचारसचिरंतस्त्रो
पचारंयदि ॥ यस्त्वेवंनिपठंतिदेवितरसा श्रीमोक्षकामोद्या स्वगताभवंतिजगतां मातर्नमस्तेजय ॥
इतिमहिषमर्दिनीस्तुति ॥ अथकवचं ॥ ईश्वर उवाच ॥ शृणुदेविप्रवक्ष्यामि गुह्याद्गुह्यतरंशुभं ॥ कवचंच
महादेव्याः सर्वपापप्रणाशनं ॥ अस्याभ्यर्च्य ऋषिरेतस्यबृहतीछंदइरितं ॥ देवतान्वेसमुद्दिष्टाश्रीमन्म
हिषमर्दिनी ॥ ओं ॥ ऋषिः शीर्षेसदापातु छंदोमुखेसदावतु ॥ ललाटेमर्दिनीपातु महाकाली मुखे
वतु ॥ मोहिनी नासिकायांचनेत्रयुग्मे महांकुशा ॥ खड्गिनी कर्णयुग्मेचत्रिशूलिणिगंडयुग्मके ॥ कंठेमा
हेश्वरीपातु कौमारी बाहुयुग्मके ॥ इंद्राणी कूर्परेपातुवाराहि मणिबंधके ॥ हृदयेनारसिंहीचचामुंडा
हृदयेवतु ॥ चंडिकानाभिदेशेचसंकरा पातुलिंगके ॥ उत्कटाउरुदेशेचविकटाजंघयुग्मके ॥ उदंड

पादद्वे स्रोञ्च भद्रा तल प्रदेस्तके॥ उद्ध्वे केशादे स्रोञ्च संहारी काञ्चरो मसु॥ सर्वांगे सर्वदा पातु श्रीमन्म रहस्य
हिष मर्दिनी॥ इति दंकवचं देवि त्रिषु लोकेषु दुर्लभं॥ नयस्नेहान्म या ख्यातं नाख्येयं यस्य कस्यचित्॥
रूपणाय नाभक्तकाय निंदकाय विशेषतः॥ यदि दद्यान्निषिद्धेषु तदाहं वधकारिणी॥ दद्याच्छिष्याय
भक्ताय गुरुभक्तियुताय च॥ त्रिसंध्यमेकसंध्यं वा यः पठेत्प्रयतात्मवान्॥ सर्वान्स लभते कामानं नेदे
वी पुरं यजेत्॥ धारयेद्वा शिरः कंठे बाहौ वा यदि साधकः॥ तदा सर्वार्थसिद्धिः स्यान्नात्र कार्या विचार
णा॥ भूतप्रेतपिशाचानां न भयं तस्य विद्यते॥ जले वा चानले वापि श्मशाने दुर्गमे गिरौ॥ न भयं जा
यते तस्य सिद्धिर्भवति निश्चितं॥ इति भैरवतंत्रोक्तं कवचं॥ इति त्रयोदशः परिच्छेदः॥१३॥ ॥
अथ नीलक्रमः॥ तदुक्तं नीलतंत्रे॥ देव्युवाच॥ महानीलक्रमं देव सूचितं न प्रकाशितं कथय स्व महा
देव सर्वसिद्धिप्रदं महत्॥ भैरव उ०॥ सर्वसिद्धिप्रदं साक्षात्सर्वदेवनमस्कृतं॥ सर्वपापहरं दिव्यं सर्व
रोगविनाशनं॥ ब्रह्मविष्णुशिवादीनां दिग्पालानां भाविनि॥ भैरवाणां च सर्वेषां गंधर्वाणां योगिनां॥
शीघ्रसिद्धिप्रदं देवि सर्वेषामालयं महत्॥ नान्यसिद्धिप्रदं देवि वीरसाधनवर्जितं॥ महाबलो महा
बुद्धिर्महासाहसिकः शुचिः॥ महास्वच्छस्वार्थ्यावांश्च सर्वभूतहिते रताः॥ तेषां रुते महादेवी कथि
तं नीलसाधनं॥ अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि॥ कृष्णपक्षे विशेषेण साधयेद्वन्त्याहि
तं॥ भौमवारे त[redacted]मिश्रायां यामे यातेञ्च भाविनि॥ विहितन्यावमाह॥ भावचूडामणौ॥ यष्टिवि
द्धं मूलविध्वंसवज्रं विद्धपयोमृतं॥ रज्जुविध्वंससर्पदंष्ट्रं चांडालं चाभिभूतकं॥ तरुणं सुंदरं शूरं रणे
नष्टं समुज्वलं पालयेन विमुख्यं संमुखे रणवर्जितं॥ एवं शवं समानीय साधयेत्साधकोत्त
मः॥ वीरतंत्रे॥ यष्टिप्रभस्य सुभिन्नं मुलविद्धपयोमृतं॥ शवमानीय कर्त्तव्यं नाहरेत्स्वेच्छया मृतं॥

ऊर्ध्वं षड्वर्षा घट्टि वा वरां गं तरुणं यदि॥ सप्तमाष्टममासीय गर्भजं यदि वा शवं॥ चांडाला चभिभूतं
वा सीघ्रसिद्धिफलप्रदं॥ सर्वेषां जीवहीनानां जंतूनां वीरसाधने॥ महाशवाः प्रशस्तास्युर्महामंत्रस्य साधने॥
क्षुद्राः प्रयोगकर्तृणां सर्वेषां विहितास्सदा॥ वर्ज्यश्च॥ ब्राह्मणं गोमयं त्यक्त्वा साधयेद्वीरसाधनं॥ वीरतंत्रे॥
स्त्रीवैश्यपतितास्पृश्या मध्यवर्ज्या हतं नरं॥ अव्यक्तं लिंगकं कुष्ठं त्यक्त्वा दत्तरं दावमाहरेत्॥ भावचूडामणौ॥ स्वधर्म
तं द्विवर्षं च वृद्धं स्त्रियं द्विजं तथा॥ आस्त्राभावमृतं कुष्ठं सप्तरात्रोर्ध्वकं तथा॥ एवं चाष्टशवं त्यक्त्वा पूर्वोक्तं श
वमाहरेत्॥ स्थानमाह वीरतंत्रे॥ शून्यागारे नदीतीरे पर्वते विजने च वा॥ बिल्वमूले श्मशाने वा तत्समीप
रणस्थले॥ चितासाधने लक्षणमाह॥ नीलतंत्रे॥ असंस्कृता चिता ग्रस्ता नव संस्कार संस्कृता॥ प्रक्षालि
ता यदि भवेत्कारयेद् शिष्यसंचयं॥ चांडालादिषु संप्राप्ते केवलं शीघ्रसिद्धिदा॥ तत्रैव प्रकारमाह॥ या
माभ्यामं तरे सम्यपूजोपकरणं बलिं॥ सामिषान्नं गुडं छागं सुरापिष्टकपायसं॥ नानाफलं च नैवेद्यं स्व
स्वकल्पोक्त साधितं॥ चितास्थाने समानीय मरुद्भिः शस्त्रपाणिभिः॥ समानगुणसंपन्नैः साधको वीत
भिः स्वयं॥ पुनर्द्वारश्चतुर्दिक्षु देवताध्यानतत्परः॥ भीतश्चेत्साधकस्तत्र चतुर्दिक्षु च साधकाः॥ नोचेत्स्व
यं केवलो सोभे स्वः परिकीर्तिताः॥ वस्त्रालंकारभूषाद्यैर्भूषितः पूर्वसंमुखः॥ अस्त्रांत मूलमंत्रेण प्रोक्ष
णं यागभूमिषु॥ गुरुपादरजो ध्यात्वा गणेशं बटुकं तथा॥ योगिनीर्मातृकाश्चैव वामपादपुरःसरः॥ ये चात्र
संस्थिता दैत्या राक्षसाश्च भयानकाः॥ पिशाचा सिद्धयक्षाश्च गंधर्वाप्सरसां गणाः॥ योगिन्यो मातरो भूताः
सर्वाश्च खेचरस्त्रियः॥ सिद्धिदास्ता भवंत्वत्र तथा च मम रक्षकाः॥ प्रणम्य मनुनानेन पुष्पांजलित्रयं क्षि
पेत्॥ पूर्वादिदिक्चतुष्के च बलिं दद्याद्यथाविधिः॥ श्मशानाधिपतिं पश्चाद्रुरुं कालभैरवं॥ महाकालं
यजेच्च पूर्वादिदिक्चतुष्टये॥ पाद्यादिभिश्च मंत्रज्ञो बलिं पश्चान्निवेदयेत्॥ बाह्यबीजं ततः पश्चात्

श्यामा

श्मशानाधिपइत्यपि॥ इम मंत्रेसाभिधानंबलिंगृण्हइदंततः॥ गृण्ह गृण्ह पयइंद्रं विघ्ननिवारणंततः र
कुरुसिद्धिमतोमेतंत्रयपुरस्ताद्यान्वितं॥ प्रणवाद्येनमनुनाप्रथमोबलिरीरितः॥ मायांतभैरवानश्मशा
नंयानकततःपरं॥ पूर्ववद्बलिमुध्धृत्यदक्षिणेबलिमाहरेत्॥ इमंत्रेचमहाकालायसृष्यासूर्ववदुध्धरेत्॥ प
श्रीमकालदेवायप्रणवाद्येनकल्पयेत्॥ शाह्लांतकालदाह्लांतेभैरवेतिततःपरं॥ श्मशानाधिपइत्येवंपूर्व
वच्चनदुध्धरेत्॥ चितामध्येततोदद्याद्बलित्रयमनुत्तमं॥ कालरात्रिर्महाकालीकालिकेघोरनिस्वने॥ गृ
हाणेमंबलिंमातर्देहिसिध्धिमनुत्तमां॥ कालिकायैबलिंदत्वाभूतनाथायदापयेत्॥ शाह्लांतेभूतनाथांते
श्मशानाधिपइत्यपि॥ प्रणवाद्येनमनुनादापयेद्बलिमुत्तमं॥ हुंमुद्दांतेसर्वगणनाथांतेत्वाधिपेतिच॥
श्मशानमस्तकेदत्वापूर्ववच्चसमुध्धरेत्॥ ताराद्येनबलिंदत्वापंचगव्येनसुंदरी॥ अद्भिःसंप्रोक्षणंकृत्वा
पीठंचरक्तेलिखेत्ततः॥ भूर्जेवावटपत्रेवातत्रपीठमनुंन्यसेत्॥ पीठमास्तीर्यतस्मिन्वैबध्धवीरासनस्ततः॥
वीरार्द्दनेनमनुनारक्षांदिक्षुप्रकल्पयेत्॥ कूर्चयुगंततोदेवीमायायुगंततःपरं॥ कालिकेघोरदंष्ट्रेप्रच
चंडेचंडनायिके॥ दानवान्दारयेत्युक्त्वाहनेतिद्वितयंततः॥ शवशरीरमहाविघ्नंछेदयद्वितयंततः॥ द्वि
ठांतोवर्मशस्त्रांतोवीरार्दनमनुर्मतः॥ अनेनमंत्रितंलोष्ठंदशदिक्षुविनिक्षिपेत्॥ तन्मध्येभैरवोदेवनवि
घ्नैःपरिभूयते॥ यदिप्रमादाद्देवेशिसाधकोभयविह्वलः॥ ततस्तैःस्तैःसुदृढैर्गैरक्षितानाभिभूयते॥ अ
कैतुसितवाग्वालतुलैर्निर्मितवर्त्तिकां॥ प्रदीपंतत्रसंस्थाप्यअस्त्रेणतत्रप्रपूजयेत्॥ हेतेतस्मिन्महादीपेवि
घ्नैश्चपरिभूयते॥ तदर्थमस्त्रमंत्रेणनिखनेत्कुलदीपकं॥ तत्तत्कल्पविधानेनभूतशुध्ध्यादिकंचरेत्॥
षोढांवातारकांवापिविन्यस्यपूजयेत्ततः॥ मंत्रध्यानपरोभूत्वाजपेन्मंत्रमनन्यधीः॥ एकाक्षरीयदिभवे
द्दिक्सहस्रंजपेच्चततः॥ ञ्यक्षरेचाष्टसाहस्रंत्र्यक्षरेत्वयुतार्ध्धकं॥ अतःपरंतुमंत्रज्ञोगजांतकसहस्रके॥

चैं निऋण्यां तु समारभ्य उदयांतं समारभेत्॥ अन्यत्रापि॥ ततः पंचोपचारेण पुरतो देवतां यजेत्॥ निमील्य
चक्षुषी पश्चाद्देवं ध्यायन्मनुं जपेत्॥ यद्यसह्यं भयं कर्णौ नेत्रे वस्त्रेण बंधयेत्॥ ततोऽर्द्धरात्रिपर्यंतं यदि किं
चिन्नरलभ्यते॥ जयदुर्गामनुनार्घ्यं तेनैव सर्षपान् क्षिपेत्॥ अथ जयदुर्गामंत्रो यथा॥ तदुक्तं मत्स्यसूक्ते॥
तारो दुर्गे युगं रक्ष ततो ठांतसलोचनं॥ द्विठांतो जयदुर्गायं विद्या वेद्याष्टाक्षरी॥ ओं तिलोसि सोमदेव
त्यो गोसवस्तक्षिकारकः॥ पितॄणां स्वर्गदाता त्वं मर्त्यानां मम रक्षकः॥ भूतप्रेतपिशाचानां विघ्नेषु शांतिकारकः॥
इति क्षिप्त्वा तिलानात्मचतुर्भागे शिवादितः॥ ततः सप्तपदं गत्वा पुनस्तत्रैव संविशेत्॥ एवं तत्रापि संपूज्य
प्रजपेन्मनुमुत्तमं॥ यदा बलिं प्रार्थयति नरं कुंजरमेव वा॥ दिनांतरे तदा स्यामि स्वीकृत्य स्वगृहं व्रजेत्॥ प
रेऽह्नि च ततो स्यात् पिष्टेन नरकुंजरान्॥ पिष्टेनेति यवाद्यन्यधान्यचूर्णेनेत्यर्थः॥ तदुक्तं तंत्रांतरे॥ यवक्षोदम
यं वापि शालिक्षोदमयं च वा॥ चंद्रहासेन विधिवत्तत्तन्मंत्रेण घातयेत्॥ चंद्रहासेनेति अर्धचंद्राकृतिना खड्
गेनेत्यर्थः॥ नीलतंत्रेपि॥ जपादौ च बलिं दद्यात् पश्चादपि बलिं हरेत्॥ जपांते जपमध्ये वा देहि देहीति भाषिते॥
तदापि च बलिं दद्यान्महिषं छगलं च वा॥ नरदृष्टीक्षणं किंचिन्न स्वं भुक्तमागमः॥ जलादिदुर्गसर्पाणां
गजानां दर्शनं तथा॥ पक्षिकीटपिशाचानां यत्र द्यामनसंस्थितं॥ तत्सर्वं स्वप्नवद्बुध्वा तु भयं सर्वत्र वर्जये
त्॥ समाप्य साधनं देवि दक्षिणां विभवावधि॥ गुरवे गुरुपुत्राय तत्पत्न्यै वा प्रदापयेत्॥ सम्यक्सिद्धैकमंत्रस्य
नासाध्यं विद्यते क्वचित्॥ बहुमंत्रवतः पुंसः का कथा शिव एव सः॥ इति॥ ॥ अथ श्मशानसाधनविशेषो
यथा॥ तदुक्तं कुलसंभारे॥ श्मशानालयमागत्य मुक्तकेशो दिगंबरः॥ जपेदयुतसंख्यं तु सर्वकामार्थसिद्ध
ये॥ तत्रैव प्रेतमावास्य जपेन्मंत्रविन्नरः॥ अयुतं मैथुनी भूत्वा विभिः सत्यपरायणः॥ संप्राप्नोति परां सिद्धिं
देवैरपि सुदुर्लभां॥ आकर्षणं वशीकारं मारणोच्चाटनादिकं॥ स्तंभनं मोहनं चैव द्रावणं त्रासनं तथा॥ वा

श्यामा

उन्नीलं च धनीलं च बहुपुत्रत्वमेव च ॥ सयाति खेचरत्वं च देवत्वमपि चैव हि ॥ न जरा न च मृत्युश्च न रोगो
न च घातनं ॥ न भीतिर्न मनुष्यत्वं न च चाक्रकायपातने ॥ अथवा सभवेन्निवसं चतुर्विंशतिसिद्धियुक् ॥ स्व
स्वदेहरुधिराक्तैश्च बिल्वपत्रैः सहस्रशः ॥ श्मशानेभ्यर्च्य देवीं तु वागीशासमतां व्रजेत् ॥ कालीतंत्रेपि ॥
महाचीनक्रमलता मज्जाभिर्बिल्वपत्रकं ॥ सहस्रं देवि मभ्यर्च्य श्मशाने साधकोत्तमः ॥ तदा राज्यमवा
प्नोति यदि सा न पलायते ॥ अनाहूतं तथा दृष्ट्वा लक्षं जपति भूमिपः ॥ निर्भयां च तदा दृष्ट्वा वक्र्यार्थमयुतं
जपेत् ॥ अनाहूतं ऋतुमती ॥ भैरवतंत्रेपि ॥ श्मशाने योषितं मंत्री संपूज्य ऋतुगां शुभां ॥ रक्तचंदनलि
प्तांगीं रक्तवस्त्रैरलंकृतां ॥ तावत्सुष्टैर्मनुं प्रोच्य ततो ध्यायेच्च चंडिकां ॥ रमित्वा तां लभेद्राज्यं यदि सा न भ
यायते ॥ मेषमाहिषरक्तेन वाग्मीत्वं तस्य जायते ॥ धनित्वं जायते तस्य सर्वसिद्धिश्च जायते ॥ वत्सरात्स भ
वेज्जीवो धनेन धनदाधिपः ॥ आढ्यो यां देवराजोसौ रूपेणैव मनोभवः ॥ बलेन पवनो ह्येष सर्वतत्वार्थसाध
कः ॥ साधितं श्रोणितं द्यात्सास्थिमांसं सदा बलिः ॥ सनखं वच्छिन्नजीर्णं च केशां संमार्जनोगतं ॥ निवेदयेत्स्म
शाने तु सर्वसिद्धिप्रदं भवेत् ॥ नारीं रक्तयुतां कृत्वा पर्णानां शतमुत्तमं ॥ प्रत्येकं प्रजपेन्मंत्रं ततस्तं मोहयेद्ध्रुवं ॥
युगानामयुतं देवी दक्षिणापूजिता भवेत् ॥ सर्वसिद्धिर्भवेत्तस्य वाग्मी धीरश्च जायते ॥ न तस्य दुर्लभं किंचि
त्पृथिव्यां दिवि विद्यते ॥ कुलसंभारेण ॥ रेतोयुक्तेन पत्रेण चार्कस्येव सहस्रशः ॥ श्मशानेभ्यर्च्य कालीं तु स
र्वसिद्धिं समिंदति ॥ धनवान्बलवान्वाग्मी सर्वयोषित्प्रियः सुखी ॥ जायते नात्र संदेहो महाकालवचो यथा ॥
श्मशाने योषितां वीर्यैर्मंत्रैरर्च्य सहस्रशः ॥ रक्तचंदनलिप्तांगीं रक्तपुष्पैरलंकृतां ॥ तावत्सुष्टैर्मनुं प्रोच्य
ततो ध्यायेत्तु कालिकां ॥ ततो गत्वा लभेद्राज्यं यदि सा न भयायते ॥ श्मशाने निलये चैव शून्यावासनगतः पुनः ॥ अ
सकृच्च जपेन्मंत्रं सर्वसिद्धिप्रदो भवेत् ॥ तर्पयेच्च शवास्ये तु रक्तमांसादिभिस्तथा ॥ त्रिभिर्मंत्रमुदीर्यैवं सर्व

सिद्धिर्भवेत्ततः॥ तर्पयेच्चापयोभिश्च रक्तधारायुतैरपि॥ रतोभिश्च तथा तद्वत्स्वकीयेन कचेन च॥ मै
थुनार्पितयोषायाः कुलप्रक्षालनेन च॥ मेषमाहिषरक्तेन नररक्तेन चैव हि॥ मूषमाश्विरक्तेन वागीतं
तस्य जायते॥ धनित्वं जायते तस्य सर्वसिद्धिश्च जायते॥ वयसा सम्भवेज्जीवो धनेन च धनाधिपः॥ ॥
अथ शवसाधनं॥ तदुक्तं भावचूडामणौ॥ सर्वसिद्धिप्रदं साक्षात्सर्वदेवनमस्कृतं॥ सर्वपापहरं चैव स
र्वरोगविनाशनं॥ नान्यत्सिद्धिप्रदं देवि वीरसाधनवर्जितं॥ महाबलो महाबुद्धिर्महासाहसिकः कविः॥
महास्वच्छो दयालुश्च सर्वभूतहिते रतः॥ तेषां कृते महादेवि नीलसाधनमुत्तमं॥ वृहत्श्रीक्रमसंहिताया
मपि॥ नास्मात्परतरं किंचित्सत्वरं सिद्धिदायकं॥ सर्वसिद्धिर्भवत्येव अहोरात्रात्कलौ युगे॥ द्वापरे त्व
मासेन त्रेतायां त्वायनेन च॥ कृते च दशभिर्वर्षैः सर्वसिद्धिर्न संशयः॥ अष्टम्यां वा चतुर्दश्यां कुजवारे वा
प्रथमप्रहराभ्यन्तरे वा गुरुं देवीं च नत्वा वीरवेशो यात्रां कुर्यात्॥ तदुक्तं तंत्रान्तरे॥ घटीबंधनवस्त्रेण च मू
लेन परिधाय च॥ तद्वक्षस्त्वपुनर्वस्त्रं मूलेनांगविलेपनं॥ कृताष्टमीप्रश्च मूलेन॥ सिंदूरेणार्धपुंड्रकः॥ इष्ट
देवं गुरुं नत्वा यात्राप्रहरमध्यतः॥ कार्यान्यसाधकैः सार्धं वीरमंत्रपरामृषन्॥ अस्तुभो मुक्तकेशी च
भोज्यस्तु यदि स्याद्धीरसाधकः॥ दिव्यो वा न पशुस्तत्र भुक्त्वा साधनमाचरेत्॥ अथ साधनस्थानं॥
तदुक्तं भावचूडामणौ॥ शून्यागारे नदीतीरे पर्वते निर्जने तथा॥ बिल्वश्मशाने वा तत्समीपरणस्थले॥
अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि॥ भौमवारे तमिस्रायां साधयेत्सिद्धिमुत्तमां॥ उपचारसमा
दाय कुलाम्रतरसं तथा॥ गुडार्द्रकरसेनैव सुरा तु ब्राह्मणस्य च॥ गौडी या क्षत्रियेण माध्वी वैश्येन
तत्र वै॥ कदलीमधुसंमिश्रं शालत्वक्करसैः सुरा॥ सर्वं शूद्रस्य संप्रोक्तं यत्र वा तत्र शुद्धिर्भवेत्॥ गृहीत्वा त
त्र दातव्यं सर्वे नैव च संस्पृशेत्॥ अन्यत्रापि द्विजानां मंत्रकल्पं तु न साक्षाच्च विकल्पितं॥ अनुकल्पं तु

[illegible]

यद्वा परयुग॥ पूजनीया कुलादिवकवलरा । सर्वश्च ततः॥ कुलामृतस्य॥ सौत्रामण्यां कुलस्य रक्षाहरणम्
पिबेत्सुरां॥ अन्यत्र कामतः पीत्वा प्रायश्चित्ती भवेन्नरः॥ माषभक्तं च बल्यर्थं धूपदीपादिकं तथा॥ तिलाः
कुस्माः सर्षपाश्च स्थापनीयाः प्रयत्नतः॥ अथ पूर्वोक्तान्यतमस्थले गत्वा सामान्यार्घ्यं विधाय पूर्वमुखो
मूलांते फट्कारं दत्वा यागभूमिं प्रोक्ष्य गुरुगणेशवटुकयोगिनीश्चतुर्दिक्षु पूर्वादितः संपूज्य पूर्वोक्तवी
रार्दनमंत्रं भूमौ विलिख्य ये चात्रेत्यादि पूर्वोक्तक्रमेण भूमौ पुष्पांजलित्रयं दत्वा प्रणम्य श्मशानाधिपतिभ्यः
पूर्ववद्बलिं दत्वा अघोरमंत्रेण शिखाबंधनं विधाय सुदर्शनमंत्रेण आत्मानं रक्षयित्वा दिग्बंधं दत्वा रक्षां
विधाय पूर्वोक्तक्रमेण भूतशुद्धिप्राणायामन्यासजालं विधाय जयदुर्गामंत्रेण दिक्षु सर्षपविकिरणं
कृत्वा तिलोसीत्यादि पूर्वोक्ततिलान्विकीर्य विहितश्रावसमीपं गच्छेत्तदुक्तं तंत्रांतरे॥ गुरुपूर्वादिकं सर्वं
पूर्वोक्तमतमाचरेत्॥ वीरार्दनकृते भूमौ मायामोहो न विद्यते॥ ये चात्रेत्यादिमंत्रेण भूमौ पुष्पांजलिं क्षिपे
त्॥ श्मशानाधिपतीनां तु पूर्ववद्बलिमाहरेत्॥ अघोराख्येन मनुना शिखाबंधनमाचरेत्॥ सुदर्शनेन
वा रक्षामुभाभ्यां वा प्रकल्पयेत्॥ माया स्फुरद्वयं भूयः प्रस्फुरद्वितयं पुनः॥ घोरघोरतरेत्येतत्तनुरूप
पदं ततः॥ चटयुगं तदंते च प्रचटद्वितयं पुनः॥ कहयुगं च मद्वंद्वं ततो बंधयुगं पुनः॥ घातयद्वितयं व
र्मफडंतः समुद्धृतः॥ एकपंचाशदर्णोयमघोरास्त्रमयो मनुः॥ हलाहलसमुत्थस्य सहस्रारस्वरू
पकं॥ वर्मास्त्रांतो महामंत्रः सुदर्शन उदीरितः॥ भूतशुद्धिं ततः कृत्वा न्यासजालं प्रविन्यसेत्॥ जयदु
र्गाख्यमंत्रेण सर्षपान्दिक्षु निक्षिपेत्॥ अथ विहितशवो यथा तदुक्तं भावचूडामणौ॥ यच्छिविधं

था॥तदुक्तं तत्रैव॥स्वच्छं मृतं [illegible]
था॥एवंचाष्टशवं त्यक्त्वा पूर्वोक्तान्यतमं शवं॥गृहीत्वा मूलमंत्रेण पूजास्थाने समानयेत्॥वीर
तंत्रेप्य॥चंडालं चाभिभूतं च सीघ्र सिद्धिफलप्रदं॥कालितंत्रेपि॥बालं तरुणं गामं त्यक्त्वा साधये
द्वीरसाधनं॥अथ शवसमीपं गत्वा ओं फडिति शवमभ्युक्ष्य ओं हुं मृतकाय नमः॥इति शवो
परि पुष्पांजलित्रयं दत्वा स्पर्शपूर्वकं शवं वक्ष्यमाणं मंत्रेण प्रणमेत्॥तदुक्तं भावचूडामणौ॥प्र
णवाद्यस्य मंत्रेण शवस्य प्रोक्षणं चरेत्॥प्रणवं कूर्चबीजं च मृतकाय नमश्च फट्॥पुष्पांजलित्र
यं दत्वा प्रणमेत्स्पर्शपूर्वकं॥वीर परमानंद शिवानंद कुलेश्वर॥आनंदभैरवाकार देवीपर्यंकशं
कर॥वीरोहं त्वां प्रपद्यामि उत्तिष्ठ चंडिकार्चने॥प्रणम्यानेन मंत्रेण क्षालयेत्तदनंतरं॥अथ सुगं
धिजलेन शवं स्नाप्य वाससा जलमुत्तोल्य धूपैर्धूपितं कृत्वा गंधचंदनादिना शवं प्रविलिप्य त
त्कटिदेशे धृत्वा पूजास्थाने समानीय॥समानयेत्॥तदुक्तं नीलतंत्रे॥तारं शाद्यं मृतकाय नमोंतं
मंत्रमुच्चरेत्॥शवस्नापनमंत्रोयं शवासनमनुस्तथा॥मंत्रांते भुवनेशी स्यात् फडंतो मंत्र ईरितः॥
मंत्रांते मूलमंत्रांते आभ्यां संस्नाप्य संस्थाप्य धूपादिकं ततो ददेत्॥भावचूडामणौ॥धूपेन धू
पितं कृत्वा गंधादिना प्रलिप्य च॥एकान्ते परिवेश्याथ स्थापयेत्कुलसाधकः॥ततः कुशशय्यामुपस्थ
ल पूर्वशिरः कृत्वा शवं स्थापयेत्॥तदुक्तं तत्रैव॥कुशशय्योपरि स्थाप्य तत्र संस्थापयेच्छवं॥एलालवं
गकर्पूरजातीखदिरसार्द्रकैः॥तांबूलं तन्मुखे दत्वा शवं कुर्यादधोमुखं॥स्थापयित्वा तस्य पृष्ठे चंदने

नविलेपयेत्॥ बाहुमूलादिकं यंत्रं चतुरस्रं विभाव्य च॥ मध्ये पद्मं चतुर्द्वारं दलाष्टकसमन्वितं॥ त रहस्य
त्रैलोक्यमाजिनं कमलो तारितं न्यसेत्॥ तंत्रांतरे च॥ गत्वा शिवस्य सान्निध्यं धारयेत्काष्ठदेवतास्ततः॥ यद्यु
पद्रावयेत्तत्र दद्यान्निष्ठीवनं शिवे॥ पुनः प्रक्षालनं कृत्वा जपस्थाने समानयेत्॥ ततो द्वादशांगुलयज्ञ
काष्ठानि दशदिक्षु संस्थाप्य तत्र क्रमेणेंद्रादिदशदेवताः संपूज्याभिषान्नबलिं दद्यात्॥ तदुक्तं तंत्रांतरे।
द्वादशांगुलमानानि यज्ञकाष्ठानि दिक्षु च॥ संस्थाप्य पूजयेत्तत्र इंद्रादि दशदेवताः॥ विषमिंद्राय संलि
ख्य सुराधिपतये नमः॥ इमं बलिं गृह्ण युग्मं गृह्णापय युग्मं ततः॥ विघ्ननिवारणं कृत्वा सिद्धिं प्रयच्छ हृद्यं बने अ
नमनुना पूर्वं बलिं दद्यात्स्वसाभिषं॥ स्वस्वनामादिकं कृत्वा पूर्ववद्बलिमाहरेत्॥ सर्वेषां लोकपालानां ततः
साधकसत्तमः॥ तत्रायं क्रमः॥ ऐंस्रां इंद्राय सुराधिपतये ऐरावतवाहनाय वज्रहस्ताय शक्तिपारिषदाय
सपरिवाराय नम इति संपूज्य बलिं दद्यात्तथा॥ ॐ इंद्राय सुराधिपतये इमं बलिं गृह्ण गृह्ण गृह्णापय गृह्णा
पय विघ्ननिवारणं कृत्वा सिद्धिं प्रयच्छ स्वाहा॥ एष बलिरिंद्राय नमः॥ ऐंस्रां वह्नये तेजोधिपतये मेषवाधि
रूढाय शक्तिहस्ताय देवीपारिषदाय इत्यादि पूर्ववत्संपूज्य बलिं दद्यात्॥ ओं वह्नये तेजोधिपतये इममित्या
दि पूर्ववत्॥ ऐंस्रां यमाय प्रेताधिपतये महिषवाहनाय दंडहस्ताय देवीपारीषदाय नमः इति संपूज्य बलिं
दद्यात् ओं यमाय प्रेताधिपतय इति इममित्यादि पूर्ववत्॥ ऐंस्रां निर्ऋतये रक्षोधिपतये खड्गहस्ताय श्व
वाहनाय देवीपारिषदाय नम इति पूर्ववत्॥ ओं निर्ऋतये रक्षोधिपतये इममित्यादि पूर्ववत्॥ ऐंस्रां वरुणा
य पाशहस्ताय जलाधिपतये मकरवाहनाय देवीपा[illegible] पूर्ववत्॥ ओं [illegible]
[illegible]
[illegible]

[illegible] पूर्ववत्॥ओं [illegible] ॥ ऐंद्र्यां [illegible]
धिपतये [illegible] हस्ताय [illegible] वाहनाय देवीपार्षदायेत्यादि पूर्ववत्॥ओं ईशानाय भूताधिपतये इमं मित्या

ब्रह्मण दिपूर्ववत्॥इंद्रेशानयोर्मध्ये ऊर्ध्वलोकाधिपतये हंसवाहनाय पद्महस्ताय देवीपार्षदायेत्यादि पूर्व
वत्॥ओं ब्रह्मणे लोकाधिपतये इमं मित्यादि पूर्ववत्॥ निर्ऋतिवरुणयोर्मध्ये एसां अनंताय नागाधिप
तये चक्रहस्ताय गरुडवाहनाय देवीपार्षदायेत्यादि पूर्ववत्॥ओं अनंताय नागाधिपतये इमं मित्या
दि पूर्ववत्॥ तंत्रांतरे च॥ शवाधिष्ठातृदेवेभ्यो बलिं च सुरयासह॥ चतुःषष्ठीयोगिनीभ्यो डाकिनीभ्यो
बलिं दिशेत्॥ अथ पूजासामग्रीं समीपे दूरे चोत्तरसाधकं॥ संस्थाप्य मूलांते ह्रीं फट् शवासनाय नमः।
इत्यासनं संपूज्य मूलमुच्चरन्॥ अश्वारोहणक्रमेण शवोपर्युपविश्य तस्य पादतले कुशान्दत्वा शवके
शान्प्रमार्ज्य जुटिकां बध्वा॥ गुरुं गणपतिं देवीं नमस्कृत्य प्राणायामषडंगन्यासौ कृत्वा पूर्वोक्तवीरार्द
न मनुना द्वादिक्षु लोष्टानि निःक्षिपेत्॥ ततः संकल्पं कुर्यात्॥ तदुक्तं भावचूडामणौ॥ पूजाद्रव्यं संनि
धौ च दूरे चोत्तरसाधकं॥ समानगुणसंपन्नं मांत्रिकं विजितेंद्रियं॥ अभिषेकविधिं ज्ञात्वा दिव्यवीर
स्य विशारदं॥ संस्थाप्यासनमभ्यर्च्य मंत्रांते परां ततः॥ परां ह्रीं॥ फडित्यनेन मंत्रेण तत्राश्वारोहणं
विशेत्॥ कुशान्पादतले दत्वा शवकेशान्प्रमार्ज्य च॥ दृढं निबध्य जुटिकां कृत्वा संकल्पं साधकः॥
शवोपरि समारुह्य गुरुपूजादिकं चरेत्॥ प्राणायामं विधायाथ दिक्षु लोष्टानि निक्षिपेत्॥ ततः स्व
वामतः शवसमीपे अर्घ्यपात्रादिकं संस्थाप्य शवजुटिकायां पीठपूजादिकं कृत्वा षोडशोपचारैः
देवीं संपूज्य शवे मुखे कारणेन देवीं त्रिः संतर्पयेत्॥ तदुक्तं भावचूडामणौ॥ तत्र देवीं सुसंपूज्य उप
चारैः सुविस्तरैः॥ नीलतंत्रेपि॥ शवास्य विधिवद्विद्वत्ताम्बूलार्पणं चरेत्॥ ततः शवादुत्थाय तस्य संमुख

श्यामा गत्वा वक्ष्यमाण मंत्रं पठेत्॥ तदुक्तं भावचूडामणौ॥ उत्थाय संमुखे स्थित्वा पठेद्भक्तिपरायणः॥ वशी
मे भव देवेश ममामुक पदं ततः॥ सिद्धिं देहि महाभागवीर सिद्धिं कुरुष्व वर॥ ततो मूलमंत्रं पठन्॥ पट्टसूत्रेण
शवपादद्वयं दृढं निरुध्य वक्ष्यमाणमंत्रेण रक्तचंदनादिना त्रिकोणयंत्रं लिखेत्॥ तदुक्तं उत्तरतंत्रे॥ मूलं
समुच्चरन् मंत्री शवपादद्वयं ततः॥ पट्टसूत्रेण बध्नीयात्तदोषात्तु न नश्यते॥ भावचूडामणौ॥ ओं॥ भीम
भीरु भयाभाव भव्यलोचन भावुक॥ त्राहि मां देवदेवेश शवानामधिपाधिप॥ इति पादतले तस्य त्रिको
णचक्रमुल्लिखेत्॥ तदोषात्तु न शाकेयत त्रापि स्तु निश्चलो भवेत्॥ इति॥ ततः शवोपरि कुशपवित्रे पदावरह
स्तद्वयं पार्श्वयोः प्रसार्य तदुपरि कुशान्दत्वा स्वपादौ निधाय पुनः प्राणायामं कृत्वा शिरसि गुरुं वि
भाव्य हृदि देवीं ध्यात्वा ओष्ठाधरसंपुटो विहितमालया विभीर्जयेत्॥ तदुक्तं तत्रैव॥ उपविश्य पु
नस्तस्य बाहु निःसार्य पार्श्वयोः॥ हस्तयोः कुशमास्तीर्य पादौ तत्र निधापयेत्॥ ओष्ठे संपुटकौ
कृत्वा स्थिरचित्तः स्थिरेंद्रियः॥ सदा देवीं हृदि ध्यात्वा मौनी जपमथाचरेत्॥ स्वच्छंदभैरवे॥ पुत्रदारध
नस्नेहलोभमोहादिवर्जितः॥ मंत्रान्वा साधयित्वा तु शरीरं पातयाम्यहं॥ प्रतिज्ञामीदृशीं कृत्वा जप
श्मशाने तु स्थिरमानसः॥ तत्रापि शवसाधनोक्तक्रमेण जपः कार्यः॥ यद्यर्थे रात्रिपर्यंते न किंचिल्लक्ष्यते
पूर्ववदर्घ्यं तिलविकीरण सप्तपदगमनादिकं कृत्वा जपं कुर्यादिति भावचूडामणौ॥ चलासनाद्भयं
नास्ति भयजाते वदेत्ततः॥ यत्नार्थयासि देवेशी दातव्यं कुंजरादिकं॥ दिनांतरे च दास्यामि स्वनाम
कथयस्व मे॥ इत्युक्त्वा संस्कृते नैव निर्भयस्तु पुनर्जपेत्॥ पुनश्चेन्मधुरं सूक्तिवक्तव्यं मधुरं ततः॥
ततः सत्यं कारयित्वा वरं तु प्रार्थयेत्ततः॥ यदि सत्यं न करोति वरं वा न प्रयच्छति॥ तदा पुनर्जपेद्धीमा
नेकाग्रमानसः पथा॥ नररूपं विना तत्र देवोपि नोपसर्पति॥ यत्नतस्तेन बोद्धव्यं नरो वा देवयोनिजः॥

मातामातुः स्वसावापि मातुलानी तथैव च ॥ आगत्य विघ्नं कुरुते मायया छायविग्रहं ॥ उमि स्वयत्त
ते कार्यं सर्वं जानंन संशयः ॥ प्रभातसमये ज्ञात्वा सितानोथ तगृहे ॥ प्रायो विमत्सरा लोका राजानोदं
उधारिणः ॥ कदाचित्केन वा दृष्टास्तदानेकिं भविष्यति ॥ इत्याशंकां विधिर्धेयं न्य्येनेन्यजापं परित्यजेत् ॥
मृताः पितृगणास्तत्र दूरदेशप्रवासिनः ॥ बांधवास्तत्र आयांति दिव्यरूपधरास्ततः ॥ स्त्रीपुत्रसेवका
दिभ्य गृहीत्वा नीयते परैः ॥ रुदंति पुत्रकाः सर्वे भ्रातरोनुजशिष्यकाः ॥ निजकांतादिसंस्पर्शं वस्त्राघाभ
रणादिकं ॥ गृहीत्वा नीयते ऽस्पिन्तिपालकैस्तद्भयं त्यजेत् ॥ दिवसे यत्र यातंका सेवनं तत्र प्रजायते ॥ यदि
न लभ्यते तत्र तदा किं वा न लभ्यते ॥ स्त्रीरूपधारिणी देवी धरः पुमान् ॥ वरं गृण्हीति शंद्धं वै त्रिवारां तेव देवरू
रं लभेत् ॥ साधुनासाधुना वापि योषिद्भ्यो वरदायिनी ॥ तदा वीरपते स्तस्य किं नासिध्यति भूतले ॥ निष्पा
पपुरुषस्यैव कुलीनस्यैव संस्कृता ॥ असंस्कृता वरादेवी पापयुक्ते न संशयः ॥ संमुखे ऽसंमुखे वापि संस्कृ
तं कल्पितं पारं ॥ सेवदेवी न संदेहः ॥ स देवो भैरवः स्वयं ॥ न्यं द्व्ये भवेन्नैव मायाघटितविग्रहः ॥ नवरं वरयेत्तत्र
नकिंचित्प्रवदेत् क्वचित् ॥ सन्येतंसंस्कृतमाख्यानं वक्ति वक्तव्यमीदृशं ॥ नोच्येत स्वयं कौलिकोल्लावं प्रार्थ्य निरा
कुलं ॥ अथवाउत्कटं किंचिज्ज्योतिर्वा नीललोहितं ॥ शब्दो वा जायते सम्यग्गामतं वापि लभ्यते ॥ क्वचार्यं न त्व
हीतव्यं एवं शिष्यरिको र्तिताः ॥ देवकृत्यास्तु बहुधा नैराश्यस्तु न बुध्यः ॥ अकस्मात्प तत्र भेतव्यं न तत्र प्रत्ययः क्वचि
त् ॥ भैरवा वटुकाश्चैव कुलशास्त्रपरायणाः ॥ एतद्धमस्य प्रसंगेनकृत्याः कौरलविग्रहाः ॥ पुत्रोभूत्वा हेदि
यां नारी भूत्वा विभोहयेत् ॥ तस्मात्तदभवेन्नो वा किंचोरे यत्नमाचरेत् ॥ सदा संकृते तं वरं लब्ध्वा संसजेच्च जपादिकं ॥
फलं जातमिति ज्ञात्वा जुष्टिकां मानयेत्ततः ॥ अन्यत्रापि ॥ शावं प्रस्थाप्यं संस्थाप्य बंधनं मोचयेत्ततः ॥ पदे च कं
मार्जपित्वा पूजाद्रव्यं जले क्षिपेत् ॥ शवं जले थ गर्ते वा निक्षिप्य स्नानमाचरेत् ॥ तवकृत्स्वगृहं गत्वा बलिं दद्याद्दिनांतरे ॥

श्यामा अष्टमरात्रौ एषांदेवानांयजमानोऽहंतेनत्वालिंगरण्हंतुमयादत्तमिति॥तत्रैव॥अथतेर्योचितानश्वन
रकुंजरश्चकरान्॥दत्वापिश्टमयानेवकर्तव्यंसमुपोषणं॥परेन्हिनित्समाचर्यपंचगव्यंपिबेत्ततः॥ब्राह्म
णान्भोजयेत्तत्रपंचविंशतिसंख्यकान्॥एवंपंचविहीनांवाऽकेमात्रैवदशावधि॥ततःस्नात्वाचभुक्त्वा
चनिवसेदुत्तमस्थले॥यदिनस्याद्दिग्भोज्यंतदादारिद्र्यतांव्रजेत्॥नेन्यचेन्निर्धनत्वंस्यात्तदादेवप्रकुप्यति॥त्रि
रात्रंवाथषड्रात्रंनवरात्रंतुगोपयेत्॥शय्यायांयदिगच्छेत्तदाव्याधिंविनिर्दिशेत्॥गीतंश्रुत्वातुबधिरो
निश्चयस्तुनिस्पर्शनात्॥यदिवाक्यदिनेवाक्यंतदास्यमूकताभवेत्॥पंचदशदिनांतेहिदेहेदेवस्यसंस्थितिः॥
दा गोब्राह्मणानांनिंदाचनकुर्याच्चकदाचन॥देवगोब्राह्मणादींश्चप्रत्यहंसस्पृशेच्छुचिः॥प्रातर्नित्यक्रियांतेतु
बिल्वपत्रोदकंपिबेत्॥ततःस्नायात्तुगंगायांप्राप्तेषोडशवासरः॥स्नात्वाहंतेमूलमुच्चार्यतर्पणेतनमःपदं॥
एवंशततत्रयादूर्ध्वंदेवतांतर्पयेज्जले॥स्नानतर्पणशून्यस्यनस्याद्देवस्यदर्शनं॥इत्यनेनविधानेनसि
द्धिंप्राप्नोतिसाधकः॥इहभुक्त्वावरान्भोगानंतेयातिहरेःपदं॥असांगंसांगमेवापिनिःफलंसफलंतथा॥
कृत्वासाधनमेवेतच्छक्तःप्रियताभवेत्॥शवाभावेश्मशानेवाकार्यंवैवीरसाधनं॥येभावायस्यवेशोक्तास्ते
भर्वैर्यदिनार्चयेत्॥दस्याहृकमयोगेननष्टोभवतिसाधकः॥नोयदिद्वेत्तत्रभावेनपूजांतत्रसविंशेत्
कौलान्मंत्रगृहीत्वातुयावत्सिद्धिप्रजायते॥इतिवीरश्यामापं॰चतुर्दशपरिच्छेदः॥१४॥ ॥
अथकालीतंत्रेप्रकारांतरवीरसाधनं॥भैरवउवाच॥शृणुदेविवरारोहेवीरसाधनमुत्तमं॥रणांशीघ्र
फलावाप्तेःप्रकारांतरमुच्यते॥चतुःपथेचतुर्दिक्षुपुरुषंहृदयंखनेत्॥औभितंब्रूलरंध्रेषदीयान्प्रज्वालये
न्नरः॥पुरुषमितिपुरुषान्सजीवान्जातितान्दीपकंचनं॥चतुर्दिक्षु॥इत्यनेनचत्वारोपगम्यते॥मध्येतथास्व
नेदेकंतत्रमद्वासनंस्तरेत्॥पूर्वोक्तमार्गेणतत्रसंस्काराधिकमाचरेत्॥महाकालादिदेवेभ्योबलिपूर्ववदाह

रेत्॥ कल्पोक्तपूजांसंपूज्यजपेत्प्रयतमानसः॥ दंतास्थिमालयाप्येवं राजदंतेनमेरुणा॥ लिखित्वा साध्यंजपेन्मं
त्रमयुतंसर्वदैवतं॥ जपांतेचबलिंदत्वादक्षिणां विभवावधि॥ सर्वसिद्धीश्वरोविद्वान्सर्वदेवोनमस्कृतः॥
अथवा॥ विजनेऽरण्येअस्थिशय्यासनोनरः॥ उदयांतंदिवाजप्त्वासर्वसिद्धीश्वरोभवेत्॥ अथवा॥ बिल्ववृ
क्षनिजकोउत्तरांचमारोप्ययत्नतः॥ रात्रावारोप्ययत्नतः॥ नृसिंहमुद्रयोपविश्यजपेन्मातृकयानरः॥ सह
स्रंतत्रजप्त्वावैसर्वसिद्धीश्वरोभवेत्॥ अथवा॥ वटमूलेशवंनीत्वा तत्रैवदेवीप्रपूज्यच॥ सुप्तात्तत्रमनुंजप्त्वा
सर्वसिद्धीश्वरोभवेत्॥ अथवा॥ करकांचीसमादायमुंडमालाविभूषितः॥ श्मशानेवासंकृत्वाजप्त्वासर्व
सिद्धीश्वरोभवेत्॥ एतेनैवतिलकंकृत्वातत्तदंगसमाविभूषितः॥४॥ असंकृदितिअष्टोत्तरसहस्रमित्यर्थः॥
तदुक्तंतत्रैव॥ एषांजपेचहोमेचसंख्यानोक्तामनीषिभिः॥ तत्रेयंगणनाप्रोक्तागजांतकसहस्रकं॥ वारा
हीसंहितायामपि॥ पुरश्चरणहोमेषुसंख्यानोक्तामनीषिभिः॥ सहस्रमष्टयुक्तंयाज्जाप्येलक्षंविनिर्दि
शेत्॥ प्रयोगेश्वशतमात्रंचजाप्येचाष्टौविनिर्दिशेत्॥ वैशंपायनसंहितायांच॥ येषांजपेचहोमेचसंख्या
नोक्तामनीषिभिः॥ तेषामष्टोसहस्राणिसंख्योक्ताजपहोमयोरिति॥ अत्रलिखितवचनानांविषम
शिष्टानांविषयविभागःकल्प्यते॥ प्रथमलिखितवचनंसिद्धिविद्यापरं॥ वाराहितंत्रवचनंतदितर
विषयेबोद्धव्यं॥ वैशंपायनीयंवेदमवादिपरं इतिनिकृष्टार्थः॥ तिलककरणत्वात्॥ अथवा॥ कुंकुमाग
रुकस्तूरीरोचनाद्यन्यचंदनं॥ कर्पूरंपद्मरागंचकेसरंहरिचंदनं॥ एकत्रसाधितंकृत्वाप्रत्येकंसाध
येत्ततः॥ घनमोथा॥ पद्मरागःपद्मनखी॥ केसरंनागकेसरं॥ हरिचंदनंकुंकुमागरुअस्यातिलकमात्रे
णराजानंवशमानयेत्॥ जिव्हाग्रेरुधिरंवीरआकाशेचसमाहरेत्॥ एतद्धृत्वकुंकुमस्तकमाकाशाज्जिव्ह
यांगृहीत्वेत्यर्थः॥ तेनैवचचर्चिकांकृत्वाभद्रकालींततोजपेत्॥ नीलांनीलपताकांचलललज्जिव्हांकालिकां॥

ललाटे तिलकं दत्वा साधको वीतभीः सुरः॥ महाष्टमी नवम्यास्तु संयोगे पुरतः स्थितः॥ छागमाहिषमे रहस्य
षाणां चतुर्दिक्षु चावक्षिपेत्॥ कबंधानां तु पूजां च दीपादिभिरलंकृतान्॥ मध्ये कबंधमासीनं तत्र गंधर्वरूप
ध्वक्॥ तांबूलपूरस्त्वास्यमंजनांचितलोचनं॥ कृत्वा तावन्मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत्॥ तावद्दशान्तरसहस्रं॥
वियद्वियुतं देवि नेत्रांतं चंद्रभूषितं॥ बीजं प्रत्येकद्रव्याणां मिलितानां च पार्वति॥ मूलमंत्रेण मंत्रज्ञो जे
पेत्सागंधात्रयं॥ जिह्वाग्रे रुधिरं गृण्हन्यां मुंडे घोरनिस्वने॥ बलिं क्षिप्त्वा वरं देहि रुधिरं गगने मले॥
कालिकालिग्रचंडोग्र ततो रक्तं कवचं तथा॥ कालिके यं समाख्याता वीराणां हितकाम्यया॥ कूर्चयुग्मं
तथा देवी नीलायाः कथितं तव॥ वियद्भृगुयुतं देवलाभिनेत्रा रविः रतः॥ चंद्रखंड समायुक्तं ततो नीलप
दं ततः॥ पताके हुं फट् चास्य पूर्वं कूटो मनुर्मतः॥ सुगुप्तेयं महाविद्या याज्या वै नीलसाधने॥ जयश्रीध
रणी देवी पताके वरणस्थले॥ तेन नीलपताके ये याज्या वै नीलसाधने॥ उग्रचंडा महाविद्या पुरा कथिता
प्रिये॥ लंलं जिह्वा तु सा प्रोक्ता याज्या वै नीलसाधने॥ यासौ विद्या महातारा सा कराले ति कीर्त्तिता॥ भूमि
पुत्रसमायुक्ता आमावास्या शुभप्रदा॥ भाद्रपुष्करयोगे च तस्या वीरवरोत्तमः॥ विश्रुक्रांतां समानीय निः
क्षिपेत्स्वेतभूमिषु॥ तत्र तां साधितां कृत्वा तद्दिने मृतनापिके॥ तत्र प्रसारितं मत्स्यमेकमुल्येन दापयेत्॥
तज्जलेनाभिषेकं च पूर्ववच्च शवोपरि॥ साधितां विजयां तस्य उदरे मुखवर्त्मना॥ क्षिप्त्वा तत्र खनेन्मत्स्य
मंजनांचितलोचनः॥ पूर्वद्रव्येन विधिका उस्थाय च मनुं जपेत्॥ स्वयं चेतत्र भगवान्भैरवो लगुडांगतः॥ कि
गतभीतस्ततो वीरस्तं विलोक्य जपेन्मनुं॥ यदि भाग्यवशाद्दलगुडं तत्र लभ्यते॥ तदा स्वयं भैरवासौ स्वयं
वीरेश्वरो भवेत्॥ मत्स्यमानीय देवेशि निक्षिपेत्सितकानने॥ तत्रासरूज्जापित्वा तु देवतामेलनं भवेत्॥
तत्र नत्वा महादेवं महादेवीं च भाविनी॥ तद्भस्मतिलकं कृत्वा स्वयं वीरेश्वरो भवेत्॥ निशायां मृतदेव

पूर्ववत् घंटार्घ्यं स्थापयित्वार्घ्योदकेनाभ्युक्ष्यामृतमंत्रेण धेनुमुद्रयामृतीकृत्वाष्टशक्तीनां रूप उत्तर
भेदं ज्ञात्वा ब्रह्माण्याद्यष्टशक्तीनां संज्ञाभिर्नामकरणक्रमेण कृत्वासनादिकं दद्यात् ॥ तदुक्तं तंत्रेव ॥
अष्टकन्यारूपभेदं विलोक्य मयैवेरितं ॥ ब्रह्माण्याद्यष्टशक्तीनां नामभिः कृतसंज्ञकाः ॥ आसनं प्र
दत्त्वा स्वागतं च पुनः पुनः ॥ अर्घ्यं पाद्यं च पानीयं मधुपर्कं जलं तथा ॥ स्थापयेद्गंधपुष्पाद्यैः केशा तैः
संस्कारमाचरेत् ॥ धूपयित्वा ततः केशान्कौशेयं चान्निवेदयेत् ॥ ततस्तासां तत्र पीठमास्तीर्य पादुकायुगं ॥
दत्वा तत्र समासीनां नानालंकारभूषणैः ॥ भूषयित्वानुलेपं च गंधमाल्यं निवेदयेत् ॥ ततस्तां तां शक्तिं
पूजाप्रकरणोक्तक्रमेण ध्यात्वा तासां मूर्ध्नि ब्राह्म्यादिमातॄः समावाह्य जीवन्यासादिकं कृत्वा गंध
पुष्पधूपदीपपानद्रव्यान्नव्यंजनं दत्वा तासां सव्यकर्णे स्तोत्रं पठेत् ॥ तदुक्तं तंत्रेव ॥ तां तां शक्तिं समावा
ह्य मूर्ध्नि तासां समर्चयेत् ॥ भोज्यं मंडलमध्ये तु स्वर्णपात्रे सुशोभने ॥ चर्व्यं चोष्यं लेह्यं पेयं भोज्यं भक्ष्या
न्निवेदयेत् ॥ अतिदक्षिता यदि भवेत्ततो मायां निवेदयेत् ॥ तासां सव्येषु कर्णेषु ततस्तोत्रं समाचरेत् ॥ मा
तर्देवि नमस्तेस्तु ब्रह्मरूपधरेनघे ॥ कृपया हर विघ्नं मे मंत्रसिद्धिं प्रयच्छ मे ॥ माहेश्वरी वरदे देवि परमानंदरू
पिणी ॥ कृपयेत्यादि ॥ कौमारी सर्वविघ्नेशि कुमारक्रीडने वरे ॥ कृपयेत्यादि ॥ विष्णुरूपधरे देवि विनतासु
तवाहिनी ॥ कृपये ॥ वाराहि वरदे देवि दंष्ट्रोद्धृतवसुंधरे ॥ कृपया ॥ शक्ररूपधरे देवि शक्राद्यादिसुरपू
जिते ॥ कृपया ॥ भीतिमात्रभये देवि भीतिमात्रबहिष्कृते ॥ एकबहुविधे देवि विश्वरूपे नमोस्तु ते ॥ ए
तत्स्तोत्रं पठेद्यस्तु कुमारीभेषु संयतः ॥ व्रिग्ध्नांबा समालोक्य तस्य विघ्नं न जायते ॥ कुलीनस्यद्वादेवाः
कथितास्तव पुत्रक ॥ दीक्षाकाले नित्यपूजासमये नार्चयेद्यदि ॥ तस्य पूजाफलं वत्स नीयते यक्षराक्षसैः ॥
यस्त्रीडपरास्तां तु भोजयेत्तत्कुलाद्बहिः ॥ भिष्यवास्तात्रं पठेत्तावयावत्तृप्तिः प्रजायते ॥ आचम्य मुखवासादि

तांबूलंचनिवेदयेत्॥ ततोद्यासुनर्मोल्लंगंधंचकुलसंचयं॥ विसर्ज्यप्रदक्षिणीकृत्यवरंप्रार्थ्यसुखी रहस्य
भवेत्॥ अन्यायदिनगच्छंति निजकन्यानिजानुजा॥ अग्रजावामातुलानिमातावातत्सपत्निका॥ वयस्या
जातितोवापिहीनापि परमाकला॥ पूज्याः कुलवरैः सर्वानिजाहंकारवर्जितैः॥ सर्वाभावेएकतरापूजनी
याः प्रयत्नतः॥ संस्कृतासंस्कृतावापित्रननीवापिनिःपतिः॥ पूर्वभावे परापूज्या मंदृशायाथितायतः॥
एकाश्रेत्कुलशास्त्रज्ञः पूजार्हस्तत्रभैरवः॥ सर्वत्रवल्लभाः पूज्याः सत्यंप्रहलादीवादिभिः॥ एकान्येषुव
तीतत्रपूजितान्यावलोकिता॥ सर्वाएवपरादेव्यः पूजिताकुलभैरव॥ आदावंतेचमध्येचलक्षपूर्तोविशेष
तः॥ नपूजयतिचेत्कांतांसर्वाचिर्भिर्विलुप्यते॥ पूर्वार्जितफलंनास्तिकाकथापरजन्मनि॥ तस्मात्सर्वप्रय
त्नेनयदीच्छेदात्मनोहितं॥ ममाक्रोधसंतापशमनं विघ्ननाशनं॥ यत्नतोपूजनीयास्युः कुलाकुलजनप्रि
ये॥ अथवक्रमेण लक्षजपादौ आदौमध्यंतेचशक्तयः पूज्याः ततोरात्रौपंचमेनदेवींसंपूज्य रहस्यमाल
याकुलयुक्तोगुरुंशिरसिहृदिदेवींच ध्यात्वाशिवाहमिति॥ भावयन्जपंकुर्यात्॥ तृतीयप्रहरावधियावत्॥
गतेप्रथमयामेतुतृतीयप्रहरावधि॥ निशायांचप्रजपेत्सर्वंरात्रिशेषेजपन्नचेति॥ इतिमुंडमालायामुक्तं॥
तृतीयप्रहरावधीयावत्॥ तदुक्तंमुंडमालायां॥ गतेप्रथमयामेतुतृतीयप्रहरावधि॥ निशायांचप्रज
पेत्सर्वंरात्रिशेषजपन्नचेति॥ स्वतंत्रेपि॥ रात्रौमांसासवैर्देवींपूजयित्वाविधानतः॥ ततोनग्नांस्त्रियंलग्ना
रमणंदधतोपिवा॥ जपेल्लक्षंततोदद्विहोमयेज्ज्वलदानले॥ योनिकुंडेस्थितंसीर्पिमांसमत्स्ययुतंभवेत्॥
स्वांगांतर्पयेन्मद्यैर्मांसभिश्रैः सुसाधकः॥ तर्पणस्यदशांशंतुअभिषिंच्यजगन्मयी॥ स्वांतांभोजयेत्सा
धुसाधकैःकालिकाप्रियं॥ मद्यंमांसंचमत्स्यंचचर्वणंचप्रदापयेत्॥ ततस्तुभोजयेद्भक्त्यागुरुंस्वर्णादि
भिःप्रिये॥ एतत्कल्पद्वयादेविमंत्रः सिध्यतिनिश्चितं॥ विनापीत्वासुरांभुक्त्वामांसंगत्वारजस्वलां॥ यो

जपेद्दक्षिणांदेवींनस्पृदुःखंपदेपदे॥कालितंत्रेपि॥तर्पणस्यविधिंवक्ष्येयेनकार्याणिसाधयेत्॥तर्पये
त्पयोभिश्चरक्तधारायुतैस्तथा॥मज्जाभिश्चतथानद्यस्थलोयेनच येनच॥आकर्षितायाःकन्यायाःकु
लजस्रावेनच॥मेषमाहिषरक्तेननररक्तेनवैयदि॥मूषामार्जाररक्तेनतर्पयेत्परदेवतां॥एवंतर्पण
मात्रेणसाक्षात्सिद्धीश्वरोभवेत्॥कवितजायतेतस्यद्रक्षसारसपरंपरा॥बृहस्पतिसमोभूत्वादिविवद्भुवि
मोदते॥नतस्यपापपुण्यानिजीवन्मुक्तोभवेद्ध्रुवं॥उत्तरतंत्रेपि॥योनिरूपंहिरूपंडंवैकृत्वासाधकसत्तमः॥
हस्तविस्तारितंतावत्कृत्वाचापितथाप्यधः॥तत्रकार्याहिमंत्रेणअग्नेःस्थापनिकाक्रिया॥महाकाली
यदेव्यायस्यात्प्रथमाहुतिं॥एवंभक्ष्येनमांसेनभक्तेनरुधिरेणच॥रुधिरपुष्पेणसाज्येनसरक्तेनविशे
षतः॥आमिषादिभिरप्येवंस्मशानेजुहुयात्सुधीः॥कुलसंभोरेपि॥रात्रौनग्नोमुक्तकेशोमैथुनेवापि
पितत्वतः॥प्रकर्त्तव्यंप्रयत्नेनसर्वकामार्थसिद्धये॥द्विजातीनांचसर्वेषांदिवाविधिरिहोच्यते॥शूद्राणां
चतथाप्रोक्तंरात्राविष्टंमहाफलं॥यद्यत्कामयतेकामंतत्तदाप्नोतिनिश्चयाः॥कालिकाश्रुतौ॥अथहेनं
कालिकामंत्रजापीयःसदाशुद्धात्मनानवैराग्ययुक्तःशांभवीदीक्षासुरतःशाक्तेषु॥दिवाब्रह्मचारीरा
त्रौनग्नःसर्वदामैथुनासक्तमानसःजपपूजादिनियमान्योषितः॥सुप्रियकरः॥सुभगार्द्रकेनतर्पणं॥
तेनैवपूजनं॥सर्वदामात्मानरूपकालिकांविभावयेत्॥ससर्वयोषित्प्रासक्तोभवति॥सर्वहत्यांतरति॥
अथपंचमकारेणसर्वमाप्नोति॥विद्यापशुधनंधान्यंसर्वकंवांच्यकंचिलंचनान्यःपरमंपथाविद्यते॥
मोक्षायज्ञानायधर्मायचयत्सर्वंभूतंभव्यंयत्किंचित्दृश्यादृश्यमानंस्थावरजंगमतत्सर्वंकालिकामंत्र
तुष्टोतत्वेरयंश्रुतमनुजापीनान्यः॥पाप्मानंतरतिसतुगम्यागमनंतरति॥ससर्वपापंतरतिससर्वंसु
स्वमाप्नोति॥ससर्वजानाति॥ससर्वसन्यासीभवति॥सविरक्तोभवतिससर्ववेदाध्यायीभवति॥ससर्व

न्यामा

मंत्रजापी भवति॥ ससर्वशास्त्रवेत्ता भवति॥ ससर्वयज्ञकारी भवति॥ अवश्यो मित्रं पुत्रो भवति॥ इत्या
ह भगवान् शिवः॥ निर्विकल्पेन मनसा यो वै सर्वं करोतीति॥ अथैवं पुरश्चारी प्रयोगार्हो भवतीति॥ ॥
अथादौ शक्तिशुद्धिर्विलिख्यते॥ यतो दीक्षिता संगान्निंदावाद श्रुतेः॥ तद्यथा भावचूडामणौ॥ अदीक्षि
तकुलासंगात्सिद्धिहानिः प्रजायते॥ तत्कथाश्रवणं वास्यात्तत्र योगमनं यदि॥ सकुलीनः कथं देव पूजये
त्परमेश्वरीं॥ इति श्रीक्रमेऽपि॥ संशोधनमकृत्वा वै स्त्रियं गच्छेत्तु साधकः॥ कृतेऽपि सिद्धिहानिः स्यात्क्रुद्धा भ
वति चंडिका॥ तस्माच्छक्तिशुद्धिः कार्या॥ तदुक्तं कुलतंत्रे॥ अभिषेकाद्भवेत्सिद्धिमंत्रस्योच्चारणात्ऋतौ॥
रतिकाले महेशानि दीक्षाकाले च कन्यका॥ बलाद्वा यत्नतोऽप्यर्थाद् भिषेकं समाचरेत्॥ सुरया रतसा चापि ज
लेन मधुनाथवा॥ संभोगे भीषिका नारी रंडा वा मंत्रवर्जिता॥ आदौ बाला समुच्चार्य त्रिपुरायै समुच्चरेत्॥
नमः शाह्नं समुच्चार्य इमां शक्तिं ततो वदेत्॥ पवित्रीकुरु शाह्नांते मम शक्तिं कुरु प्रिये॥ वह्निजाया समुच्चार्य
शुद्धिमंत्रः सुरेश्वरी॥ अनेन मधुना देवि अभिषिक्ताः स्त्रियः सदा॥ रममाणो भवेन्नित्यं सर्वसिद्धिमवाप्नु
यात्॥ इह लोके परं भोगं भुक्त्वा मुक्तिमवाप्नुयात्॥ अन्यच्चापि॥ आनीय कन्यकां भद्रां घृणालज्जाविवर्जि
तां॥ स्वकीयां परकीयां वा दीक्षितां यौवनान्वितां॥ पूजकः पूजयेन्नित्यं वामपार्श्वे निवेश्य च॥ स्वीयकल्पो
क्तविधिना न्यासजालं प्रविन्यसेत्॥ ततो जपेत्स्त्रियं गच्छन्नवित्यां त्रीभवतारिणी॥ इति॥ शक्तौ विशेष
यथा॥ कुमारीतंत्रे॥ नटी कपालिकी वेश्या रजकी नापितांगना॥ ब्राह्मणी शूद्रकन्या च तथा गोपालक
न्यका॥ मालाकारस्य कन्यापि नवकन्याः प्रकीर्तिताः॥ एतासु कांचिदानीय ततस्तद्योनिमंडले॥ पूजयि
त्वा महादेवीं ततो मैथुनमाचरेत्॥ धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा॥ सुषुम्नावर्त्मना नित्यमक्षवृ
त्तिं जुहोम्यहं॥ स्वाहांतोऽयं महामंत्र आरंभे परिकीर्तितः॥ ततो जपेत्स्त्रियं गच्छन्देवीं त्रिभुवनेश्वरीं॥ शक्ता शाक्त

उन्मत्तानंदभैरवः॥ दिग्वासा विमलो भस्मभूषितो मुक्तकेशकः॥ कपालीखड्गहस्तश्च जपेन्मात्रक
यानरः॥ तदा तस्य महादेवी सर्वसिद्धिकरी स्थिता॥ डाकिनीं योगिनीं वापि अन्यां वा भूतलांगनां॥ तत्रा
प्यानीय संपूज्य सर्वसिद्धीश्वरो भवेत्॥ सर्वेषां जीवहीनां जंतूनां नीलसाधने॥ मृतासनं विनादेवि पूज
येत्पार्वतीं शिवां॥ तावत्कालं वसेत् घोरे यावदाभूतसंप्लवं॥ शवाः प्रशस्ता देवेशि ब्राह्मणं गोमयं वि
ना॥ क्षुद्राः सर्वे प्रशस्ताश्च सर्वसिद्धिप्रदायिकः॥ एतन्नीलकल्पं देवी कथितं च तवानघे॥ नकस्मै
चित्प्रवक्तव्यं मम प्राणसमा महेश्वरी॥ देव्युवाच॥ ज्ञानमेतन्महादेव त्वत्प्रसादान्महेश्वर॥ अत्र भक्ता
नां तु मे देव पुरश्चरणमुच्यतां॥ भैरव उ०॥ श्मशाने या पुरश्चर्या कथिता देवि दुर्लभा॥ अथवान्यप्र
कारेण पुरश्चरणमुच्यते॥ कुजे वा शनिवारे वा नारंभ उत्समाहृतं॥ पंचगव्यैस्तु लिप्तं च चंदनाद्यैर्विशे
षतः॥ काननांतरे॥ तत्र तद्दिवसे रात्रौ सहस्रं परिमानवः॥ एकाकी प्रजपन्मंत्रं स भवेत्कल्पपादपः॥
अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ शवमानीय तद्वीरं तेनैव परिरवन्यन्य॥ तद्दिनात्तद्दिनेयावत्ता
वदष्टोत्तरंशतं॥ मंत्रायेसर्वसिद्धीशो नात्र कार्या विचारणा॥ अथवान्यप्रकारेण पुरश्चरणमुच्यते॥
अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि॥ सूर्योदयं समारभ्य यावत्सूर्योदयांतरं॥ तावज्जप्त्वा मह
ज्ञानी पुरश्चर्या विधीयते॥ काली तंत्रे च॥ अथवान्यप्रकारेण पुरश्चरणमुच्यते॥ चंद्रसूर्यग्रहे चैव
ग्रासाद्यावधिविमुक्तितः॥ यावत्संख्यमनुं तावत्ताव होमादिकं त्यजेत्॥ सूर्यग्रहणकालाधिनान्यः का
लः प्रशस्यते॥ तत्र यत्प्रकृतं कर्म तदनंतफलं लभेत्॥ तावदिति जपसंख्यां होमादिकमित्यर्थः
कृतांतस्य॥ ग्रहणे चंद्रसूर्यस्य शुचिः पूर्वमुपोषितः॥ नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः॥
यदा शुद्धोदके स्थित्वा शुचौ देशे समाहितः॥ स्पर्शाद्विमुक्तिपर्यंतं जपं कुर्यादनन्यधीः॥ अनंतरं द

ना

शांशेन क्रमाध्योमादिकं चरेत्॥ तदंते महती पूजां कुर्याद्ब्राह्मणभोजनं॥ ततो मंत्रस्य सिध्यर्थं गुरुं संपूज्य रहस्य
तोषयेत्॥ अथमुंडमालायां॥ कृष्णाष्टमीं समारभ्य यावत्कृष्णाष्टमी भवेत्॥ सहस्रसंख्यं जप्तेन पुरश्चरण
मिष्यते॥ कृष्णां चतुर्दशीमारभ्य नवम्यंतं महोत्सवे॥ अष्टमी नवमी रात्रौ पूजां कुर्याद्विशेषतः॥ स्तवाम्यां पार
णं कुर्यान्मत्स्यमांसादिभिः प्रिये॥ षट्सहस्रं जपेन्नित्यं भक्तिभावपरायणः॥ अन्यत्र॥ चतुर्दशीं समा
रभ्य यावदन्या चतुर्दशी॥ तावज्जप्ते महेशानि पुरश्चरणमिष्यते॥ केवलं जपमात्रेण मंत्राः सिद्धा भवं
ति हि॥ विना होमादिदानेन विशेषात्सौ ढपूजनैः॥ योनिपीठं महापीठं कामरूपं ततः परं॥ तयोरेकतमं
पूज्ये रुद्रदेहदेवापरः॥ तावज्जपेति प्रतिदिनं षट्सहस्रमित्यर्थः॥ अव्यवहित प्रथमकल्पदेशादीति॥
कालीतंत्रेऽपि॥ शारत्काले चतुर्थ्यादिनवम्यांतं विशेषतः॥ भक्तितः पूजयित्वा च रात्रौ तावत्सहस्रकं॥
जपेदेकाकी विजने केवलं निरालये॥ अष्टम्यादि नवम्यंतमुपवासपरो भवेत्॥ अन्यत्र गुरुमार्गस्यालं
घनं नैव कारयेत्॥ अथवान्यप्रकारेण मुच्यते॥ अष्टमीसंधिवेलायां मद्योत्तरकृता भवेत्॥ त्रिविधप मं १२६
त्रीविधिवत्ताः समभ्यर्च्य यत्नतः॥ पूर्वोक्तकल्पमासाद्य पूजादिकं समाचरेत्॥ केवलं कामदेवीसा ज
पेद्धोरान्तरं शांतं॥ तासां च पत्रमूलेन उक्तं संगृह्य मस्तके॥ महासिद्धिर्भवेत्तस्य लतादर्शनपूजनात्॥
अथवेत्यादि॥ कुलालयशिलतागारे लिखेद्वा मंत्रमेव च॥ प्रपूज्य तत्र संस्कारं कृत्वा तस्य निवेदयेत्॥ किं
चिज्जप्तं मनुं नीत्वा देवताभवतत्सरः॥ तां विसृज्य नमस्कृत्य स्वयं जप्त्वा सुसंयतः॥ प्रातस्त्रिभ्यो बलिं द
त्वा मंत्रसिद्धिर्न संशयः॥ अथवेत्यादि॥ गुरुमानीय संस्थाप्य देववत्पूजनं विभो॥ वस्त्रालंकारभूषाद्यैः
संतोष्य गुरुमेव च॥ तत्सुतं तत्सुतां चैव तत्पत्नीं च विशेषतः॥ पूजयित्वा मनुं जप्त्वा स्वयं सिद्धिश्वरो भवेत्॥
अथवेति॥ सहस्रारे गुरुपादपद्मं ध्यात्वा प्रपूजयेत्॥ केवलं देहभावेन सर्वसिद्धीश्वरो भवेत्॥ गुरवे दासि

णां दत्त्वा यथा विभवविस्तरैः॥ गुरोरनुज्ञामात्रेण दुष्टमंत्रोपि सिध्यति॥ गुरुं विलंघ्य शास्त्रेस्मिन्नधिकारः
सुरैरपि॥ एषां च तंत्रमंत्राणां प्रयोगः क्रियते यदि॥ गुरुवक्त्रं विना देवि सिद्धिहानिः प्रजायते॥ एतन्मंत्रं च नं त्वं च
शिष्येभ्यो पि न दर्शयेत्॥ अन्यथा मे तराजस्य भवनं याति निश्चितं॥ अथ कालिकादर्शनार्थं कालिसाधनांत
रमालिख्यते॥ तत्रायं क्रमः॥ प्रदोषे भूत्वा गत्वा उत्तराभिमुखोपविश्य भूतशुध्यादिन्यासांतं विधाय सिंदूरेण
तं नवकोणं दलं वृत्ता अष्टदलं च चतुर्द्वारात्मकं यंत्रं विलिख्य मध्ये कुमार्याख्य शक्तिबीजं विलिख्य पुरतः संस्थाप्य तत्र
पीठपूजां कृत्वा मूलाधारमाकुंच्य द्वादश प्राणायामं कृत्वा ध्यायेद्यथा कालिकल्पे॥ नृकपोलसमायुक्तां नर
मालाविराजितां॥ कृष्णाभ्रसन्निभां स्फुवासोमपरिदीपितां॥ चतुर्बाहुधरां नानादिव्यालंकारभूषितां॥
निशामुखं समारभ्य यावद्यामद्वयं भवेत्॥ तावत्कालं जपेन्मंत्रं कालीसंदर्शनोत्सुकः॥ चंदनार्चितनस्त्रीरः
शिरोपरि विराजितः॥ घृतप्रदीपमालाभिस्तथैव परिवेष्टितः॥ मुंडोपरि भवेन्मुंडं सदीपं संनिधापयेत्॥ पूज
नं मूलमंत्रेण कुर्याद्देव्या विलक्षणं॥ सिंदूरमंडलं कृत्वा नवकोणविराजितं॥ शक्तिबीजं तु तन्मध्ये लिखि
त्वान्यैः समावृतं॥ बहिरष्टदलं पश्चात्तेनैव कारयेद्बुधः॥ तत्रावाह्य जगद्धात्रीं कालिकां रूपविग्रहां॥ पूज
येद्विधिवद्द्रव्यैर्नवरात्रं समाहितः॥ ततस्तुष्टा जगद्धात्री कालिका परमेश्वरी॥ सर्वसंपत्प्रदा साक्षात्साध
कस्यानुकंपया॥ साक्षाद्भवेत्यर्थः॥ ते यंत्रं प्रकाशयेद्धीमान्प्राणैः कंठगतैरपि॥ न वदेद्भक्तिहीनाय भैरवे
नेति भाषितं॥ इति श्यामारहस्ये पंचदशः परिच्छेदः॥ १५॥ ॥ अथ काम्यहोमार्थं
कुंडनियमो लिख्यते॥ तदुक्तं सिद्धसारस्वते॥ शांतौ पुष्टौ तथा रोगे पकुंडं च चतुरस्रकं॥ आकर्षणे त्रि
कोणं स्यादुच्चाटने च वर्तुलं॥ मारणे च तथा योज्यं वर्तुलं मनिभिः सदा॥ तंत्रांतरे च॥ उदीच्यां पौष्टिकं कुं
डं वारुण्यां शांतिकादिषु॥ उच्चाटने चानिले कुंडं याम्ये च मारणं भवेत्॥ कुंडनियमपरिपाठे तु मत्कृतश्री

श्यामा तत्वच्चिंतामणावनुसंधेया॥अथहोमरहस्यद्रव्यंतदुक्तंकालिकातंत्रे॥अथहोमविधिंवक्ष्येसर्वसि
द्धिप्रदायकं॥लतापुष्पान्वितंकृत्वापर्णानांशतकंसुधीः॥तानिसंमन्त्र्यविधिवत्संस्कृत्वासाधकोत्तमाः॥त
तोवैहोमयेत्तानिसंस्कृतेग्नौयथाविधिः॥युगानामयुतंतेनपूजनंजायतेशिवे॥तदुक्तमुत्तरतंत्रे॥नारीर
जोंकितंकृत्वापर्णानांशतमुत्तमं॥असकृदितिशतधेत्यर्थः॥अनेनक्रमयोगेनयश्चरेदुपासकः॥नत
स्यदुर्लभंकिंचित्त्रिषुलोकेषुविद्यते॥वीरोभवतिवाग्मीशोसर्वसिद्धीश्वरोभवेत्॥हुनेदाज्येनमांसेनभक्ते
नरुधिरेणच॥रक्तपुष्पेनसाज्येनसरक्तेनविशेषतः॥अभिचारादिभिरप्येवंश्मशानेजुहुयात्सुधीः॥मह
कालाकुलेयत्नात्पश्चाद्देवींश्चयत्नतः॥त्रिधाविभज्यविधिवत्साधकःशुद्धमानसः॥मांसंरक्तंतिलंकेशो
नस्वंभक्तंचपायसं॥आज्येनैवविशेषेणजुहुयात्सर्वसिद्धये॥एवंकृतेचसंक्षेत्रलभतेसिद्धिमुत्तमां॥यच
कामयतेकामंतत्तदाप्नोतिनिश्चितं॥देवत्वमानुषाभूत्वाभुनक्तिबहुलंसुखं॥फेत्कारिणीयेपि॥बिल्वाक
मेनहोतव्यंपत्रैर्मधुसमन्वितैः॥धनकामेनहोतव्यंतिलाज्यमधुसंयुतैः॥सिद्धसारस्वते॥बंधूकपुष्पहोमे
नदासवश्यंकुरुतेनृपान्॥सर्पिर्लवणहोमेनसमाकर्षतिकामिनीं॥वकुलैर्होममात्रेणसौभाग्यंलभतेनरः॥
मल्लिकाजातिपुन्नागकदंबैःपुष्टिमाप्नुयात्॥स्त्रीराज्यतगरैर्होमान्मरुतींकवितांलभेत्॥राजवृक्षप्रसूनैश्च
होमात्संपदमाप्नुयात्॥राजवृक्षःसनालुभित्याख्यातिः॥दूर्वातिलजहोमेनसदीर्घमायुराप्नुयात्॥चंदना
गरुकाश्मीरकर्पूरहोमतत्परः॥मंत्रीनीलसरस्वत्यासर्वाभीष्टमवाप्नुयात्॥नीलसरस्वतीपदमात्रोपल
क्षणं॥अनिरुद्धसरस्वतीविषयापवाद्ध्यव्यं॥यत्रोक्तमात्यस्तत्रतत्रोक्तमानरीदृह॥इतिकृत्यनीतः॥वीरतं
त्रेपि॥कर्पूरहोमतोमंत्रीसर्वाभीष्टानिसाधयेत्॥संपूज्यमूलमंत्रेणबिल्वपत्रैर्घृतान्वितैः॥सहस्रंत्रस
हुत्वाप्नोतिपरमांगतिं॥प्रातर्दिनमितिसंवत्सरंयावदित्यर्थः॥घृताक्तमालतीपुष्पहोमात्तुकविर्भवेत्॥

यत्र यत्र होमसंख्या नोक्ता तत्र तत्रायुतसंख्या बोद्धव्या ॥ तदुक्तं तंत्रे च । अत्र सर्वस्य होमस्य नियमो यु
तसंख्यक इति ॥ अन्यथा भद्द्रव्यपरिमाणं ॥ अनुक्ता शास्त्रीतत्वचिंतामणावनुसंधेयं ॥ ग्रंथगौरवभयेन नात्र लि
खितं ॥ अथाकर्षणादि ॥ तत्रादौ सर्वजनवशकरणात्मकबलिमंत्रेणार्द्धरात्रे चतुष्पथे सर्वसिद्धये साभिषा
न्नं बलिं दद्यात् ॥ तदुक्तं स्वतंत्रे ॥ उपचारविशेषेण राजा पत्नीं वशेनयेत् ॥ राजानं जपमात्रेण बलिना स
कलं जगत् ॥ प्रयोगे बलिमंत्रोयं प्रयोगान्साधयेद्यदि ॥ अर्द्धरात्रं ततो नित्यं बलिं दद्याच्चतुष्पथे ॥ पर
सैन्यग्रहारिष्टरोगकृत्यानिवारणं ॥ अथवा ॥ अर्द्धरात्रे सिंदूरादिना यंत्रं कृत्वा रक्तपुष्पैर्देवीं संपूज्य
वक्ष्यमाणक्रमेण जपं कुर्यात् ॥ तदुक्तं कुलसंभारे ॥ नागयज्ञोपवीतां च चंद्रार्द्धकृतशेखरां ॥ जटाजूटसमा
युक्तां महाकालसमीपगां ॥ एवं संचिंत्य देवीं तु रक्तपुष्पैः समर्चयेत् ॥ कूर्चलज्जायुगं बीजद्वयं चांते तथै
व च ॥ योजयित्वा जपेद्विद्यामयुतं वशमानयेत् ॥ कामबाणसमा विद्या निर्लज्जा विह्वला स्त्रियः ॥ स्वं स्वं
त्यक्त्वा भर्त्तारं मा लिंगति सदैव तं ॥ योजयित्वांते दक्षिणे कालिके चेत्यंते । इत्यर्थः ॥ कालीतंत्रेपि ॥ रक्तैराकर्षणैः ष
पुष्पैः पीतैस्तंभनकर्मणि ॥ मारणे कृष्णपुष्पैस्तु पूजयेत् घोरदक्षिणां ॥ अथान्यैकं तु बीजानां तथैवांते च
एककं ॥ दक्षिणे कालिके चेति मध्ये संयोज्य मंत्रवित् ॥ स्वाहांतं मंत्रमुच्चार्य भवेदाकर्षणं महत् ॥ बीजा
नामिति त्र्यक्षरीविद्यानामेकैकबीजं आद्ये अपरं चांते योजनीयमित्यर्थः ॥ लोहितानलहस्तां च एक
शूलधरां तथा ॥ महाकालसमासीनां साध्याशाकर्षणं चरेत् ॥ स्थावरं जंगमं चैव पातालतलगं तथा ॥
आकर्षयाति मंत्रज्ञः किमन्यत्कुवियोषितः ॥ अयुतैकं जपः प्रोक्तः सदाकर्षणकर्मणि ॥ कुलसंभारेपि
लोहितानलहस्तां च एकशूलधरां तथा ॥ महाकालसमीपस्थां ध्यात्वा पुष्पैः सपीतकैः ॥ अभ्य
र्च्यैकैकशस्त्र्याद्ये अपरं चांते नियोजयेत् ॥ आकर्षणं भवत्येवं सदा स्थावरजंगमं ॥ पातालतलगं

श्या॰ न्यापि किमन्यां भुवि योषितं॥ आकर्षयति मंत्रोऽयं महाकालकृतो यथा॥ अथ भावचूडामणौ॥ रात्रौ वीर
वरो वापि दिव्यो वा साधकोत्तमः॥ नैजं कुलं समादाय कुलस्थाने तु मंत्रकं॥ विलिख्य मसिना कालं कालि
चरमणोज्वलां॥ निजवामोरुमध्ये च कालीमंत्रविदर्भितं॥ मसिना साध्यनामार्णं विलिख्य देवमध्यतः॥
स्वयं कामकलारूपस्तत्रावाह्य महेश्वरीं॥ महाकालेन संयुक्तां पूर्वोक्तध्यानयोगतः॥ पूजयित्वा ततो ना
यमष्टोत्तरं तु मंत्रितं॥ यन्नाम्नार्पितेव तस्साऽवश्यं प्रतिपद्यते॥ एतद्विधानलोपे तु प्रभवंति न देवताः॥
योगिन्योऽप्सरसश्चापि के परे नरकिंकराः॥ स्वयं दिव्यवरो वापि किं चा वीरवरोत्तमः॥ इति न्येऽजायते लोके
स्तदाश्रयो भविष्यति॥ तस्माद्यत्नाद्गोपितव्यं न प्रकाश्यं कदाचन॥ अन्यार्चकश्चकर्मेदृदिति चेत्प्रतिपद्य
ते॥ निमिषे निमिषे हानिर्जायते कुलभूषणं॥ वरं प्रकाश्यं तत्सर्वमारोष्टकुलमुत्तमं॥ अयेमयेति यत्रो
क्तं स्वप्नबोधं महेश्वरं॥ रात्रौ वा दिवसे वापि जपेदष्टोत्तरं शतं॥ कुलव्यक्तिस्तदानस्याः शृणु देवकुलेश्व
र॥ कुलमागमनार्थश्च रात्रौ प्रहरमध्यतः॥ चतुःपथे कुलस्थाने गत्वा तत्कुलमंत्रकं॥ अष्टोत्तरशतं जप्त्वा
विघ्नः पथि न वर्त्तते॥ इति॥ अथ कुलचूडामणौ॥ अथ तद्रात्रिसमये स्वकुलं तुलिकोपरि॥ वामभागे समा
सीनं रक्तवस्त्रविभूषितं॥ स्वर्णालंकारभूषांगं रक्तगंधविभूषितं॥ गंधपुष्पधूपदीपनैवेद्यं सुमनोहरं॥
सर्वश्रृंगारवेषाढ्यं स्फुरच्चाकितलोचनं॥ जितामित्रकुचद्वंद्वं विशालकरिकुंभकं॥ ललाटे यंत्रमालिख्य
साध्यनाम विदर्भितं॥ तत्स्कंधे बाहुमाधाय भ्रंग्या धृतकुलाचलः॥ तांबूलपूरितमुखा कुलं तदभिसंस्थितं॥
कुलाकुलजपं कृत्वा समानयति तत्क्षणात्॥ यन्नाम्नालिखितं यंत्रं स मानयति साधकः॥ शतयोजनदूरस्था
नदीपर्वतमध्यगां॥ द्वीपांतरसहस्रेषु रक्षितां निगडादिभिः॥ पयोधरभरस्त्रुट्यन्मध्यमां लोललोचनां॥ नितं
३ बबिंबविधूतस्फुरज्जघनमेखलां॥ ता॥ साधकाकांक्षया उदयां स्थिरांतः प्रसर्पिणी॥ कपाटलोहसंवेष्टः प्राका

रात्रिचरांतरे॥ साधकांतः समासीनां देवताभिश्चारिणी॥ एवमाकृष्टसिध्यर्थं साधकः कौलिको भवेत्॥
अथ गंधर्वतंत्रे॥ महाचीनक्रमेणैव बीजं लिखित्वा कुंकुमेन तु॥ तत्पार्श्वे साध्यमालिख्य ताडयेत् दृष्टिरश्मिभिः॥
तत्र गच्छति कामार्त्ता यत्र देशे स पूजकः॥ अथ कुलचूडामणौ॥ ईशानेशांकुमासाद्य तत्र यंत्रं विलिख्य च॥ अष्ट
मीरात्रिमारभ्य चतुर्दश्यां समापयेत्॥ अष्टोत्तरशतं मंत्री मंत्रं जपित्वा तु संयतः॥ नग्नस्तां वृलयणीं सेपा मुक्तकेशो
जितेंद्रियः॥ मद्यप्लावितपूर्णनयनः परयोषित्समागमः॥ पूजयद्गंधपुष्पाद्यैर्दिग्वासाकुलभूषणः॥ यन्नामाना गर्भि
तं यंत्रं पूजयेद्दूरवल्लभः॥ सा समायाति कामार्त्ता यत्र देशे स पूजकः॥ मद्यं मांसं तथा मत्स्य यत्किंचित्कु
लसाधनं॥ तस्यै दत्वा ततः शेषं गुरवे विनिवेद्य च॥ तदनु शांभवं मूर्ध्नि कृत्वा शेषमात्मनि योजयेत्॥ मद्यमां
सं विना वत्स कुलपूजां समाचरेत्॥ जन्मांतरसहस्रस्य सुकृतं तस्य नश्यति॥ अथ शाकुंकास्य प्रमाणाय
था॥ तदुक्तं तत्रैव॥ ऊर्ध्वे वितस्ति विस्तार मधो विस्तारमेव च॥ अथ…नार्णवे॥ शतमष्टोत्तरं जप्त्वा त
स्मै तच्च प्रयच्छति॥ सर्वरूपा जायते देवि नात्र कार्या विचारणा॥ स्त्रियस्तु सकला वश्या दासीभूता भवंति
हि॥ शताभिजप्तपात्रेण रोचनातिलकं नरः॥ कृत्वोपचरपतिं यं मंत्री तं कुर्याद्दासवद्ध्रुवं॥ अथ निग्रह
स्तुपायस्तु तदुक्तं कालीतंत्रे॥ अथान्यत्संप्रवक्ष्याभिप्रयोगं शत्रुनिग्रहे॥ सर्वांते च नृलललनां यो जपि
त्वा स्तुतं जपेत्॥ कपिलां द्विभुजां कर्तृकपालं सव्यदक्षिणां॥ एवं ध्यात्वा तु शत्रूणां मारणं समुपाचरेत्॥ संके
त रहस्ये तारारहस्य वृत्तावपि परतंत्र धीर्यहानिमाह॥ हारपुटे स्पार्श्विया लिखित्वा पत्रकेनले॥ श्मशाने
मंत्रमुच्चार्य पुष्टिकृत्वा किरेच्च॥ सहस्रजन्मभिर्जप्त्वा विद्यानीह फलप्रदा॥ सिध्यप्रश्च विना श्रेयंति दैवानां
मपि दुर्लभः॥ तत्र तिष्कारो यथा॥ मातृचक्रे मृतं लेख्यमृतभिन्नपुटीकृतं॥ जले निक्षिप्य मंत्रं तु पुनर्नवद
तीरितः॥ यन्मन्नुतन्मनुं रुध्वं॥ तयोरित्यन्नात्री यथा॥ क्षणे क्षणे तु तेजस्वी रिपुदृष्टिर्गतोऽपि च॥ एतदनुष्ठा

श्यामा

ततो निजमंत्रसिद्धिर्भविष्यतीति ॥ गंधर्वतंत्रेपि ॥ महाचीनद्रुमरसेनालक्तं पिष्टं विधाय च ॥ यन्नाम्ना दीयते देवी सोऽचिरान्मृत्युमाप्नुयात् ॥ कालीतंत्रेपि ॥ नरास्थिनो लिखेन्मंत्रं क्षारयुक्तहरिद्रया ॥ सहस्रं परिसंजप्य निशायां वारविवासरे ॥ निक्षिप्यते यस्य गेहे तस्य मृत्युस्त्रिमासतः ॥ क्षेत्रे तु सस्यहानिः स्यादुज्जवहानिस्तुरंगमे ॥ धनहानिर्धनागारे ग्राममध्ये तु तस्य यः ॥ द्वेष्यद्वेषकयोर्नाम्नि तस्य द्वेषो महान्भवेत् ॥ लिखेन्मंत्रमिति ॥ मूलांते मुकं मारयेति साध्यसहितमित्यर्थः ॥ संजप्येति अमुकं मारय मारय इत्यंते मंत्रजापः ॥ द्वेषे तु ॥ अमुकामुकयोर्द्वेषं कुरु कुरु इत्यंते मंत्रं जपेत् ॥ क्षारं क्षारलवणं ॥ शताभिमंत्रितं तच्च निक्षिपेद्वैरिवेश्मनि ॥ ॥ अथोच्चाटनं ॥ तदुक्तं वीरतंत्रे ॥ श्मशानांगारमादाय मंगले वासरे निशि ॥ रुधिरवस्त्रेण संवेष्ट्य बध्नीयाद्रक्ततंतुना ॥ शताभिमंत्रितं तच्च निक्षिपेद्वैरिवेश्मनि ॥ सप्ताहाभ्यंतरे तस्य चोच्चाटनमितिमहत् ॥ अथ ध्यानरहस्यं तदुक्तं कालीतंत्रे ॥ शुक्लेन ध्यानयोगेन वशयेद्दशवर्त्तिना ॥ पीतेन ध्यानयोगेन स्तंभयेदखिलं जगत् ॥ कृष्णाभां मारणे शत्रोर्धूम्राभां शत्रुनिग्रहे ॥ इति ॥ अथ जपविशेषो लिख्यते ॥ तदुक्तं तंत्रांतरे ॥ मध्यमाया मध्यभागे मालां संस्थाप्य मंत्रवित् ॥ शांत्यादिस्तंभनक्षेपपुष्टभागेण संचालयेत् ॥ तर्जन्यंगुष्ठयोगेन द्वेषोच्चाटनयोर्जपं ॥ कनिष्ठांगुष्ठयोगेन मारणे जप ईरितः ॥ अथ प्रयोगांतरं ॥ संकेततंत्रे ॥ उच्चारयपदं चोक्त्वा पिंगाक्षी तदनंतरं ॥ षट्कूटं मंत्रमुद्धृत्य साध्यसंज्ञान्वितं पुनः ॥ देह्यादि चांतरं यान्ति रिपुकाक इवा परः ॥ पिंगादीति ह्रीमिति श्रीमिति तु तत्वं ॥ भूतभैरवोक्तत्वात् ॥ पिंगाक्षि कुटिले यावदिति तारास्त्ताचार्यचरणाः ॥ इति श्यामारहस्ये षोडशः परिच्छेदः ॥ १६ ॥

॥ अथ वेतालादिसिद्धिः कथं भवतीत्यां विके ॥ तन्मे कृपय देवेशी यदि स्नेहोस्ति मां प्रति ॥ ईश्वर उवाच ॥ निर्वस्त्रो ऽर्द्धकाले श्मशाने साधकोत्तमः ॥ भौमवारे मध्यरात्रे शवासनयुगांकिते ॥ खनितावास्त्रलक्षं वै जपेन्महिषमर्दिनीं ॥ ततः सहस्रं हुनेद्दस्तत्रैव पितृकानने कायमुद्धृत्य तत्तेनैव दंडपादुक